प्रवेश सं० ४२०४८ विषय: वेद क्रम सं० २९५

नाम आश्वलायनगृह्यकारिका ग्रन्थकार

पत्र सं० १-१८३ व्याख्या

श्लोक सं० अक्षर सं० (पंक्तौ) ३५ पंक्ति सं० (पृष्ठे) १२

आकार ८.३ x ४ लिपि: दे.ना. आधार: का.

वि० विवरणम्

पी० एस० यू० पी०—७७ एस० सी० ई०—१९५१—५० ०००

001893 आ. ७८७१

Indira Gandhi National Centre for the Arts

Indira Gandhi National
Centre for the Arts

॥श्रीगणेशायनमः॥ ॥नत्वाथमाश्वलायनमाचार्यं सर्वकर्मणां। यद्गृह्यकारिकार्थाय तदनुग्रह
समर्थेन क्वापि॥१॥ तत्रादावाश्वलायनगृह्यसूत्रमात्रेणोदात्मबुसन्निमतां अध्ययनैकदर्श
र्शिनां तदुक्ततत्तत्कर्मनिर्वाहादुस्तरं इति श्रीनिकुन्नारायणाख्यो नमकरोत्। तामेव वृत्तिं पुरस्कृत्य
सूत्रार्थानुकूलान् जयंतादीन् विचार्य कारिकाः क्रमलोचनिकर्त्तव्यताकारिणीः कारिकान्व का
र। तथाप्यत्र केवलसंक्षेपकारिण्यात्कर्मनिर्वाहकारिणीमपि कारिकां निर्वोढुं निमवात्रोपयो
गिनीमवधार्य कर्म कारयंति कुर्वंति वा। अतः कोप्यत्र कर्मदेवतानुग्रहेण गृह्योक्तसकलकर्मसु
किमादौ किमंते किमन्तरस्ति किं वा नास्तीत्यादिरूपं संदेहं केवलं पद्धत्याद्यरिकर्त्तुमशक्यत्वात्का
रिकार्थपरिज्ञानार्थं तदवद्दातः पाणिन्यामाश्वलायनशाखायां केलेवपुरवासिनंत्लोकोत्तरंबु
ध्यदेवभट्टाख्यं गुरुमुपास्य तदुक्तिमवनिमित्तात्तत्क्रियमाणकर्मकलापसंदेहानुपपत्तेः ग
ावनीमेव कारिकां विरचयामि॥ ॥तत्रादौ पद्यं॥ ॥आश्वलायनमाचार्यं नत्वा तद्गृह्यकर्मणां।
प्रयोगं वच्मि केषांचिद्बुद्धिनिकाराधिनाथितमिति॥ [illegible]॥ ॥आश्वलायनाख्यं प्रसिद्धमात्वा १
येनमस्कृत्य आश्वलायनोक्तगृह्यकर्मणां प्रयोग[illegible]र्तव्यतां वच्मि कथयामि। अत्र गृह्यक

र्मणामित्यत्र गृह्यशब्दस्यार्थे स्त्रयं गृहनिमित्तोग्निर्[illegible]वानेकर्म्माणि लक्षणया गृह्याणि
स्मार्तानीत्युक्तं तेन गृहशब्देन शालानामर्थः। तत्र [illegible]गारादग्निः यत्र च दायादविभागकालेपि
अग्निः तत्र तत्र गृह्यकर्मव्यवहार इति। तत्र प्रयोगक[illegible]कथं तत्राह। संक्षेपात् दृष्ट्या यथाक्रमं सं
संपन्नकर्मणामिति कर्तव्यतासंकाचवदिति कीदृशं प्रयोगं। वृत्तिकारादिनाथिनं आदित्यब्राह्मण
तः शौनकश्च तेभ्यो विनिं कथितं प्रदर्शितमिति इतिकर्तव्यतानिर्वाहार्थं वक्ष्यमाणकर्मणां क्रियातिक
र्मसिद्धिर्भवति। तथात्र पुरतः परिभाषा रचिता। तत्रादौ तावत्तदर्थकथनमवारभ्यते॥ ॥प्राणानायम्य
संकल्प्य परितः स्थंडिले शुचि। अधिकं वसुमात्रं वा गोमयेनोपलिप्य वेति॥२॥ ॥अस्यार्थः॥ ॥त
त्र पूर्वं विष्णुरपि कर्म्मागत्वाद्विराचमनं विधाय समानवैकुण्ठास्तरनयत्निशपीत्स्वपवित्रयप्राणायामं
कुर्यात्। तथा च शौनकः। अथ शुद्धः समे देशे आसीनः प्राङ्मुखः शुचिरिति। ततः संकल्प्य तत्तत्कर्मानु
सारेण तथा तथा प्रतिज्ञाय शुचिं इषुमात्रमपि केवा परितः स्थंडिलं परितः गोमयेनोपलिप्य त्वन्यः
। तत्र शुची सनत्र अर्थात् शुद्धमृत्तिकया साधितमिति। स्थंडिलं तु हस्तमात्रं प्रदक्षाइति। तत्र परिमा
णापेक्षायां निदृष्टं देषुमात्रं ततोधिकं वेति। सत्रेपि इषुमात्रावरं। अवरं च इषुमात्रं अत्र विचा

Indira Gandhi National
Centre for the Arts

षः। इषुत्रीम अरत्नित्रयं। त्रिररत्निरिषुस्मृतः इत्यभिधानात्। अरत्निस्तु कूर्परमारभ्य कनिष्ठिका
पर्यन्तमायामः। तदुक्तं। प्रकोष्ठो विस्तृतकरो हस्तो मुष्ट्यानुबद्धया। अरत्निः स्यादरत्निस्तु नि
ष्कनिष्ठेन मुष्टिना। आपरतन्नमनन्तु द्विरातं गुणारत्निः तदर्द्धन्तु प्रादेशारत्निकृतिः। स्थण्डिल
प्रमाणं निरूप्य तत्तु संस्कार्यायोग्यं कथं भवेदित्यत आह। तत्स्थण्डिलं गोमयेन परितः उपलिप्य सस्तौ तु
वत्सपिलेपनं कुर्यादित्यर्थः॥ ॥तथा भवनीयनकः॥ ॥इषुमात्रं चतुरस्रं गोमयेन सर्वतो दिग्
उपलिप्य स्थण्डिलं तु चतुरस्रं तु सर्वतः इति। इदानीं स्थण्डिलसंस्कारानाह॥ ॥यज्ञियं शाकलं कि
विदादद्दीत ततः परं। अग्निस्थापनदेशस्य पश्चाद्देशसंमितां॥३॥ उल्लिखेदुदगायतां तस्या
उभयतोपरे। पूर्वायते उदक्संस्थे असंसृष्टे च पूर्वया॥४॥ मध्ये तिस्र उदक्संस्थाः पूर्वा या मा
असंहताः। लिखितायेन सकलं यज्ञियं तन्निधापयेत्॥५॥ अद्भिरभ्युक्ष्य शाकलं निरस्याप उ
पस्पृश्य तु॥६॥ ॥अस्यार्थः॥ ॥ततः परमुपलेपनानन्तरं। यज्ञियं यज्ञार्हसजन्यपालाशादिज
न्यमिति शाकलं तत्काष्ठैकदेशं किंचिदिति अविव[illegible]तत्प्रमाणमुल्लेखनसमर्थं आददीत
लेखार्थं गृह्णीयात्। तथा च शौनकः॥ ॥तस्मिन् [illegible]यज्ञियस्य शाकलेन तु उल्लिखेदिति। १५

२

कथं पङ्क्तिलेखासु अग्नेः प्रतिष्ठापनं स्यादिति। त[illegible]ल्लेखनमाह। अग्निस्थापनदेशस्य
यत्र मध्ये अग्निः स्थाप्यते सोयमग्निस्थापनदेशः तस्य पश्चात् पश्चिमभागे प्रादेशपरिमिता
मेकामादौ लेखां लिखेत्। कीदृशीमित्यत आह। उदगायतां दक्षिणत आरभ्य उत्तरभागं नयेत्
।तथा च सनौ उदग्दीर्घा नवलिना मा लिखेत्। तस्या उभयतोऽपरे तस्याः उदगायतायाः उभयतः
आद्यन्तयोः दक्षिणतरतः अपरे द्वे लेखे लिखेत्। कथं ते पूर्वायते पश्चिमत आरभ्य पू
र्वदिग्भागं नयेत्। प्रादेशमात्रप्रमाणमत्र रेखासु ज्ञेयं तु प्रादेशमात्रेण तु तेनेति सर्वा
ख्याने निरूपितं। कुत आरभ्य कुत्र वा रेखाकर्म संस्थानमाह। उदक्संस्थे इति। दक्षिणभाग
लेखां निर्वर्त्य उत्तरभागे लिखेदित्यर्थः। पूर्वया प्रथमया पश्चिमभागे अपरदक्षिणे अप
रस्तेराहतासां मध्ये मध्यप्रदेशे तिस्रो लेखा लिखेत्॥ ॥पूर्वया मा पूर्वभागे नेतव्याः अ
संहताः परस्परं अमिलिताः उदक्संस्था उत्तरसंस्थाः समाप्तिर्यासां ताः अर्थात् प्रारंभो द
क्षिणत इत्यर्थः। ततः तच्छकलं किं कुर्यादित्यत आह। लिखितायेनेति। येन शाकलेन लेखा लि
खिताः न यज्ञियं शाकलं अधः स्थण्डिलं निधापयेत् [illegible]

Indira Gandhi National Centre for the Arts

यज्ञियं शाकलमित्युक्तं तन्निरस्यमानमपि किमप्यपूर्वमुत्पादयिष्यतीत्येतद्द्योतनार्थमिति पूर्वं
यज्ञियशाकलदानं कुर्यादित्युक्ते ननु ततो ल्लेखनं कुर्यादिति तच्छंकारीकर्तुं येनोल्लिखितान द्युति
यं शाकलमित्युक्तमिति वा स्थंडिलस्थं शाकलं किं कुर्यादित्याह। शाकलसमेतं स्थंडिलमद्भिरुदके
रभ्युक्ष्य प्रोक्ष्य तच्छकलं निरस्यापउपस्पृशेत्। पाणिं प्रक्षालयेत्। निरसनेदिङ्नियमो नास्ति।
॥ ॥तथाच जयंतः॥ ॥उल्लिख्य तच्छकलं तत्रैव निधाय तत्स्थं स्थंडिलमद्भिरभ्युक्ष्य शाकलं नि
रस्यापउपस्पृशेत्। शौनकमते प्राच्यां निरसनं॥ ॥तथाच शौनकः॥ ॥निधाय शाकलं तस्मि
न्नभ्युक्ष्य स्थंडिलं जलैः। निरस्य शाकलं प्राच्यां पाणी प्रक्षाल्य वाग्यतः इति। गृह्यपरिशिष्टे तु यज्ञि
यशाकलमूलेन स्थंडिलमुल्लिख्य तत्प्रागग्रं निधाय शोस्य प्राग्नेयां दिशि निरस्येत्। अत्रैमो
नमावतपकं। तथाच स्मृत्यंतरे। स्नास्यतो वरुणः कांतिं जुह्वतोग्निः श्रियं हरेत्। भुंजतो मृत्युरायुष्य
तस्मान्मौनं त्रिषु स्मृतं।- अत्राग्निनिर्णयमाह भगवान्। स्मार्तोग्निर्द्विविधो ज्ञेयो गृह्यः पौरुष
इत्यपि। अथाहं निर्णयमाह भगवान्। स्मार्ताग्निर्द्विविधो ज्ञेयो गृह्यः पौरुष इत्यपि। यस्मिन्वि
वाहं कुरु =न्वि= तेसोग्निर्गृह्य इति स्मृतः। जातकर्मादिसिद्ध्यर्थं यो व्याहृतिभिराहृतः। सोग्निः

पौरुष इत्युक्तः शालाग्निर्लौकिकः तथा। गृह्ये गृह्या ... ग्निर्वेतराण्यपि पौरुष इति। कारिका
यां। चौलकर्मोपनयने विवाहः प्रथमस्तथा। अनादिस्नानागिसेतलौकिकाग्नावितिस्थितिरिति॥ ॥
तत्रोल्लेखनानंतरं किं कर्तव्यमित्याह। प्रतिष्ठाप्याथ लेखासु होमायालं हविर्भुजं॥ धाएतदेनं प्रकुर्वी
त होल्पतंसरूपि नेनलेइति॥ ॥अस्यार्थः॥ ॥अथोल्लेखनानंतरं षट्स्वपि लेखासु होमसमर्थम
ग्निं प्रतिष्ठाप्य व्याहृतिपूर्वकमग्निं संस्थापयेत्। होमायालं हविर्भुजमित्यत्र होमयोग्यत्वं। तच्चाद्विधा
अरण्यादिजत्वं प्रदीप्तबहुलांगारमयत्वंच॥ ॥सिद्धांतशेखरेपि॥ ॥उत्तमोऽरणिजन्योग्निरुत्तमः सू
र्यकांतजः। उत्तमः श्रोत्रियागारान्मध्यमः स्वगृहादिजइति। अग्निप्रणयने विशेषमाह वात्रिः। पात्रांतरे
णापिहिते ताम्रपात्रादिके शुभे। अग्निप्रणयनं कुर्याच्छरावेनाहतोपि वेति। यत्तु स्मृत्यर्थसारे। शरावेभि
न्नपात्रे वा कपाले वोल्मुके पिवा। नाग्निप्रणयनं कुर्याद्व्याधिहानिभयावहमिति। तस्यमुख्यपात्रसंभ
वे शरावो न ग्राह्य इति तात्पर्यं न तु सर्वथा निषेधः। प्रतिष्ठाप्या सु रेखा स्विति षट्स्वपि रेखासु अग्नि
व्याप्याग्निप्रतिष्ठापनमिति वृत्तिः। स्थंडिलेग्निं व्याहृतिरन्त्यालं प्रतिष्ठाप्येति। अत्र व्याहृतिभिरित्यु
पलक्षणं। एह्यग्नजुष्टादमूनामित्येनयोर्मंत्रयोरेदनेन मंत्रजाष्ये अग्निप्रतिष्ठापनपरत्वेनव्या

Indira Gandhi National
Centre for the Arts

स्यान्तत्वात्। एतदेतं प्रकुर्वीत। कर्म्मांगे द्विरात्रमनाद्यग्निप्रतिष्ठापनमंते यस्य कर्मणस्तत्त्योक्तं तावत्पर्य
न्तं कर्म कुर्वीत। पुनरेतदेतं करणं विरादयति। संस्थापिते नले संस्थापितेनानामव्याहृत्यादिमंत्रैः तासुले
स्वासु प्रतिष्ठापितः तस्मिन्नग्नो होष्यन्नित्यन्वयः। एतदेतमग्निप्रतिष्ठापनान्तं कर्म कुर्वीतेत्यर्थः। तेन वेश्म
देवधार्ये ग्नौ नित्यहोमादौ न प्राप्नुत इति भावः। अत्राग्निप्रतिष्ठाभावात्। एवमनया रीत्या होमयोग्यमग्निं
निरूप्य आज्यैकद्रव्यहोमे कस्यांगस्य नित्यत्वं कस्य वा विकल्प इति वक्तुमारभते॥ ॥आज्यैकद्रव्यके हो
मे स्याच्चेदाज्यपरिग्रहः॥७॥ स्यात्परिस्तरणं तत्र हुताहुतमिति स्थितिरिति॥ ॥अस्यार्थः॥ आज्यमेव
एकं द्रव्यं यस्मिन् होमे स तथोक्तः। यथा चौलोपनयनादौ। तादृशे होमे यदि सूत्रकृदाज्यपदपरिग्रहं करोति
। आज्यं जुहुयादिति ब्रूयात्। तदा तस्मिन् होमे परिस्तरणं हुताहुतं। हुतिरेव हुतं हुतं च अहुतं च यत्त
त्था। कं करणं अभ्युदयः अकरणं प्रत्यवायो नास्तीति यत्निकारः इति स्थितिः॥ इति सर्वत्र व्यवस्था परिस्त
ते नित्यत्वं कुत्रेत्याह॥ ॥नोच्चारयति यत्राज्यपदं कर्म्मसु सूत्रकृत्। अनादिष्टाज्यहोमेषु तत्र नित्या परिस्त
तिरीति॥८॥ अस्यार्थः। येषु कर्मसु आज्यपदं सूत्रकृन्नोच्चारयति आज्यं जुहुयादिति। कथंभूतेषु क ४
र्मसु अनादिष्टाज्यहोमेषु न आदिष्टः अनादिष्टः। अनादिष्टः आज्यहोमो येषु कर्म्मसु। यथा गृहप्रवे

शनीयहोमादौ आनः प्रजां जनयत्वित्यादि निर्द्दिशेत्याह। तत्र परिस्तरणं नित्या। अत्र चौलोपनयनादौ गृह
प्रवेशनीयहोमे च आज्यैकद्रव्यप्रवृत्तावपि कथमेकत्र परिस्तरणविकल्पः कथमेकत्र नित्यत्वमिति चेत्।
उच्यते॥ ॥ते यत्र उल्लेखाह तत्र परिस्तरणं नित्या। यत्राज्यं जुहुयादिति ब्रूयात्तत्र हुताहुतं परिस्तरणं।
कुत्र वा कर्मणि आज्यभागयोः ब्रह्मणोपि हुताहुतत्वं कुत्र च नित्यत्वं तन्निरूपयितुमाह। सर्वस्मिन्पाकय
ज्ञस्त आज्यभागौ हुताहुतौ। सर्वेषु पाकयज्ञेषु भवेद्ब्रह्मा हुताहुतः॥९॥ धन्वंतरिमखे ब्रह्मा नित्यः शूलग
वेन तथेति। अस्यार्थः॥ ॥पाकयज्ञो नाम अग्नौ क्रियमाणं त्वनुष्ठितपूर्वकं यज्ञमात्रं अथवा प्रशासायज्ञो
दानं सर्वस्मिन्नपि यज्ञमात्रे आज्यभागौ हुताहुतौ स्तः। तौ आज्यभागाविति अग्नीषोमौ चक्षुषी। उच्येते
। अग्निश्च सोमश्च अग्नीषोमौ। अग्नेः स्फुरतामसोमाज्यमित्यनेन न पत्नं। हुताहुतावितिवैकल्पिकौ सर्वेष
पि पाकयज्ञेषु ब्राह्मणेपि विकल्पना। पाकग्रहणमाज्यहोमाधिकारनिवृत्त्यर्थं। कस्मिन्नपि पाकयज्ञेपि ब्र
ह्मणो नित्यत्वमाह। धन्वंतर्यज्ञ शूलगववर्ज्यं। अन्यत्र ब्रह्मणः हुताहुतत्वं। यदा ब्राह्मणमुपवित्रप कर्म
कुर्यात्तदा कस्मिन्समये कथं वा उपवेशयेदित्युच्यते। तदा ब्रह्मवत्सु कर्मसु प्रणीताप्रणय
नात्पूर्वं उत्तरदिग्भागे ब्रह्माणं नीत्वा यजमानः स्वहस्तेन तद्धस्तं गृहीत्वा वरयेत्। यदाह शौनकः॥ ॥

Indira Gandhi National
Centre for the Arts

अथ र्त्विजं वरणीयं कुलीनं ब्राह्मणोत्तमं। तत्पाणिं पाणिना गृह्य ब्रह्माणं वृणुयात् सुधीः। द्वितीयया
विनस्यात् तन्नामो द्विरुपवृणे इति। उक्तो वृतोस्मीति वदन्नग्रेणाग्निं परीत्य वा तस्मिन्नुदङ्मुखः स्वस्ति
त्वा दक्षिणे वासने तृणं। अंगुष्ठानामिकाभ्यां तु समादाय निरस्य स्व। निरस्तः इत्यनेनैव तृणं अग्रं दक्षि
णां दिशं उपस्पृश्य इदमहमित्यप विरुपतृणेषु सः। समस्तपाण्यंगुष्ठश्च दक्षिणपर्यं वस्ति नइ
ति। अत्र वामोरूपर्ये वस्ति न दक्षिण पाद इति व्याख्येयं। सो कर्यार्थमत्र प्रयोगो लिख्यते। कर्त्ता स्व
कीयेन दक्षिणपाणिना विप्रस्य दक्षिणं पाणिं गृहीत्वा अस्मिन्नु पूर्वानेकर्मणि अमुकनामाणं न
वेतं ब्राह्मणं ऋत्विजं वृणे। ततो वृतोस्मीति ब्रूयात्। वृतो ब्रह्मा तत इतान्यद्वातोगत्वा नत्रैव कर्माग
मान्वस्य समस्तपाण्यंगुष्ठो भूत्वा अग्नेः = ब्रह्मा = पूर्वविभागेन गत्वा दक्षिणत आगत्य तिष्ठन्नेव आस
नस्पमेकं कुशं छित्त्वा अग्रं दक्षिण हस्तेन अंगुष्ठोपकनिष्ठिकाभ्यां गृहीत्वा नैर्ऋत्यां दिशि निरस्य स
जेत् तत्रायं मंत्रः। निरस्तः परावसुरिति। अनेन मंत्रेण त्यजेत्। ततो दक्षिणहस्तेन उदकस्पर्शं कृत्वो
आसनं कुशेषु समस्तपाण्यंगुष्ठएवसनू इदमहमर्वावसोः सदने सीदामीति मंत्रेण उपविश्य ५
ॐ बृहस्पते ब्रह्मा यज्ञं गोपाय निजपेत्। ततो यजमानः प्रणीतापात्रमादाय अग्नेः पश्चिम भाग

संस्थाप्य उत्तूनवारिणा संपूर्य पवित्रे अंतर्धाय गंधपुष्पाणि प्रक्षिप्य नासिकां तमुध्रत्य ॐ ब्र
ह्मन्नपः प्रणेष्यामीति यजमानो ब्रूयात्। ततः प्रश्नकृतेॐ भूर्भुवः स्वः बृहस्पतिः प्रसूत इति उपांशु
जपित्वा ॐ प्रणय इति उच्चैः पवित्वा अग्नेरुत्तरतः स्थापयेत्। प्रकृतमनुसरस्तु उच्यते। इदानीं सूत्र
कारणं तत्कर्मविषयेन यथा तथा होमव्यवहारः प्रदर्शितः स एवाभिधीयते। उवे होम हवि त्राम्ना
हविर्मंत्रेण सूत्र कृत्। नामनं यत्र तत्रेष्ट हवने नामधेयं त इति। अस्यार्थः। हविर्नाम्ना देवताना
ममंत्रेण वहामं ब्रूत। यथा सावित्र्यै ब्रह्मणे इत्यादि। हविर्दृदिकमंत्रेणापि यथा अग्नेनय सुप
थाराये अस्मानिति। यत्रोभयमपि नास्ति तत्र नाममंत्रः न वैदिकमंत्रः तत्र हवने नामधेयं यद्वा प
था नाममंत्रेण वहामः यथा सूत्रे। प्रजापत्यस्य स्थालीपाकस्य उक्ते सत्र प्रजापत्यस्य स्थाली
पाकस्य विशेषणत्वेन ग्रहणं। न मंत्रत्वेनाथवा तु र्थ्यन ना भावात्। यत्र न वैदिकमंत्रग्रहणं नापि ना
ममंत्रग्रहणं। होमश्चोच्यते। तत्र किं कर्त्तव्यमित्याह। अनेकांम्युनपक्षायं वोलादावा। अनोपदा
। तदाग्निरिदं इत्याद्याहोत्व्या इति वृत्तिकृदिति। अस्यार्थः। वोलादो वोलापनयनगोदानवि
वाहादिषु त्वारः पक्षाः संभवति। कथं वा त्वारः वपक्षाः उच्यन्ते। अग्न आयूंषि पवस इति ति
सृभिः प्रजापते न त्वदेतान्यन्य इत्येकया ऋचा। त्वं तस्त्रे एव आहुतयस्तु निसकं। ततः आज्यभागोन

ततः। नर्हि स्विष्टकृदपि न स्यात्तेन। उरस्तान्नियमार्थं द्विपुरस्ताद्ग्रहणं कृतं। अत्राधारयोस्त्त नाउ
तित्वानो भवेतामित्यर्थः। अथ द्वितीयः पक्षः॥ ॥व्याहृतिर्विर्वेति॥ अयमर्थः। भूःस्वाहेत्यादिना
आहुतिचतुष्टयं॥ अथ तृतीयपक्षः। समुच्चयमेके। एके आचार्याः त्र्याज्याहुतीनां व्याहृतीनां च स
मुच्चयं समुदायमिच्छन्ति। तेनाष्टावाहुतयो भवंति। चतुर्थपक्षस्तु नैकेषां चनपक्षः। अस्यार्थः पक्ष
चोलादावाश्रितः स्यात्। तदा अग्निरिंद्रस्त्वाद्याज्याहुत्याइत्यर्थः। तथाच गृह्ये॥ ॥अग्निरिंद्रः प्रजा
पतिर्विश्वेदेवा ब्रह्मेत्यनादेशे। यत्र पुनरेकस्मिन्काले तत्तन्निमित्तानुरोधेन युगपत्प्राप्तानामने
कपाकयज्ञानां तत्रावृत्तिरस्ति न वेत्याशंक्याह। अनेकपाकयज्ञास्त्वेकस्मिन्काल एकत्र तु समा
नतंत्रकाः कार्या। न तंत्रावृत्तिरिष्यते॥१३॥ अस्यार्थः। एकस्मिन्काले अनेकपाकयज्ञा(के) येतेन प्रा
प्तास्त्वेन तदा ते समानतंत्रकाः कार्या इत्यर्थः। तत्र तंत्रावृत्तिर्न्नेष्टा। तंत्रस्य यज्ञोपकरणादेः बर्हिरिध्मा
देर्नावृत्तिः। पात्रासादनादीनां यज्ञोपकरणानां नित्यत्वं पाक्षिकत्वं वेत्यत आह। पात्रासादनमिच्छात
आज्याधिश्रयणादि च। स्रु[illegible]वादिमार्जनं चेध्मरज्जुप्रहरणं तथा॥१४॥ अस्यार्थमाह। अत्र पाकय ६
ज्ञे पात्राणामासादनं इच्छातः। वैकल्पिकमित्यर्थः। तथैव च आज्याधिश्रयणादि च कृताकृतमिति।

आज्याधिश्रयणं नाम उत्तरतोंगारेषु आज्यस्थापनं अवज्वलनेन दर्भाग्रद्वयप्रक्षेपः पर्यग्निक
रणं च। एतत्सर्वं कृताकृतमिति आज्योत्पवनमात्रमेव नित्यं भवती सग्रे वक्ष्यति। स्रुवादिमार्जनं
स्रुक्स्रुवसंमार्जनमपि कृताकृतं। इध्मरज्जुप्रहरणं इध्मस्य बंधनार्थं विधिनः संपादिता रज्जुः घृ
ताक्तां कृत्वा तूष्णीं रुद्राय पशुपतये स्वाहेति वा अग्नौ प्रक्षिपेत्। एतदपि कृताकृतं। अत्र पूर्णपा
त्राज्यस्योत्पवनयोर्नित्यत्वं नियतामित्याह। पूर्णपात्रं भवेन्नित्यमाज्यस्योत्पवनं तथेति। अस्या
र्थः। अत्र पूर्णपात्रं नित्यं भवेत्। पूर्णपात्रस्य उत्पूतवारिणा प्रोक्षणीपात्रोदकेन पूरणं भवतीति
नियमास्ति एवं च सति प्रोक्षणीपात्रासादनस्यापि नित्यत्वं स्यात्। अन्यतः पात्रासादननित्वतो
पूर्णपात्रस्य नित्यत्वेन प्रवृत्तो जलांतरेणापि पूरणं भवति। तथा आज्यपापसर्जनत्वेन प्रोक्षमु
त्पूतवारिपूरणं कृताकृतं। द्रव्यसाधनयोरनुक्तविषये किं वात्र द्रव्यं किं वात्र साधनं भवतीत्यत्रा
ह। द्रव्यानादेश आज्यस्यादनुक्ते साधने स्रुवइति॥१५॥ यत्र होम्यद्रव्यस्यानभिधानं तत्राज्यमे
व द्रव्यं भवति। यत्र होमसाधनं दर्व्यादि नुक्तं भवति तत्र स्रुवः साधनं स्यात्। द्रव्यस्यानादेशे
द्रवद्रव्यमाज्यं भवति तस्य हवनं स्रुवेणैव भवतीति स्रुव एव साधनं

Indira Gandhi National Centre for the Arts

स्वीकृतमिति भावः। अत्र गृह्यकर्मणि कुत्र कुत्र मंत्रोच्चारणं ध्याने भवतीत्याह। जपानुमंत्रयो
मंत्रउपस्थानाभिमंत्रणे मंत्रोपि कर्मकरणे गृह्यकर्मण्युपांशु षट्॥१६॥ अस्यार्थः॥ ॥ २ य
त्रसत्र कृज्जपतीति ब्रूयात्। तत्र ध्याने जपः। यत्र चानुमंत्रणं तत्रापि मंत्रोच्चारणं ध्यानेः। यत्र पुनर
पस्थाने अग्निमुपतिष्ठेत तत्रापि ध्याने उच्चारणं। अभिमंत्रणेपि ध्याने भवति। कर्मकरणे मंत्रे
ण इदमग्नौ हूयते। तत्रापि मंत्रः ध्यानेः पठितव्य इत्यर्थः। एवमत्र गृह्यकर्मणि उपांशु ध्यानैः ष
ट्स्वपि स्थलेषु मंत्रोच्चारणं भवति। यत्र पुनः विध्यर्थवादमंत्रसमुदायात्मकवेदभागेषु को वा
विधिभागः को वा अर्थवादभागः को वा मंत्रभाग इत्याशंक्य विध्यर्थवादभागस्य स्मार्त्तकर्मण्य
नुपयोगात्तल्लक्षण प्रतिपादनं विहाय सर्वत्रोपयोगित्वान्मंत्रलक्षणमाह। इदं कार्यमनेनेति
नक्वचिद्दृनयत विधिः। लिंगादेवेदमर्थत्वं येषां ते मंत्रसंज्ञकाः॥१७॥ अस्यार्थमाह। येषु वेदविभा
गेषु अनेन इदं कार्यं कर्त्तव्यमिति यत्र विधिर्नास्ति लिंगादेव इदमर्थत्वं लिंगं नाम कर्मदेवताप्र
काशकं पदं। अयं अर्थः प्रयोजनं येषां ते इदमर्थाः तेषां भावः। इदमर्थत्वं ते वेदविभागा मंत्रसंज्ञ ७
का ज्ञातव्या इत्यर्थः। होमस्तु मंत्रान्ते मंत्रमध्ये वा स्वाहेत्यन्तं कथं कर्त्तव्य इत्याशंक्याह। मंत्रान्ते क

र्म कर्त्तव्यं सर्वत्र करणत्वत इति। अस्यार्थः। मंत्रान्ते मंत्रं पठित्वा होमादि कर्म्म कर्त्तव्यमिति। सर्व
शास्त्रे इत्थमेव व्यवहारात्। इदानीं कर्मणा सह मंत्रावृत्तिरप्यस्तीत्याह। कर्मवृत्तौ तु मंत्रस्याप्या
वृत्तिर्गृह्यकर्मणि। अस्यार्थः। यत्र कर्मणः आवृत्तिः यथा विवाहे त्रिः परिणयं जपति। अमोहम
स्मीति प्रदक्षिणावृत्तौ सत्यां मंत्रजपस्याप्यावृत्तिः। आसीनाद्यनियमे कथं वा कर्म कर्तव्यं भवती
त्याह॥ ॥ आसीनऊर्ध्वः प्रह्वो वा नियमो यत्र नेदृशाः। तदासीनेन कर्त्तव्यमिति नियमो न स्यात् नप्र
ह्वेन न तिष्ठतेति॥१८॥ ॥अस्यार्थः। यत्र कर्मणि उपविश्य ऊर्ध्वं स्थित्वा नम्रीभूय वा कर्त्तव्यमिति
नियमो न स्यात्। तदा उपविश्यैव कर्त्तव्यं॥ ॥इति परिभाषा समाप्ता॥ ॥परिभाषार्थमुक्त्वा सं
प्रति प्रथमत एव यज्ञादौ प्रधानांगत्वेनांगीकृतस्थालीपाक एवोच्यते। अंगसंघश्च तत्रोक्तः स्था
लीपाकः पुरोच्यते। गृहवर्त्तीय होमाद्यापौर्णमास्या गमिष्यति॥२०॥ तस्यांतं प्रारभेतेति वृत्ति
कारादिसाधितमिति। अस्यार्थः॥ ॥तत्र ते सुदर्शपूर्णमासादियागेषु अंगसमुदाय उक्तः त
स्मिन्नप्यंगसमुदाये स्थालीपाकस्य मुख्यांगत्वात्स एव पुरा प्रथमतमुच्यत इत्यर्थः। गृहप्रवेश
होमानंतरं या आद्या पौर्णमासी आगामिष्यति गृहप्रवेशनीय होमादिति। अग्न्याधानमात्रो

Indira Gandhi National
Centre for the Arts

पलक्षणार्थं तत्राप्यामावास्यापौर्णमासी तस्यां पौर्णमास्यां नेवस्यमाणं स्थालीपाकं प्रारंभेन। इति वृत्ति
कारेण सान्निनं प्रतिपादितमित्यर्थः। कथमिति चेत् उच्यते। अथ पार्वणस्थालीपाक इति सूत्रे वृ
त्तिकारेण। पर्वणि भवः पार्वणः स्थालीपाक इति नामधेयं। पार्वण वच नं पाणिग्रहणादहरहः कि
यस्वांकानिवृत्त्यर्थं। विवाहानंतरं या पौर्णमासी तस्यामस्य प्रथमतः प्रारंभः अनयारीत्यासाधेन
मित्यर्थः। तिथिं निरूप्य कस्मिन्वा काले प्रारंभविधानमित्याह। प्रातरौपासनं कृत्वा समिधौ द्वौ नि
धायेच्च॥२१॥ अथवातिस्र आदध्यात् क्रतुसंकल्पपूर्वकं। अस्यार्थः। पूर्णिमायां प्रातरौपासनं कृ
त्वा तत अन्वाधानांगद्विरावम्यप्राणानायम्य क्रतुसंकल्पपूर्वकं क्रनोर्यजस्य संकल्पं यक्ष्यमाणदे
वत [illegible] परिग्रहं कृत्वा तदंते समिद्वयमाधत्ते। अग्नौ प्रक्षिपति। अन्वाधानं करोतीत्यर्थ
ः। अथातिस्र आदध्यात्। तथा च शौनकः। आरब्धकर्मांगतया अन्वादध्यात् समिद्वयं। काष्ठत्रयं
वा संकल्प्य अमुं यक्ष्य इति ब्रुवन्। अनेन यक्ष्यमाणाया देवतायाः परिग्रहः। अन्वाधानमिदं कार्य
मन्वाधानादनंतरमिति। जयंतोक्तमन्वाधानपदव्याख्यानं लिख्यते। अन्वाधानं नाम क्रियमा
णस्य कर्मणोंगत्वेमाहावं द्विकाधाव्यासः। सच्छसर्वणपधःशायी हविष्यं लघुभोजनं। नसायं ८
[illegible]

नोपवासस्यान्ते लाभिषविवर्जितः। [illegible] सांसयाय [illegible] मसूरान् लवणान् क्षारान् लवणकान्
कोरदूषितान्। माषान् मधुपरान्नं च वर्जयेत् सर्वणि द्विज इति। प्रथमदिने अन्वाधानं प्रेतिपदिइ
ष्टिः। सद्यःकालपक्षे तु यस्मिन् दिने अन्वाधानं तस्मिन्नेव दिने इष्टिः। सद्यःकाल पक्षे तिथिप्रतिपा
दयति। सद्यःकाले भवेद्यदा पौर्णमासस्तु पार्वण इति॥२२॥ अस्यार्थः। पर्वणि भवः पार्वणः पौर्ण
मासः चान्द्रस्तु अमावास्यायामपि सद्यःकाले स्त्वयति। शास्त्रोन्तरपर्वद्वयेपि सद्यःकाल प्रतिपा
दनात्। तथाहि। संधिश्चेत् संगवादूर्ध्वं अर्वागावर्तनाद्रवेः सा पौर्णमासी विज्ञेया सद्यःकालविधौ तिथि
घिरिति। अमावास्यायामपि सद्यःकालविधिरुक्तो नारदीयपुराणे। मध्याह्नकद्विनीयेस्या नाम मा
वास्या च पूर्णिमा परेद्युरेव विज्ञेया सद्यःकालो विधीयते। पर्वद्वयपरे द्युः स्यात् संगवासरतो यदि
। सद्यःकालो परेद्युः स्याद्वयमेवं तिथिक्षय इति प्रसंगाद्विकृतियागकालो निरूप्यते तत्राह। वि
कोऽसी। आवर्त्तनात्प्राक् यदि पर्वसंधिः कृतात्तस्मिन् प्रकृतिं विकृत्याः। तत्रैव यागः परतो यदि स्या
त्तस्मिन् विकृत्याः प्रकृतेः परेद्युः। अस्यायमर्थः। आवर्तनेतनः पुरा वा पर्वसंधौ तस्मिन् संधिदिने
प्रथमं प्रकृतियागं कृत्वा पश्चादाग्रयणादिविकृतियागः कर्त्तव्यः। यदा आवर्तनात् परतः संधि

Indira Gandhi National
Centre for the Arts

सदाकेवलं तिष्ठति यागः कर्तव्यः। पत्नीनियोगः कैश्चित्संधिदिनात्परेद्युरनुष्ठेय इति। समित्प्रक्षे
पणानंतरं इध्माबर्हिषोश्च संनहनं कुर्यात्। तत्रादौ रज्जुनिर्माणप्रकारं स्वयमेवाह। अथ रज्जुं
प्रकुर्वीत त्रिसंधित्रिवृतां कुशैः। स्याद्रज्जुकरणे पूर्वं सव्यः पाणिरिहोत्तरः॥२३॥ पश्चाद्दक्षिण
इत्याह जयंतः स्वनिबंधने। अस्यार्थः। षट्त्रिंशद्दर्भपक्षे दर्भद्वयं द्वाभ्यां हस्ताभ्यामादाय कुशाम्
ले स्वाभिमुखीकृत्य कुशाग्रपूर्वतः कृत्वा यदावेष्टयेत्तदा वामपाणिरुपरि दक्षिणपाणिरधो भव
ति। एवं अष्टभिः कुशैः द्विपिंजूलां संधिं विधाय पुनश्चतुर्भिः कुशैः नामवरज्जुं त्रिसंधिर्यथा स्यात्त
था वेष्टयेत्। एवं द्वादशभिर्द्वादशभिः कुशै रज्जुत्रयं निष्पाद्य पुनस्ताभिरेव त्रिभिः त्रिवृतां नामवरज्जुं
कुर्यात्। तन्मेलने दक्षिणः पाणिरुपरि भवति। इति जयंतनिबंधने उक्तमस्ति। एवं एका रज्जुः षट्त्रिं
शद्दर्भपिंजूलैर्भवति। तथा च गृह्यसंग्रहे। षट्त्रिंशद्दर्भपिंजूलैः कुर्याद्रज्जुं त्रिरावृतां। इति। अत्रा
क्तविषये शौनकः। त्रिसंधित्रिवृतां रज्जुं कुर्याद्द्वादशभिः कुशैः। पिंजूलं नाम कुशापत्रं। पिंज
लं कुशापत्रं स्यादिति विश्वलोचनः। रज्जुं संपाद्य किं कुर्यादित्याह। निदध्यादुदगग्रां तां रज्जुम
ग्रत आसनः॥२४॥ कुशमुष्टिं छिनत्यस्याः प्रागग्रां तां निधाय च। तया बर्हिर्द्विरावेष्ट्य तुम

लं च वेष्टयेत्॥२५॥ पूर्वया वेष्टितान्तस्या अधस्तात्तानयेदथेति। अस्यार्थः। ततस्तामेव रज्जुमास
न अग्रतः उत्तराग्रां निदध्यात्। स्थापयेत्। ततः कुशमुष्टिं गृहीत्वा यज्ञसामग्रीसंपादकेन शस्त्रे
णाच्छिनत्ति। ततोऽस्यामेव रज्ज्वां छिन्नां कुशमुष्टिं प्रागग्रां निधाय तया रज्ज्वा बर्हिषः द्विरावेष्टनं। पश्चा
त्तयैव रज्ज्वा रज्जुमूलमपि द्विर्वेष्टयेत्। बर्हिषः प्रथमवेष्टनावच्छिन्नाया रज्ज्वा अधस्तात् द्वेष्टनादवशि
ष्टं। तां प्रागग्रां नयेदित्यर्थः। बर्हिःसंनहनानंतरं किं कर्तव्यमित्याह॥१॥ निधायोपरि बर्हिस्तु परि
स्तरणादिसिद्धये इति॥२६॥ अस्यार्थः। ततः परिस्तरणादिसिध्यर्थं अन्यांश्च कुशानपि बर्हिषः
उपरि निधाय कस्मिंश्चिच्छुद्धप्रदेशे तं स्थापयेत् भूमौ। अनंतरं इध्मसंनहनार्थं अपरां रज्जुं
निदध्यादित्याह। छित्वान्यां पूर्ववद्रज्जुं निदध्यात्तां च पूर्ववत्। अस्यार्थः। अन्यां रज्जुं पूर्वदर्शितेनैव
रीत्या कृत्वा तथैवाग्रतः इध्मबंधनार्थं रज्जुं स्थापयेत्। तथैवेति पूर्वरज्जुवत्॥ ॥इध्मस्वरूपमिध्म
बंधनं चाह। जयंतमतानुसारेण। द्विःप्रादेशो नवदिध्म एकविंशति दारुकः॥२७॥ पालाशखा
दिरो वा स्यात्तं प्रागग्रं निधाय च। शमीपिके कृतं ग्राह्यमनयोर्यद्यसंभवः॥२८॥ वेष्टयेत्सकृदेव
ध्मं बध्वोपरि निधाय च। जयंतमतमत्रोक्तं वक्ष्ये वृत्तिकृतो मतं इमिति॥२९॥ अस्यार्थः। तत्र र
ज्जोः परिवक्ष्यमाणलक्षणं प्रागग्रमिध्मं संस्थाप्य तयैव रज्ज्वा सकृद्वेष्ट्य बध्वा। अवशिष्टार

Indira Gandhi National
Centre for the Arts

त्रिवृद्वेष्टना वलितायारज्जोरर्धस्ता त्रयेदित्यर्थः। तथैवोपरिष्टादुद्धप्रदेशे स्थापयेत्। न त्वमाविसर्थ
:। बर्हिषस्तु द्विर्वेष्टनं इध्मस्य सकृदेव वेष्टनमिति विशेषः। इध्मस्वरूपमाह। पालाशखदिरयो
रन्यतरयोर्यज्ञवृक्षयोः शलाका प्रादेशद्वयपरिमिता दीर्घो ग्राह्या। एवमेकविंशति संख्या मिलिताश्चे
दिध्मो भवति। पलाशखदिरयोरसंभवे शमीवैकंकतं वा ग्राह्यं। अथवा दिक्क्रमपि तथा च मरीचि
:। पलाशखदिराश्वत्थः शमी वटउदुंबरः। अपामार्गार्कदूर्वाश्च कुशाश्चेत्यपरे विदुः। दशाद्वादश
वा तुल्याः समाः पंचदशाः स्मृताः। नात्यंगुष्ठाः सत्वचश्च सार्द्रा इह होत्तमा इति॥ ।। स्मृत्यर्थसारे॥ ॥
आद्रा पञ्चाशमच्छिद्रास्त्वक्तं जेनेंगुलिवर्तुलाः। अपाटिता अद्विशाखाः क्रिमिदोषविवर्जिताः। ईदृशा
होमये प्रोक्ताः प्राप्नाति विपुलां श्रियं। व्यासः। विशीर्णायुः स यं कुर्याद्विदला व्याधिसंभवं। ऊर्ध्व
याम्यत्रमाप्नोति वक्रा विघ्नकरी तथा। पाटिता दूरतेल स्मी कृशा बांधवहानि कृत्। द्विशाखा मैत्र
हानिश्च फली वडष्टार्थनाशनी। द्वेषं प्रकुरुते दीर्घा प्राणघ्नी वित्वचा स्मृता इति। एवं जयंतमतमु
क्त्वा इदानीं वृत्तिकृन्मतं वक्तुं प्रतिजानीते। वृत्त्ये वृत्तिकृतो मतमिति॥ ॥ इतिव इध्मबंधनं कार्यं मंत्र
स्यात्रोहइष्यते। अरत्न्यायामइध्मस्यास पंचदशदारुकः॥३०॥ एतच्च वृत्तिकारेण शांतिक १०

र्मणि साधितं। अस्यार्थः। जयंतमते एकविंशतिदारुक इध्मो निरूपितः। वृत्तिकृन्नारायणमते तु
पंचदशदारुक इध्मो भवति। अत्र पक्षे आयामप्रमाणं अरत्निमात्रं। अत्र इध्मस्य बंधनं स्यैव दृष्टिव
त्कार्यं समंत्रकमित्यर्थः। श्रौते कर्मणि समंत्रकं बंधनं तद्दर्शापि भवति। अत्र मंत्रस्याप्यूहो भवति
। ऊहो नाम प्रकरणानुसारिक ... पदांतरप्रक्षेपः। कुत्रचित्पदपरित्यागः। तत्र लोपो भवति
। अलाभे यथोत्तरा। इध्मस्यायामे प्रादेशमात्रं परिमाणं। तथा च शौनकः। आयामेनेध्मस्मिधः
प्रादेशाद्वयमुच्यते। वितस्तिमात्रमथवा संख्यया चैकविंशतिः। किं च। वृत्तिकारेण इध्मसंख्या
विकल्पेन इध्मबंधनमपि समंत्रकमित्यस्मिन्विषये तन्मंत्रस्याप्यूहविस्त्रत्रे शांतिकर्मविवरणे वेसा
धितं स्वशास्त्रानुसारेण सर्वं प्रतिपादितमित्यर्थः। यदा श्रौतकर्मणि इध्मबंधनं। एकविंश
तिधा संभरामीति तत्र हन मंत्रे संख्याश्रूयते। मंत्रस्याति देशात्साकल्येष्वपि भवति तु ह
ः पंचदशदारुकपक्षे तु लिंगानुपपत्तेः मंत्राभावाद्गुहः कर्तव्य इत्यनेन। पंचदशधा संभरा
मीति तत्रैव शांतिकर्मणि परिधयो भवंति न वेति विचारः कृतः। इध्मस्ताव शांतेमीमयात्र विहि
तः। तथा परिधयोपि। दर्शपूर्णमासयोश्च इध्मपरिधी नामकद्वयं दृष्टांत थाचसूत्रं। शमी

Indira Gandhi National
Centre for the Arts

मयमिध्मं चासीमप्यारणीपरिधीश्चेति। पार्वणे तु परिधयो नैव संति। तस्मादितरेष्वपि पाकयज्ञे
षु नैव संति। अत्र परिधीनामाचार्येण विनियोगानुक्तेश्च। आपस्तंबेनोक्तं रक्षोहननार्थं परिध
यो भवंतीति। अस्मच्छाखायां नोक्तं। पूर्णपात्रेण वरक्षोहननं भविष्यतीति। आपा वै रक्षोघ्नीः
रक्षसामपहत्या इति श्रुतेः। रक्षोहननं तु परिधिकार्यं तत्पूर्णपात्रेण कृतमिति न परिधयउपा
देया इति। अतः अस्मच्छाखायां पंचदशदारुक एवेध्मः। तद्बंधनमप्यमंत्रकं। तदुक्तावान्याप्युद्
देयादिति। अतः अस्मच्छाखायां पंचदशदारुक एवेध्मः। तद्बंधनमप्यमंत्रकं। तद्धावा नाप्युद्
तिः। अत्र पुनः इध्मबंधनविस्रंसनादीनामनआह। विस्रादयस्कनेछंति मंत्रसन्नहने तथाः॥३५॥
इच्छस्य वजयंतस्कमंत्रमूहनं चेति। अस्यार्थः। एतयोरिध्माबर्हिषोः संनहने बंधने विस्रा
दयआस्वापोः मंत्रं नेछंति॥ इच्छ अमंत्रकमेवात्र बंधनमित्यर्थः। जयंतस्कमंत्रमिछंति तु
हने छंति। दर्शपूर्णमासयोरन्वाधानानंतरं इध्माबर्हिषो बंधनं कृत्वा उपरिस्थापनं त
वति। तथैव परिस्तरणकुशानामपि स्थापनं भवति। अनिरपि। पूर्वेद्युरिध्माबर्हिः करो ११
तीपापस्तंबे। अन्वाधानानंतरं उक्तप्रदेशे यज्ञादिसामग्रीं संस्थाप्य किं कुर्यादित्याह। १२
भुंजीयातामहन्येव मांसमाषादिवर्जितं॥३२॥ निरुपधस्थ्यपयीयानां दंपती मैथुनं चेति।

अस्यार्थः। इष्टिपर्यंतं दंपत्यो नियमा भवंति। हविष्यभोजनं बहुभाषणप्रतिनसंभाषणराहित्यं
अधःशयनं ब्रह्मचर्यं। एवं दर्शव्रतं पौर्णमासव्रतमाचरेत्। व्रतलोपे परेद्युः यागसाहित्येन व्र
तपतेरिष्टिः कर्तव्या भवति अथवात्र कारिकायां प्रायश्चित्ता। धिकरणे। प्रायश्चित्तं तु स्थाने
पूर्णाहुति प्रतीष्यते। आज्यं द्वादशाहुतस्रुग्गृहीत्वा पूरयेत्स्रुचं। तया पूर्णाहुतिः कार्या सा
पूर्णाहुतिरिष्यते। दारि इ विजयेतु। स्रुक्पूर्णाहुतिर्नोस्यादिति केयाज्ञिका विदुः। स्रुवमेव आ
ज्यपूर्णं कृत्वा तेनैव होम इत्यर्थः। आज्यभागानंतरं पूर्णाहुतिहोमः अग्नये व्रतपतये स्वाहे
ति। स्रुवहोमपक्षे पिसमानं। आवां दंपतीयागव्रतलोपजनितप्रत्यवायपरिहारार्थं पूर्णाहु
तिं करिष्याव हे। अथ पागादि न कृत्यमाह॥ ॥अपरेद्युर्हुते प्रातः परितस्त्रिः समूह्य च॥३३॥पा
णिनासोदकेनाग्ने समंतात्परिमार्जनं। न समूहनमंत्रे छंजयंतवन्नवंनयथेति॥३४॥ अस्यार्थः।
प्रातःकाले हुते नित्यहोमानंतरं कर्मांगहविरासाद्य उक्तेपीठे उपविश्य प्राणानायम्य प्रारब्धं
स्थालीपाकं करिष्य इति संकल्प्य तत स्थालीपाकाग्न्यतं त्रिः परिसमूहनं कुर्यात्। वारत्रयं कु
र्यादित्यर्थः। न समूहनस्वरूपमाह। अग्नेः समंतात्सोदकेन पाणिना परिमार्जनं। ~~पुनर्दि~~ किरण

उदकं गृहीत्वा स्थंडिलाद्बहिः अंगुल्यग्रैरग्रैः संमार्जनाच्चतुर्दिक्षु परिमार्जनं शुद्धीकरणमित्यर्थः।
अत्र दर्भैः समूहनमिष्टं। तथाच शौनकः। उच्यते सुसमिद्धस्य सोदकेनैव पाणिना। प्रदक्षिणं त्रिः
प्रमार्ष्टि एतत्परिसमूहनमिति। आदौ परिसमूहनं तस्माद्बहिः परिस्तरणं तस्माद्बहिः पर्युक्षणं त
स्माद्बहिः रलंकरणमिति। यथा जयंतभट्टेन तथोच्यते। पूर्वं परिषेकोऽन्तः सर्वत्रास्त्रिरंभसा। उदक
संस्था सर्वदिक्षु प्राच्यादिषु परिस्तृतिरिति। अस्यार्थः। सर्वस्मिन् होमे पर्यूहनं परिसमूहनं प
रिषेकः प्रोक्षणं तौ भवतः। अंभसा सोदकेन पाणिना त्रिस्त्रिरिति वारत्रयं वारत्रयं भवति। अर्था
दीशानीदिशमारभ्य पर्यूहनपरिषेको भवत इत्यर्थः। तथाच स्मृत्यंतरे। पाणिनोदककरूप प्राच्यादि
षु दिक्षु प्राचीमारभ्य सर्वासु दिक्षु परिस्तृतिर्भवति सा परिस्तृतिः उदक्संस्था उत्तरतः संस्था अ
त्रैव स्थितिः प्राप्नोतीत्यर्थः। परिस्तरणानंतरं ब्रह्मवृत्कर्मवत् अनुब्रह्मासनार्थं अग्नेर्दक्षिणतः यत्तिय
पीतकुशानास्तीर्य पात्रासादनार्थं च पश्चात् पर्युक्षणं भवतीति वक्तुमाह। कांश्चिदुत्तरतो दर्भाना १२
स्तीर्य परिषिंचति। अस्यार्थः। पात्रासादनार्थमनेषां कुशानामुपयोगः परिस्तरणसमये एवउ
त्तरतः कुशानास्थाप्याः पश्चात्परिषेचनमिति। परिस्तरणे शौनकोऽविशेषमाह। प्रादेशमात्रे दर्भौ

ऽग्रे बर्हिर्मात्रे रथापि वा। परितोग्नेरास्तरणं परिस्तरणमुच्यते। प्रादेशमात्रे बर्हिर्मात्रैश्च परिस्तरण
प्रकारः शौनकेनोक्तः। यद्वा प्रादेशमात्रास्तु चतुर्भिस्तृणमुष्टिभिः परिस्तृणीयात् प्राक्पश्चाच्चतुर्दिक्ष
यथाक्रमं। पुरः पूर्वो दक्षिणतः पश्चादुत्तरतः क्रमात्। उदक्संस्थं दिशि दिशि दक्षिणोत्तरयोस्तृणैः नै
रृत्यैस्तीर्यमाणानां तृणमूलानि छादयेत्। अस्यायमर्थः। प्रादेशमात्रकुशास्तरणपक्षे प्रादेशमा
त्रैश्चतुर्भिः कुशमुष्टिभिः प्रागग्रैरेव पूर्वेण आरभ्य यथाक्रमं चतुर्दिक्षु परिस्तृणीयात्। परिस्तर
णं कुर्यादित्यर्थः। आदौ पूर्वभाग आस्तरणं। तद्दक्षिणत आरभ्य उदक्संस्थं प्रागग्रं। एवं दक्षिणभा
गे आरंभे क्रियमाणे दक्षिण आरभ्य उदक्संस्थं तथाच सति प्रादेशमात्रकुशैरेव प्रादेशमात्रादी
घोन्मिरास्तरणा। अन्तः आस्तीर्यमाणानां मूलान्याच्छाद्य पुनरस्तथैवास्तरणं। एवं तावद्दर्भमास्त
रणं यत्र आरभ्य पश्चिमदिक्कुशास्तरणं भवति पश्चिमे तु यथा पूर्वभाग आस्तरणं तथेहापि
यथा दक्षिणे दिग्भागे तथोत्तरेपि ज्ञातव्यं। अत एव शौनककारिकायां दक्षिणोत्तरयोरित्युक्तं। दक्षि
णोत्तरयोरेव कुशमूलमाच्छाद्यास्तरणं। प्रागग्रत्वं तु सर्वत्र। अत्र परिषेकादेः प्रदेशक्रममाह का
त्यायनः। अंगुष्ठौलिमिते देशे परिषेचनमाचरेत्। नवांगुलिप्रमाणे तु विधिना परिधीन्परिस्तराद

Indira Gandhi National
Centre for the Arts

त्रांगुलि प्रमाणेनुपरिस्तीर्य कुशान् क्रमात्। एकादशांगुले देशे गंधपुष्पासनादिभिः। अथ दीर्घ कु
शास्तरणपक्षे पुनः शौनकः। चतुर्दिक्षु यथा दीर्घैः पूर्वपश्चिमयोर्दिशोः। उदगग्रैरितरयोः प्रागग्रैर्य
ज्ञियैस्तृणैः। तृणैः स्तीर्यमाणेभ्यः पूर्वपश्चिमयोर्दिशोः। उदगग्रैरास्तरणे। दक्षिणोत्तरा[illegible]ध
स्ताद् उत्तराणि तु। अस्यायमर्थः। दीर्घकुशास्तरणपक्षे तु पूर्वपश्चिमयोरुदगग्रैः = स्तु = रास्तरणाद
क्षिणोत्तरयोः प्रागग्रैरेवास्तरणं। अत्र पूर्वपश्चिमयोर्दिशोः आस्तरणे क्रियमाणे दक्षिणानि द
क्षिणस्थितानि यज्ञियतृणानि उत्तराणि उपरिस्थितानि भवंति। उत्तराणि उत्तरभागस्थितानि अ
धस्ताद् भवंति एवं सति मूलमा[illegible]द्य आस्तरणमुक्तं भवति। आस्तरणसमय एव पात्रासादनार्थं च
द्केरुत्तरतः कियत्ता कुशास्ता प्याः। तथा च शौनकः। ऋत्विग्ब्रह्मा च तस्याग्नेर्दक्षिणतस्तृणैः। त
दासनार्थं प्राक्तैस्तृणानां मुष्टिसंमितैः। प्रणीतासादनार्थं च पात्राणां सादनाय च। संस्तीर्योत्तर
तो वह्नेः पर्युक्षेत् कुशानिति॥ परिसमूहनाद्यनंतरं किं कुर्यादित्याह। दर्भेषूत्तरतो द्वंद्वं पात्राणि
न्यक्विसादयेत्॥ २ ॥ ध्यानक्रमं भगवान् आह श्लोकेनैकेन मंत्रवित्। अस्यार्थः। आस्तरणसमय एव १३
अग्नेरुत्तरत आस्तृतेषु दर्भेषु द्वंद्वं पात्रे गृहीत्वा वक्ष्यमाणक्रमेण सर्वाण्यपि पात्राणि न्याग्विला

१भा.लं.

न्यासादयेत्। तत्क्रमं आसादनक्रमं मंत्रविन्नारायणः एकेनैव श्लोकेनाह। स्थाली चरोः प्रोक्षणं च दर्वी
स्रुवो सादयदर्विहोमे। पात्रं प्रणीतार्थमथाज्यपात्रमिध्मक्रमेणात्र महित्वशिष्यात्। अस्यार्थः। चरुः
स्थाली प्रोक्षणपात्रं च आदावेव तदुभयमपि क्रमेण दक्षिणवामपाणिभ्यां पृथक् पृथक् युगपत्
गृहीत्वा स्रुजे कुर्वन्नासादयेत्। तथा दर्वी स्रुवो गृहीत्वा आसादयात् दर्विहोमे दर्व्या होमो यत्र त
त्र दर्व्या आसादनं भवति। प्रणीताप्रयोजकं पात्रं प्रणीतापात्रं आज्यपात्रं च गृहीत्वा तथैव
आसादयेत्। हेक्रवित क्रमः उक्तक्रमेण द्वंद्वं कुर्वीत इध्मसहदर्विस्रवसह आसादं। तथा च शौ ८
नकः। तृणोपघोसुरवान्येषु युक्तपात्राणि सादयेत्। अग्न्येध्यसाधने साधे प्राक्संस्थानि य
थाक्रमं स्रुवप्रोक्षयोः पात्रे स्रुक्स्रुवं तथैव च। प्रणीतापात्रमाज्यस्य पात्रेणेध्मं च बर्हिषेति।
अन्यदपेक्षितं प्राग्वासादयेत्। शूर्पकृष्णाजिनाद्यन्यदपेक्षितं प्राग्वासादयेत्॥ ३ ॥ अस्यार्थः। उत्त
रदिग्भागे शूर्पकृष्णाजिनादिकं प्रयोजनतः प्राप्तं यज्ञोपयोगि सर्वं संपादयेत्। प्रोक्षणादीनां सव
नादिकार्यार्थं पवित्रापेक्षायां पवित्रलक्षणमाह॥ ॥ अनंतरजातकुशौ या = दि = तु कुशौ प्रादेश
मात्रौ समौ। अनखच्छिन्नौ साग्रौ तौ पवित्रे अभिधाय कावितौ॥ ४ ॥ ॥ अस्यार्थः॥ ॥ नखैर्
समितौ। अनखच्छिन्नौ साग्रौ तौ पवित्रे अभिधाय कावितौ॥

Indira Gandhi National
Centre for the Arts

तेअंतःमध्येनतरुणौगर्भेकुशौययोस्तौतथोक्तौ।अनखच्छेदिनौनखैःकृत्वामूलच्छेदोनविद्यते
ययोस्तौ।नखच्छेदोनकर्तव्यःकिंतुदंतोत्साटनसाधनेनैवानतुकाष्ठशस्त्रादिनाशस्त्रेणतु
नवद्याधिःकाष्ठाद्यायोविनश्यतीतिदोषश्रवणात्।प्रादेशसमितौप्रादेशपरिमितौसाग्रौतौ
दर्भौकुशापवित्रार्थंसंपादनीयौ।समित्पवित्रंवेदश्चनवेत्प्रादेशसंमितः।वेदार्भेस्तुष्टिः।अत्रो
पयुक्तपात्रलक्षणमुच्यते।स्मृत्यर्थसारे।शमीमय्यःस्रुवःकार्यःसद्योवाभूर्जवृक्षजाः।तदभावेय
थालाभमन्ययाज्ञिकवृक्षजाः।खादिरोमुसलःकार्यःपालाशस्यादुलूखलः।संग्रहे।मृन्म
यान्त्वपात्राणितैजसान्यश्ममयानित्वासर्वेषामेवपात्राणांतीरवःशुक्तिश्चत्वास्यनोतयोश्चवारख
उत्कृष्टोगर्हणीयायज्ञकर्मणि।दारवाणित्वकार्याणियथाम्नायानुरूपतः।प्रशस्तेपूर्णपात्रा
र्थेदारकांस्यामयेमखे।खादिरेणस्रुवःकार्यःपलाशेनजुहूर्भवेत्।तत्प्रदेशादिकोस्यात्तासुन्ये
र्वीयज्ञियेर्द्रुमैः।तदलाभेपलाशस्यपर्णाभ्यांहूयतेहविः।पलाशपर्णाभावेतुपर्णैर्वापिप्पलोद्भवैः
पलाशस्यमध्यपर्णंप्रशस्तं।पवित्रसंपन्ननंतरंकिंविकुर्यादित्याह।उत्तानप्रोक्षणार्थेयोनिन
येत्सपवित्रके।पवित्राभ्यांत्रिरुत्पूतैः।त्रिःप्रोक्ष्याधोबिलानितु॥४०॥अस्यार्थः॥ ॥सर्वेषांय १४

ज्ञपात्राणांमध्येप्रथमंप्रोक्षणमेव।अर्थःप्रयोजनंयस्यतत्प्रोक्षणार्थंतदुत्तानंकृत्वाउक्तेनपात्रेसंस्था
प्यत्रयोनिनयेत्।जलेनपूरयेदित्यर्थः।प्रोक्षणपात्रंपूर्णपात्रादधिकतरंकार्यं।यथाप्रोक्षणो
दकेनपूर्णपात्रस्यपूरणंभवति।पवित्राभ्याममंत्रकमुत्पूयत्त्रिः।त्रिःसत्तेनुदकेसर्वाण्यथप
ताणिपात्राणितुर्ध्वतिलानिउत्तानानिकृत्वाप्रोक्षयेत्।तथाचशौनकः।कृत्वापवित्रेआसिच्य
वारिप्रोक्षणभाजने।उत्पुनीयात्पवित्राभ्यामपस्तत्त्रीत्रिरेवतु।अंगुष्ठानामिकाभ्यांतुपाण्यो
रुत्तानयोःपृथक्।गृहीत्वामूलतस्ताभ्यामित्युत्पवनमुच्यते।उत्पवनलक्षणमपिशौनकेनो
क्तं।प्रोक्षणानंतरंकिंकर्तव्यमित्याह।विस्रस्येध्मंचमसंसपवित्रमतःपरापूरयित्वाजलेस्त
त्रगंधपुष्पाणिचावपेदिति॥४१॥अस्यार्थः॥प्रोक्षणात्प्रागेवेध्मंचविस्रस्य।विस्रसनंग्रंथिनः
श्लथीकरणंइध्मग्रंथिश्लथीकरणानंतरंसर्वेषांपात्राणांइध्मादिनासहत्रिःप्रोक्षणंभवति
।प्रोक्षणानंतरंचमसंप्रणीतापात्रंसपवित्रंकृत्वाततःप्रोक्षणपात्रस्थितेनोदकेनापूर्यगंधपुष्पा
णिप्रक्षिपेत्।अनंतरंकार्यमाह॥ ॥ब्रह्मन्नपःप्रणेष्यामीत्याहब्रह्मायदाभवेत्तानीतानि
न्नासिकांदध्यमुदगग्रेनिधायच॥४२॥दर्भैःप्रच्छादयेत्पात्रंपूर्णपात्रंतदुच्यते।अस्यार्थः॥

दक्ष ब्रह्मणो नित्यत्वं धन्वंतरिमरक्ष्य शूलगवेच अन्यत्र च कृताकृतत्वं यत्र च ब्रह्मास्यात्तदा यजमा
नः (नासिकाद् ऊर्ध्वं नासिकाप्रमाणं नी) गंधपुष्पाक्षतसहितं जलपूरितं सपवित्रं प्रणीतापात्रं
यजमानः नासिकाद् ऊर्ध्वं नासिकाप्रमाणं नीत्वा ब्रह्मन्नपः प्रणेष्यामीति प्रश्नरूपं प्रेषमाह। वदे
त्तावद् ब्रह्मा ॐ प्रणय सुक्तिं श्कलात् अग्नेरुत्तरतः स्थापयेत्। यत्र पूर्वं स्थापितमासीत् तत्रैव स्था
पयेदित्यर्थः। ततः अन्यैर्दर्भैः छादयेत्तत्पूर्णपात्रमित्युच्यते। अनित्यत्वाद्यदि ब्रह्मा नस्यात्तदा तत्प्र
णीतापात्रं नासिकांतमुत्थाप्य अग्नेरुत्तरतो निधाय दर्भैः प्रच्छाद्य पवित्रे गृहीत्वा तत्पवित्रद्वयं शू
र्पे स्थापयेत्। अत्रापः प्रणयने कारणं श्रूयते। अपः प्रणयति आपो वै रक्षोघ्नीः रक्षसामपहत्याइ
ति। शौनकगृह्यपरिशिष्टोक्त ब्रह्मवर्णप्रकारोऽस्माभिः परिभाषायां विविच्युता। प्रणीताप्रण
यनानंतरं किं कुर्यादित्याह। पवित्रांतर्हिते शूर्पे व्रीहिमुष्टिचतुष्टयं ॥४३॥ निर्वपेदग्नये त्वादिमंत्रे
ण। वर्जयेच्च तं। निर्वपेदपरं त्वग्नीषोमाभ्यां त्वेति मंत्रतः॥४४॥ पवित्रांतर्हितान्व्रीहीन्प्रोक्षेन्निर्वा
पसंख्यया। पूर्वमंत्रद्वयेनैव प्रोक्षामीति विशेषणमिति॥४५॥ अस्यार्थः॥ ॥ततः प्रणीतापा १५
त्रास्थितं पवित्रद्वयं शूर्पे प्रागग्रं निधाय निर्वपणं कुर्यादिति। अग्नये त्वा जुष्टं निर्वपामीति मं

त्रेण व्रीहिमुष्टिचतुष्टयं निर्वपेत्। अग्नीषोमाभ्यां जुष्टं निर्वपामीति मंत्रेण चतुर्वारं व्रीहिमु
ष्टिचतुष्टयं निर्वपेत्। एवं अष्टसंख्याकमुष्टयो निर्वपेरन्। दर्शे तु अग्नये त्वा जुष्टं निर्वपामीति
समानं। अग्नीषोमाभ्यां स्थाने इंद्राग्नीभ्यां त्वा जुष्टं निर्वपामीति निर्वपेत्। एतावानेव विशेषः।
अन्यत्समानं। अत्र प्राधान्यं व्रीहीणामेव। पवित्रांतर्हितान्व्रीहीन् पवित्रद्वयं व्रीहीणामुपरि
कृत्वा प्रोक्षणपात्रोदकेन तान्प्रोक्षयेत्। निर्वापे या संख्या सा प्रोक्षणेपि भवति। प्रोक्षणे निर्वा
पमंत्रस्यैव तु ऊहः। निर्वपामीति पदे प्रोक्षामीति निर्वदेत्। इतरत्समानं। संग्रहकारः। उत्तानेन तु ह
स्तेन कर्तव्यं प्रोक्षणं भवेत्। अवाचीनेन हस्तेन कर्तव्यं स्यादवोक्षणं। मुष्टीकरोति यत्तोयमभ्युक्ष
णमिति त्रिधा॥ ॥निर्वापप्रोक्षणानंतरं कर्तव्यमाह॥ ॥पूर्वग्रीवोर्ध्वलोम्नि स्यात्कृष्णाजिन
उलूखले। व्रीहीनावप्यावहत्याशु त्रिः शुक्लीकृततंडुलान्॥४६॥ त्रिः प्रक्षाल्य पचेदाज्यमासि
च्य सपवित्रके। अस्यार्थः॥ ॥ पूर्वग्रीवा यस्य तत् पूर्वग्रीवं प्रत्यग्ग्रीवोर्ध्वलोम्नि स्यादिति पाठांतरं
। किंच ऊर्ध्वलोमस्य तन्मात्रे एतादृशे कृष्णाजिनोपरि उलूखले स्थापिते सति तस्मिन्संस्थि
तान्व्रीहीन्स्थापयित्वा पत्नी अवहन्यात्। आशु शीघ्रमेव यथा यागस्य तीतकालो न भ

Indira Gandhi National
Centre for the Arts

वति। ततः त्रिषु व्रीहितानां शूर्पेण तंडुलकणापनयनं कृत्वा मुसलेन त्रिवारं कंडनीयाः यथा उज्वला
स्युस्तथा नितरां दृत्वान् तंडुलान् त्रिः प्रक्षाल्य स्थाल्यां निक्षिप्य अग्नौ पचनेन पाकार्थमग्नौ स्थालीं स्थाप
येदित्यर्थः। पचननियममाह बौधायनः। नाश्रुतं न विश्रणं वा व्यक्तं दैर्गतकं जिकं। व्रीहिप्रक्षणा
नंतरामेव पवित्रद्वयमाज्यपात्रे स्थापयेत्। नाद्वतोपात्रे आज्यमासिच्य प्रक्षिप्य संस्कारं कुर्यात्
।तत्प्रकारमेव कथयति। अपोह्योत्तरतोंगारान् तेष्वधिश्रित्य तत् हुतां॥४७॥ अधिश्रितमवज्वा
ल्य दर्भाग्रद्वयमस्यति। तेनैवज्वलताज्यं त्रिः पर्यग्निकरोत्यथेति॥४८॥ अस्यार्थः॥ अग्ने
रुत्तरतः अंगारानपोह्य अग्निप्रदेशाद्भिन्नप्रदेशे आज्याधिश्रयणयोग्यानंगारानादाय तदुप
रि तदाज्यपात्रं संस्थाप्य तत्रास्थितमेव आज्यमेव पात्रं अवज्वल्य। अवज्वलनं तु दर्भैः ये तृणपका
ष्ठादिकालेन वा कार्यं। तदवज्वलनं यद्दर्भो द्विज्वलनो स्यात्तेन उल्मुकेन आज्यस्पर्शानंतरं तस्मिन्नेवा
वज्वलनसमये दर्भाग्रद्वयमाज्ये प्रक्षिपेदिति। तेनैव ज्वलतोल्मुकेन आज्यं वरुणा सह त्रिः पर्य
ग्निकरणं करोति परितः त्रिरग्निकरणं उल्मुकनयनं। पर्यग्निकरणानंतरं किं कर्तव्यमित्याह। क
र्षन्निवोदगुद्वास्य अंगारान् निरस्य च। अंगुष्ठोपकनिष्ठाभ्यां पवित्रेते असंहते॥४९॥ गृ १६

हीत्वोत्तानपाणिभ्यां त्रिः प्रागुत्पूय तद्धुतं। सवितुष्ट्वेति मंत्रेण सकृत्तूष्णीं द्विरिष्यते॥५०॥ अस्यार्थ
:॥ ॥तदाज्यपात्रं कर्षन्निवोदगुद्वास्य अंगारप्रदेशान् उत्तरतः कर्षन्निव भूमेः सकाशात् अनुत्थाप
यन्नेव संघर्षयन्नुत्तरतः स्थापयित्वा तानेवांगारान् निरस्य पुनर्यथापूर्वमेकीकृत्य उत्पवनं कुर्यात्
आज्यपात्रस्थितेन पवित्रे अमिलिते कृत्वा अंगुष्ठानामिकाभ्यां उत्तानपाणिभ्यां तयोः पवित्रयोर
मिलितयोः उत्तराग्रयोः आद्यंतप्रदेशसमुत्पवनयोग्यं यथा स्यात्तथा गृहीत्वा सवितुष्ट्वेति मंत्रेण
तद्धुतं सकृदेकवारं उत्पवनं कुर्यात्। उत्पवनं नाम आज्ये पश्चिमभागात् पूर्वाभिमुखं यथा स्या
त्तथा पवित्राभ्यां दोलनमित्यर्थः। एवं वारद्वयमपि तूष्णीमेवोत्पवनं भवति। अत्र भगवान्। आज्यस्था
लीं समादाय आज्यं तस्यां निक्षिप्य च। उदगग्रेर्निरूढेषु लेंगारेषु समस्मसु। अधिश्रित्याविला
प्येते देवज्वलज्ज्वलत्तृणैः। आज्ये प्रत्यस्य दर्भाग्रे अंगुष्ठपर्वमात्रके। पुनर्ज्वलद्भिरेतैस्त्रिस्तृणै
:परिहरेत्सह। उदनादिहविर्भिश्च संत्विचेदितरेरिति। अद्भिरेतानि संप्रोक्ष्य प्रहरेत्त्याग्नावुदके
त्वान्। उद्वास्याज्यमथांगारान् प्रत्यूह्यापः स्पृष्ट्वा पुनः। तान्याज्यं त्रिरुत्पूय पवित्राभ्यां यथा
विधि। तून्मंत्रेण द्विस्तूष्णीमग्नौ ते संप्रहरेदिति। अत्रोक्तो निरूदश्चार्थः स्मृतदीपिका
स्या
स

Indira Gandhi National
Centre for the Arts

यमुदीरितः। निरूढस्याद्विनकोग्निर्यः परिस्तरणाद्बहिः। अनिरूढः स वैवह्निर्यः परिस्तृनिश्चयः।
यत्तु केश्चिदुच्यते। अग्नेरुत्तरतोंगारान्निरूह्याज्यस्य संस्क्रियां। कुर्यात्तदिस्त्रृतेरर्वाकृतपरिस्तरणा
द्बहिरिति तदेतत्कर्मविशेषे ज्ञातव्यं। अवृज्वन्कुशानद्भिः संप्रोक्ष्य प्रहरेत्। पर्यग्निकरणत्तृण
निरसने विशेषमाह। संग्रहकारः। पर्यग्निकरणाद्यग्निमनिरूढाय दाहरेत्। वहिर्निरस्यत्त
त्तृणं निरूढाद्यदियोजयेदिति॥ ॥उत्पवनानंतरं पवित्रद्वयं किं कुर्यादित्याह॥ ॥कृताज्योत्पवने
प्रोक्ष्य पवित्रे प्रास्य चानले अनलात्पश्चिमास्तीर्णे बर्हिष्याज्यं निधायतदिति॥५१॥ ॥अस्यार्थ
ः॥ ॥कृतमाज्योत्पवनं च माभ्यां ते पवित्रे प्रोक्षणपात्रोदकेन प्रोक्ष्य अग्नौ प्रक्षिप्य तदाज्यपात्रं
वह्नेः पश्चिमभागे बर्हिरास्तीर्य इध्मेन सह यस्य बर्हिषः आसादनं कृतं तस्यैवास्तरणं कृत्वा तदुप
रि स्थापयेत्॥ ॥तथास्वशौनकः॥ ॥सपरिस्तरणादग्नेः पश्चात्संप्रोक्षिते स्थले। बर्हिः सन्नह
नीरज्जुमुदगग्रं निधाय च। तस्मिन्बर्हिषि संस्तीर्णे प्रागग्रे निहितं भवेत्। आज्यसंस्कारानंतरं
स्रुक्स्रुवसंमार्जनप्रकारमाह। प्रताप्य सकुशौ दर्वी स्रुवौ दर्वीं। निधाय च। स्रुवस्य बिलमग्रे
स्तु• पृष्ठमभ्यासमग्रतः॥५२॥ आरभ्य पृष्ठतो यावदुपरिष्टाद्बिलं भवेत्। कुशानां मूलतो दं १७

उमैकैकं त्रिर्मृजीत वै॥५३॥ प्रोदय प्रताप्य त्वासाद्य बर्हिष्युत्तरतो घृतात्। समृज्य तैः कुशैर्दर्वीमा
साद्योत्तरतः स्रुवात्॥५४॥ तान्कुशान्कृतसंमार्गान्प्रोक्ष्याग्नौ प्रहरेत्तथेति॥ ॥अस्यार्थः॥
दक्षिणहस्तेन दर्वीं स्रुवौ उभौ गृहीत्वा सव्येन कांश्चित्कुशानादाय सहैवाग्नौ प्रताप्य अनंतरं
दर्वीं बर्हिषि निधाय प्रथमं स्रुवसमार्जनं करोति। तत्प्रकारमाह॥ ॥स्रुवस्य बिलं कुशाग्रे
र्भ्रामयन् प्राक्प्रवणं पूर्वभागे बिलप्रदेशां कुर्वन् त्रिः संमृज्य कुशाग्रैरिति बहुवचनसामर्थ्या
द्वित्वसंख्यानिवृत्तिः। अर्थात्कुशत्रयाग्रेण शोधनं भवति। तस्यैव बिलस्य पृष्ठदेशमासानि
मुखं च प्रत्यक्प्रवणं तैरेव कुशाग्रैः संमृज्य तथैव तत्कुशामूलैः स्रुवस्याग्रतः। बिलपृष्ठदेशा
दारभ्य संमार्जितपृष्ठप्रदेशादन्यप्रदेशमारभ्य संमार्जितस्रुवबिलप्रदेशां तिकं दंडाकलि
तप्रदेशं कुशमूले मृजीत त्यर्थः। यावदुपरिष्टाद्बिलं तावद्दंडं त्रिः संमार्ष्टि। एकैकमिति वीप्सा
वचनादेकैकस्य प्रदेशमिति। तच्च स्रुवबिलं तत्पृष्ठं तद्दंडश्चेति। मृजीत मार्जनं कुर्यादित्य
र्थः। ततः स्रुवं प्रोक्ष्य पुनरग्नौ प्रताप्य बर्हिषि घृतपात्रादुत्तरतः स्थापयेत्। तैरेव कुशैस्तथै
व दर्वीं च संमृज्य स्रुवादुत्तरतः स्थापयेत्। कृतसंमार्गान्कृतसंमार्जनं येस्तेन तथा कांस्तान्

Indira Gandhi National
Centre for the Arts

प्रोक्ष्य अग्नौ प्रहरेत्। यथा पूर्वो ग्राजवंतिन तथा तान् प्रक्षिपेदिति याज्ञिकाः। तथा च शौनकः। ।अ
घादाय स्रुवं दर्वीं दक्षिणेन करणेनो। सव्येन दर्भानादाय संप्रोक्ष्याग्नौ प्रतापयेत्। संमृज्य
त्रिर्बिलं मूले दंड मध्येः स्रुवस्य तु मूले मूलेश्वर भोणांत् थाजुह्वा विधीयते। सहदर्भैः स्रुवं जुह्वो
प्रताप्य प्रोक्ष्य तान् कुर्यात्। प्रहृत्याप उपस्पृश्य हविरुत्कोना। भि घारयेदिति। स्रुक्स्रुवमार्जनानं
तरं कर्तव्यमाह॥ अ। भिघार्यैवं संवोदगुद्वास्यैव ततः परं॥५॥ अंतरेणाग्निमाज्यं च नीत्वासाद्य
बर्हिषि। आज्याद्दक्षिणतो देशे जयंतक्वनं यथेति॥५६॥ अस्यार्थः। स्रुवं भिघार्य उदगुद्वास्य
उत्तीर्य अग्निमाज्यं चांतरेण तयोर्मध्यप्रदेशेन नीत्वा बर्हिषि स्थापयेत्। बर्हिष्यपि कुत्र वा स्था
पनमिति संदेहे आज्याद्दक्षिणप्रदेशे स्थापयेत्। सहस्रपणपक्षे तत्र देवतानिमित्तं पात्रांतर
स्थापनार्थमवकाशात्यक्तात ततोपि दक्षिणतः स्थालीं स्थापयेत्। यथा चरुपात्राज्यपात्रयोरंतरा
लप्रदेशे स्रुच्छ्रणाय पात्रांतरावकाशोऽभवति तथैव स्थालीस्थापनं। चरुस्थाल्यो द्वासनानंतरं
अभिघारणमिति केचित्तु गृह्यसूत्रमधिकं पवंति। बर्हिष्यासाद्य प्रत्यभिघार्येति इति जयंत १८
वचनात्। अत्र नगरवान्। गृहीतोऽज्यं स्रुवेण वपश्च हविषि सेवनं। अभिघारणमित्याऽस्तथा

[illegible]

न्येषु हविःस्रुवा॥ ॥इति गुद्वासितं तस्मात्पुनरप्यभिघारयेत्। सहस्रपणपक्षे कुत्र पात्रांतरस्था
पनमित्यपेक्षामाह॥ ॥सहस्रपणपक्षे तु हविर्युद्धरणाय वै। निदध्यात्पात्रमितरं मध्ये च वीज्ययो
स्तनः इति॥५७॥ अस्यार्थः॥ सहस्रपणनामत्र अनेकदेवत्यश्चरुरेकस्यामेव स्थाल्यां पच्यते। तत्पक्षे
तु चरोराज्यपात्रस्य मध्ये प्रथमातिक्रमकारणाभावादिति न्यायेन आज्यात् दक्षिणतः समीपस्थि
ते पात्रे तयोर्मध्ये नीयपात्रासादनं। एवं च आज्यपात्रसमीपवर्त्ति चरुपात्रमनतिक्रम्य स्थापयेत्
। यदि अतिक्रम्य स्थापनं। तदा च वीज्ययोर्मध्ये स्थापनं तस्मात्। ततः किं कुर्यादित्याह॥ ॥अलं
कृत्याभिघारेध्ममाधाया यं तदुत्तरथ। स्रुवेणाज्यं गृहीत्वाग्नेः प्रत्यगुत्तरदेशतः॥५८॥ आरभ्यदि
शमाग्नेयीमाज्यधारामृजुं हरेत्। नैर्ऋतीं दिशमारभ्य ईशानीं पूर्ववत्ततो नयेत्॥५९॥ उभयत्र च
तुर्थ्यंतं प्रजापतिपदं स्मरेत्। स्वाहेत्याघारयेदेतावाघाराविति नामितौ॥६०॥ अस्यार्थः॥
ततश्च अग्न्यलंकरणं कुर्यात्। केचन विश्वानि नो दुर्गहेत्यादिमंत्रेण अलंकरणमग्नेः कुर्वंति। के
चन अलंकुर्वंति गंधपुष्पाद्यैः। ईशानीं दिशमारभ्य अलंकुर्यात्। अग्न्यलंकरणाद्योषिण्यश्चा
त्मानं ब्राह्मणं चाप्यलंकुर्वंति। इति शास्त्रांतरदृष्टं। इध्ममभिघार्य अयं त इध्म इत्यनेन मंत्रेण

Indira Gandhi National
Centre for the Arts

जुहुयादिति। स्रुचं पूर्णपात्रे स्थापयेत्। यावदेतस्य होमकालो भवति। तत आघारस्वरूपं अग्नेः
प्रत्युगुत्तरदेशात् वायवी। दिशामारभ्य दिङ्मान्यं तराले अनेन सूत्रेण तयोरंतरालवर्तिनी वा
यवी भवति। एवं सर्वत्र ज्ञातव्यं। स्रुवेणाज्यं गृहीत्वा आग्नेयीं दिशं प्रतिष्ठाप्य आज्यधारां ऋजुं
हरेत्। अनवच्छिन्नां विच्छेदरहितां एनां दीर्घीकुर्वन्नयेदित्यर्थः। ततः द्वितीयामाघाराहुतिं कुत
आरभ्य कुत्र नयेदिति। नैरृतीमारभ्य ईशानीं दिशं प्रति पूर्ववद्धरेत्। अत्राहुतिविषये मंत्रो
च्चारणस्वरूपमाह। अत्रोभयत्र प्रजापतयदस्य मनसा स्मरणे मनसा पठनीयं। तत्पदं चतुर्थ्यं कृ
त्वा प्रजापतये इत्येतावच्चतुर्थ्यन्तं पदं मनसा ध्यायेत्। तूष्णींहोमेषु सर्वत्र यत्र तूष्णीमिति तंप
दं तत्र मनसा प्रजापतिध्यानं सर्वत्र। स्वाहेत्युक्त्वा आघाराहुतिं नयेत्। आज्यधारामिति। इत्थ
वमाघारौ रूपितौ। अग्नेरुदग्भागे स्रुवेणाज्यं गृहीत्वा अग्नये स्वाहेति जुहुयात्। अग्नेर्दक्षि
णभागे सोमाय स्वाहेति जुहुयात्। एतदाहुतिद्वयमाज्यभागत्वेनोच्यते। चक्षुषी वा विज्ञायेते
। चक्षुषी आज्यभागौ वेति अग्नेर्दक्षिणोत्तरयोराहुत्योः संज्ञा। तथा च शौनकः। अग्निं परि
संमृज्याथ गन्धपुष्पैरलंकृत्य आत्मानं चाप्यलंकृत्य इध्ममादाय पाणिना। इध्मसंनहनीं रज्जु १९

मनूयाजे निधाय तां आदायाज्यं स्रुवेणैव त्रिरिध्ममभिघारयेत्। अयं तदिध्ममंत्रेण लग्नाविध्मं नि
धायचा। अत्र इध्मस्य मध्यमूलयोर्मध्ये होतव्यः। इध्मसंनहनमनुयाजान्ते वेनात्रे वदर्भेषु निदध्या
त्। आज्यभागानंतरं कर्तव्यमाह। उद्धृत्य चरोरर्धमभिमन्त्र्येदमग्नये। इतीदमग्नीषोमाभ्यामि
तीत्वभिमन्त्र्योत्तरमिति॥६२॥ अस्यार्थः॥ ॥चरोरर्धमुद्धृत्य स्थालीस्थमिदमग्नय इत्यभिमन्त्र्य पा
त्रान्तरस्थमिदमग्नीषोमाभ्यामित्यभिमन्त्रयेत्। एवं मंत्रद्वयेन पात्रद्वयाभिमन्त्रणं भवति। अ
त्राग्नेयचरुः अग्निदेवतायै स्थापितोऽन्यश्चरुरग्न्यर्थमभिमृष्टः। तस्य लक्षमाह। दर्व्यामुप
स्तरणात्साज्यमाग्नेयचरुमध्यतः। अवद्य हविरंगुष्ठपर्वमात्रं तदोपस्त्व॥६३॥ अस्यैव एवत्त
स्तद्दत्त्वा यास्यां तदावपेत्। पात्रस्थमभिघार्यास्यां स्थितमप्यभिघारयेत्॥६४॥ जुहुया[illegible]ये
स्वाहा दर्व्या मध्ये हविर्भुजः। प्रत्यकूतरेवादेशे तदाज्यभागावपेत्स्पच॥६५॥ जुह्वत्यपि द्वे दि
वदर्व्योः पार्श्वे नयाज्ञिका इति। अस्यार्थः। ततः अग्न्यर्थमभिमृष्टश्चरुस्तन्मध्यतः मध्यप्रदेशादे
गुष्ठपर्वमात्रकं हविरवद्य गृहीत्वा आज्योपस्तरणायां दर्व्यां स्रुवेणोपस्तरणं तद्धविः ॐप्यनि
क्षेप्या। अस्यैवाग्नेयहविषः पूर्वतः मध्यापेक्षया पूर्वदिग्भागान्नत्थवा वद्यं गृहीत्वा अस्यामेव

दर्व्यां तदावपेत्। पूर्वप्रदेशीयहविरपि निक्षिपेदित्यर्थः। हविर्ग्रहणं तु मध्यमानामिकांगुष्ठैर्भव
ति। आदौ स्वरूपात्रस्थमभिघार्य पश्चाद्दर्व्यामभिघारणं भवति। आदौ उपस्तरणं पश्चाद्धविषो
द्विरवदानं ततः सकृदभिघारणमिति। एवं चतुरवदानं ज्ञातव्यं। कुत्र वा आहुतिप्रक्षेप इत्या
ह। अग्नेर्मध्यप्रदेशे दर्व्या जुहुयात्। अथवा आहुतिप्रक्षेपः पार्श्वस्थानांतरमपि भवति। आज्य
भागावपेक्ष्य आज्यभागयोरपेक्षया यः प्रत्यक्प्रदेशः पश्चिमप्रदेशः तत्र वा होतव्यमिति।
आपद्यपि दिवस्याच्छादनं यथा भवति। दर्वीमधोमुखीं कृत्वा जुहुयादित्यर्थः। यद्वा दर्व्याः पा
र्श्वेन होमो भवति न त्वग्रेणेति तु याज्ञिकाः कथयंति कुर्वंति च। पाणिहोमे तु पार्श्वेन प्रजाप
तितीर्थेन अंगुल्यग्रैर्देवतीर्थेन एतदुभयमपि भवति यदा दर्व्या होमः तदा पार्श्वेनैव होम इति
विवेकः। द्वितीयाहुतेरपि विधिं दर्शयति। उपस्तीर्य द्वितीयस्याप्यवदानादि पूर्ववत्॥६६॥ प्राग्वा
दग्वाग्नीषोमाभ्यां स्वाहेति जुहुयादथो पंचावत्ती तु पश्चार्द्धादप्यवद्यति वै ततः इति॥६७॥
अस्यार्थः॥ ॥दर्व्यामाज्यमुपस्तीर्य द्वितीयस्यापि चरोः पूर्ववदेव अवदानादि भवति।
अग्नेर्मध्यप्रदेशात्पूर्वदेशे तु उत्तरदेशे वा आहुतिप्रक्षेपो भवति। प्रथमाहुतेस्तु अग्नेर्मध्य २०

प्रदेशे तस्मात्पश्चिमदेशे भवति। अयं विशेषः चतुरवदानस्वरूपमुक्त्वा पंचावत्तिस्वरूपं दर्श
यति। पंचावत्ती जामदग्न्यगोत्रः पश्चादर्द्धाद्धविषः पश्चिमप्रदेशादपि हविर्ग्रहणमधिकं क
रोति। इतरत्समानं। चतुरवत्तीनां पक्षे उपस्तरणं द्विरवदानं पुनरवत्तस्य प्रत्यभिघारणं। एवं
चतुरवदानं भवति। पंचावत्तिनामादौ उपस्तरणं हविषस्त्रिरवदानं पुनरवत्तस्याभिघारणं
एवं पंचावदानं भवति। इदानीं स्विष्टकृन्निरूपयति। स्विष्टकृतस्तत्त उत्तरार्द्धस्य पुरस्तादप्यवद्य
ति। उपस्तीर्याथ हविषो द्वयोरप्युत्तरार्द्धतः॥६८॥ पूर्ववदानतो न्यः सकृत्सकृदवद्य वाऽ
प्याद्द्विरभिघार्यान्नपात्रस्थं नाभिघारयेत्॥६९॥ यदस्य त्यादिना हुत्वा प्रागुदक्तु हविर्भुज इति।
अस्यार्थः॥ ॥चतुरावत्ती। स्विष्टकृद्धोमविषये दर्व्यामाज्यमुपस्तीर्य उत्तरप्रदेशस्थितस्य
हविषः अवदानं करोति पश्चाद्द्विरभिघारयति। पात्रस्थं नाभिघारयति। अयमेकदेवत्य
चरुविषयः। इदमत्र गर्हणं उत्तरार्द्धे। स्विष्टकृते नात्र हवीषि प्रत्यभिघारयतीति। पंचावत्ती
तु उपस्तरणानंतरं दर्व्यां उत्तरप्रदेशस्थितहविषः सकाशाद्गृहीत्वा निक्षिप्य पुनस्तस्यैव उ
त्तरार्द्धस्य हविषः पूर्वभागादवद्यति ईशानीभागस्थितं ग्राह्यमित्यर्थः। द्विरभिघारयति

।एवं पंचावदानं।एकचरुविषयव्यवस्था प्रतिपादिता।यत्र पुनश्चरुद्वयं त्रयं ततोऽधिकं वा भव
ति तत्रावदानादि कथं स्विष्टकृद्विषये न वेदित्याह।आदौ दर्व्यामाज्यमुपस्तीर्य द्वयोरपि हवि
षोस्त्रयाणां वा रुत्तरार्द्धतः क्रमादवदानधर्मेण आद्यपात्रस्थेन मत्रमवत्तेएवं द्वितीयादि
पात्रस्थमपि ग्राह्यमेकवारमेकवारं।प्रतिपात्रं सकृत्सकृद्ग्राह्यं भवति न त्वेकस्थालीस्थहविष
:पुनर्ग्रहणं भवति।पंचावत्तीत्सर्वेभ्यो हविर्भ्यः उत्तरपूर्वप्रदेशाद्विरवद्यति।पश्चाद्विरभि
घारयति।अत्र स्विष्टकृद्विषये पात्रस्य नाभिघारयति।एवं स्विष्टकृति हविर्गृहीत्वा कुत्र हव
नं भवतीत्यपेक्षायां हविर्भुजः प्रागुदक्पूर्वोत्तरयोर्मध्यप्रदेशावर्तिनी ईशानी ग्राह्या।यदस्य
स्यादिमंत्रेण तत्र होमं कुर्यात्।एवं चरुविषये बहुचरुविषये स्विष्टकृति हविषोऽवदाने वि
शेषः इतरत्सर्वं समानमिति॥ ॥अनंतरकृत्यमाह॥ ॥तामिध्मबंधनीं रज्जुं विस्रस्य प्रास्य
वानले॥७०॥ अजोऽश्वेत्यादिभिर्मंत्रैर्हुत्वाज्याहुतिसप्तकमिति।अस्यार्थः॥ ॥इध्महोमस
मये कुत्रचिच्छुद्धप्रदेशे स्थापितामिध्मबंधनीरज्जुं मूलतः विस्रस्य अनले प्रक्षिपेत्।अ २१
त्र न मंत्रः न स्थाननियमः।केचिदुद्धायतां निचरा यस्त्वा हेति मंत्रं पठंति।रज्जुप्रहरणानं

तरं अयास्याग्नेरस्यनभिशस्तीश्चेत्येवमादिभिः सप्तभिर्मंत्रैराज्याहुतिं हुत्वा वक्ष्यमाणं करोति
।ब्रह्मवत्सु कर्मसु अग्नेर्वायव्यदेशे ब्रह्मा तिष्ठन्नेव पूर्वोक्तैरेव सप्तभिर्मंत्रैर्जुहोति।निरस्य
नमुपवेशनं जपः।प्रायश्चित्तहोमः संस्थाप्य जपेनोपस्थानं चेति पंच कर्माणि ब्रह्मणः इति हेतो
:नैमित्तिकप्रायश्चित्तान्यन्वत्तीयाध्याये वक्ष्यति।अनंतरं कृत्यमाह।निनयेत्पूर्णपात्रं तन्नि
हितं तत्र बर्हिषि॥७१॥ अस्यार्थः॥ ॥अनंतरं यत्पूर्वं बर्हिषि पूर्णपात्रं तत्सन्निहितं तन्निनये
त् निषिंचेत्।अत्र निनयनानंतरं कृत्यमाह।आपो अस्मानयं मंत्र इदमापइनीतरः।सुमित्रा
नइतित्वन्यत्।निर्मार्जनमाचरेत्॥७२॥ ॥अस्यार्थः॥ बर्हिषि पूर्णपात्रनिनयनं कृत्वा मा
र्जनं कुर्यात्।तत्रेते मंत्राः।आपो अस्मान्मातरः शुंधंत्विति मंत्रः।इदमापः प्रवहतेत्यपरः
।सुमित्रा न आप ओषधयः संत्वित्यपरः।एभिर्मार्जनं भवति।न द्वत्ते त्रैहुत्वा नांस्याल्लोप
वासादिरिष्यते।देवतास्तत्र तत्रोक्ताः सद्यः कालः त्विष्यते।कारिकावेति न संदेहः।क
स्मिन्नपि कर्मविशेषे पत्न्या अपि मार्जनं भवतीत्याह।कार्यं पुंसवनादौ रूपपत्न्या अपि वैमा
र्जनं केचिन्नेतीमिवाङुरिति॥ ॥अस्यार्थः॥ ॥पुंसवनादौ तु पत्न्या अपि प्रत्येरेव मंत्रै

Indira Gandhi National Centre for the Arts

मार्जनं कुर्यात्। तत्र पत्न्या एव प्राधान्यं तत्र यजमानस्य आचार्यत्वं अतः उभयोरपि इदं पत्नीमा
र्जनमुपपन्नमिति भावः। केषाञ्चिन्मते पूर्णपात्रस्य बर्हिषि निनीतिः स्थापनमात्रमिति। न मा
र्जनं कस्यापि॥ ॥अत्र भगवान्॥ ॥आदाय पूर्णपात्रं तद्बर्हिर्व्याधाय पाणिना। स्पृष्ट्वा दक्षि
णहस्तेन तत्पूर्णमसि मंत्रतः। प्राच्यां दिश्यादिभिर्मंत्रैः कुर्यात् प्रागादिषु क्रमात्। उदकं तु
प्रतिदिशां प्रोक्ष्याधस्तान्निनाययेत्। आपो अस्मानित्यनया इदमाप इमा आप इति तु थाखु
त्यान इत्येतेन मंत्रान्ते मार्जनं ततः। दुर्मित्र्या इति मंत्रेण प्रत्यक् दक्षिणदेशके। न हन्मीत्येव
मंत्रेण कुशाग्रैः प्रक्षिपेदपः। वामपार्श्वेन आसीना पत्नी प्रत्येद्यविभुजः। आसिच्य पाणौ त
त्रायंमा हप्रजाम नेन तु। तस्या णिग्यां गृहीत्वा तु पापमात्मकृतं स्मरन्। आत्मानं यजमानं च
दोनाभ्निः प्रोक्ष्य तज्जलैरिति। अत्रार्थे प्राप्तरक्षाविधानं प्रायुषमित्यादिना कार्यं। उपस्था
योश्वमेरचर इति॥७३॥ ॥अस्यार्थः॥ ॥ततो यजमानः अग्निमुपतिष्ठेत ॐ नमइत्यनेन
मंत्रेण। उपांशुमंत्रं तावे जपन् तिष्ठताग्नेः प्रत्यगुदक्कृत्विनः। श्रद्धां मेधां यशः प्रज्ञां विद्यां
बुद्धिं श्रियं बलं। आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन इति। उपस्थानानंतरमाह। पयू २२

ह्युपरिक्षिप्याज्यं घृतविशिष्टं हुतं च तत्ब्रह्मणे नरनावे तु ब्राह्मणेभ्यः प्रदीयत इति॥७४॥ ॥
अस्यार्थः॥ ॥जपानंतरं रक्षां कृत्वा ततः अग्निं पर्युक्ष्य पूर्ववत् सोदकेन पाणिना अग्नेः समंतान्मा
र्जनमित्यर्थः। तथैव परिषिच्य परिषेचनं प्रोक्षणं कृत्वा हुतशिष्टमन्नं घृतं च ब्रह्मणे दद्यात्।
तदभावे अन्येभ्यो ब्राह्मणेभ्यो दद्यात्। इयमेव स्थालीपाकस्य दक्षिणा॥ ॥अमावास्यायां
स्थालीपाके प्रधानदेवतामंत्रविषये विशेषमभिधातुमाह। अग्नीषोमपदस्थाने इंद्राग्नी
पदमावपेत्। अयमेव विशेषस्यादर्शे तन्यत्समं नवेदिति॥७४॥ ॥अस्यार्थः॥ ॥अग्नीषो
मपदस्थाने इंद्राग्नीपदं। अन्यत्सर्वमपि समानं भवति। कर्मपरिसमाप्तौ किंचिद्वक्तुमाह॥
एतत्तंत्रं हुतानीस्यात्रोपवासादिरिष्यते। प्रधानदेवतान्यत्वं सद्यः कालस्तथेष्यो॥७५॥ अ
स्यार्थः। अग्नौ हूयमानाहुतावुच्यंते। तेषामेषा इति कर्तव्यता भवति। अत्र उपवासादिनि
यमो न। हविष्यभोजनादिलक्षणो नियमः। स्वहोममध्ये भवति। दर्शपूर्णमासयोरेव निय
मश्रवणात्। दर्शपूर्णमासाभ्यामुपवास इति सूत्रे पिवर्त्तने। हुतानामन्यापव प्रधानदेवताः
। तत्र सद्यः कालपक्षः। न चादिनद्वयकर्मसाध्यत्वमस्ति। यथा दर्शपूर्णमासयोर्दिनद्वयसा

Indira Gandhi National Centre for the Arts

५ केपुत्रिकर्मं [illegible] स्वस्ति वाचन [illegible] तिथ्यं [illegible] स्वस्ति वाच
नमत्रे [illegible] कर्म [illegible] स्ति [illegible] तत्स्या

ध्यत्वं तथात्र नास्तीत्यर्थः।सद्यः कालपक्षएवांगीकृतः॥ ॥इति स्थालीपाकः॥ ॥अत्र यज्ञकर्म
णि दक्षिणाविशेषउच्यते हेमाद्रौ।तत्र महाभारते।वेदोपनिषदे चैव सर्वकर्मसु दक्षिणा।
सर्वक्रतुषु चोद्दिष्टाः भूमिर्गावोहि कांचनं।श्रुतिः स्कंदपरमा सुवर्णदक्षिणेति।बीजवापन
स्जनं दक्षिणा निबिध्यते।शिवनेत्रोद्भवं यस्मात्तस्मात्तत्सिद्धवल्लभं।अमंगलं तद्युक्त्येन देव
कार्येषु वर्जितं॥ ॥केषु कर्मसु स्वस्ति वाचनमिष्टं भवति।आश्वलायनाचार्येणापि मं
गलार्थं निगदितं तत्रायं स्वस्ति वाचनविधिः कस्मिन्समये कथं वा भवति॥ ॥यथा जा
तकर्मणि॥ ॥जातस्य कुमारस्य वेदोक्तपवित्रीकरणार्थं जातकर्म करिष्ये तत्र पूर्वोगत
यानादीमुखं करिष्ये तत्रादौ स्वस्ति वाचनं ब्राह्मणैः सह करिष्ये।तदंगभूतं ब्राह्मणपू
जनं च करिष्ये।तत्र स्वस्ति वाचनसंकल्पानंतरं किं कर्त्तव्यमाह॥ ॥अर्चिता ब्राह्मणाः
सम्यग्गंधमाल्यैः सदक्षिणैः।तिष्ठेयुर्ब्राह्मणा युग्मा वक्तारो दर्भपाणयः॥७७॥ ॥अ
स्यार्थः॥ ॥गंधमाल्यैः सदक्षिणैः पूजिताः संततान् स्वस्ति वाचनार्थमादौ गंधमाल्यादि 27
नाअलंकृत्य दक्षिणादानेन तेषां परितोषमुत्पाद्य ते ब्राह्मणाः युग्माः समाः चतुः षडाद

य इति अलाभे द्वयं वा ते पुनः प्राङ्मुखाः पूर्वाभिमुखाः दर्भपाणयः सपवित्रकास्तिष्ठेयुः।वक्ता
रः स्वस्ति वाचकारइत्यर्थः।सम्यगर्चिताः सम्यगिति विधितः भक्तितः द्रव्योत्सवादिसामग्रीतः
॥ ॥तिष्ठेद्वाचयिता तेषां दक्षिणस्तुउदङ्मुखः।चित्रकुंभमपां पूर्णं पिहितानन मर्चितं॥७८
अथ वाचयितुर्बोद्धुं दक्षिणं तु समाश्रिताः।तिष्ठत्युदङ्मुखाः सम्यक्संस्कार्यास्तत्र तत्रेति
ति॥७थाअस्यार्थः॥ ॥वाचयिता तु तेषां वाचकानां दक्षिणभागे उत्तराभिमुखस्तिष्ठेत्।ति
ष्ठेदिति तस्यापि वाचयितुः स्वस्ति वाचनं कारयितुः।यजमानस्याप्युपवेशनं नास्तिआ
समाप्तेः।वाचयिता उदङ्मुखस्तिष्ठन् किं कुर्वन्नास्ते।अद्भिः पूर्णं चंदनाक्षतपुष्पैरर्चितं तु
भाभ्यां पाणिभ्यां कुंभं व्यवहारात्ताम्रादिमयं बिभ्रन्धारयन्धारयन् पुनः कथंभूतं विहि
ताननं।यस्य कुंभस्य आननं मुखं पात्रांतरेण अर्थात् शिष्टाचारात् कांस्यपात्रेण हरिद्रा
पूगीफलसहिततंडुलपूरितेन आच्छादितं सपल्लवमपि कुंभं कुर्यादिति।तत्राचार्यैः स्मृ
तिरूपणा सूत्रेण वेष्टितं कुंभमयापूर्णं सुधूपितं।मृत्ताम्रादिमयं भूमौ रत्नगर्भे समर्चि

Indira Gandhi National
Centre for the Arts

तां।सिततंदुलपूर्णेनपात्रेणापिहिताननां।पल्लवाद्यैश्चसंगृह्यगुरुस्तिष्ठेदुदङ्मुखः।वक्कार
श्चापितिष्ठेयुरिति।एवमाशीर्वादग्रहणार्थंप्रवृत्तोयजमानोनस्ययजमानस्यसंस्कार्य
ः।यथासंभवंमाणवकादयःदक्षिणबाहुसंलग्नाःतेषुदङ्मुखास्तिष्ठंति।सम्यकुर्निष्ठंती
त्यत्रसंस्कार्याणांमाणवकादीनांयथासुकरंभवतितथावस्थानमित्यर्थः।तत्रतत्रविहित
कर्मणियत्रसंस्कार्यास्तत्रैव।यत्रसंस्कार्यानास्तितत्रोपवेशनमाप्स्विनू।नास्तिवेदाविवक्षि
तमुपवेशनं।मनइत्यादिकंमंत्रमेकाग्रमतिराशिषोनु।मनसस्मइतिब्रूयुस्तेसमाहितपूर्व
क।।८०।प्रसीदंतुभवंतइत्यथवात्वइनावदेत्।प्रसन्नाःस्मइतिस्पष्टंमास्वसीरंस्तश्चाशिविना
ः।।८१।।शांतिःपुष्ट्याद्यैर्विघ्नाद्यान्शब्दान्पंचदशैवतु।अस्तुशब्दासुच्चेरन्वाचयित्वान
घापरेः।।८२।।प्रस्कस्यदेवतायांतुहोमंकुर्याद्विचक्षणः।तस्यानामगृहीत्वाथप्रीयतामिति
नाषनइति।।८३।। ।।अस्यार्थः।। ।।ततोवाचयितायजमानःब्राह्मणान्प्रतिमनःसमाधी
यतामितिमंत्रमादिशेत्।ब्रूयात्।एकाग्रमानसःसन्।तेविप्राअपिसमाहितपूर्वकं।स २४
माहितमनसस्मइतिब्रूयुः।ततोवाचयिताप्रसीदंतुभवंतइतिवदेत्।अर्चितास्तेब्राह्मणाः

तवप्रसन्नाःस्मइत्यास्वसीरन्।प्रत्युत्तरंदद्युरिति।ततःशांत्यादिपंचदशशब्दान्आशीर्वाद
रूपान्परैरन्यैरपिद्विजैर्वाचयित्वातेन्वपुनःअस्तुशब्दांतमुच्चरेयुः।प्रश्नोत्तरप्रकारमाह।
मह्यंशांतिरस्त्वितिभवंतोब्रुवंत्वितिवाचयित्वातेपितुभ्यंशांतिरस्त्वितिप्रतिब्रूयुः।एवंस
र्वत्रायांदेवतांप्रस्कस्यहोमंकुर्यात्।तस्यानामगृहीत्वासादेवताप्रीयतामितिवदेतु।साप्री
तास्त्वितिब्राह्मणाः।अत्रविशेषमाहशौनकः।तत्रादावापइत्येववदेद्वाचयिताततः।वू
कारोपिशिवाआपःसंत्वितिब्रुवंत्वथ।गंधाइतिवदेदेकःसुगंधायांत्वितीतरे।वदेदेवं
सुमनसइत्येवमपरेष्विव।सौमनस्यमस्तिब्रूयुरस्कंशब्दांतमत्वराः।पश्चादक्षतइत्येवंब्रू
याद्वाचयिताततः।अन्येसंतंवारिष्टंचास्त्वित्येवब्रूयुरर्चिताः।ततोवाचयिताविप्रोदक्षिणा
इत्युदीरयेत्।स्वस्तिशब्दाद्यमुच्चार्यदक्षिणाःपात्वितीतरे।बहुदेयमितिब्रूयुरस्कंशा
ब्दांतमत्वराः।कर्ताथदक्षिणंजानुपातइत्वामहीतले।उदङ्मुखवाजपेत्सूक्तंमस्रुद्दयेत्येवमा
दिकं।अर्चयित्वाथतत्कुंभंबिभ्रत्तिष्ठन्नुदङ्मुखः।मनःसमाधीयतामिति।पुण्याहस्वस्त्ययथ
द्धिंचभवंतोस्तुब्रुवंत्विति।प्रणवाद्यंत्रिरभ्यस्यस्वरादिविनापरे।।८४।।प्रत्यक्तविषयेत

दत्तृतीयेऋध्यतामिति।पुण्याहादित्रिरभ्यासंमंदमंदमध्योच्चनिस्वनैः॥८५॥ अस्यार्थः॥
॥ ॥भो ब्राह्मणाः पुण्याहंभवंतोब्रुवंतु।ॐस्वस्तिभवंतोब्रुवंतु।ॐऋद्धिंभवंतोब्रुवंतु।ए
वं कर्त्ता प्रणवाद्यं पुण्याहादिशब्दं क्रमेण वारत्रयं वारत्रयं प्रत्येकं पठति।त्रिःपुण्याहंपरि
त्वात्तथैव त्रिःस्वस्तिपदं तथैव त्रिःऋधिपदं उक्तप्रकारेण पठति।अपरे ब्राह्मणा अपि भवंतो
ब्रुवंत्विति पदं विहाय ॐपुण्याहमिति ब्रूयुः।तृतीयप्रश्ने विषये ऋध्यतामिति ब्रूयुरित्य
र्थः।पुण्याहादिशब्दानां प्रातःसवनमध्याह्नसवनतृतीयसवनेष्वोषैः त्रिवारं पठेयुः।
यद्वि शेषः।पुण्याहादिशब्दानां प्रातःसवनमध्याह्नसवनतृतीयसवनेघोषैः त्रिवारं पठेयुः।
कर्त्ता ब्राह्मणाश्च॥आशिषीरन्निमे सर्वे यथागममपरंपरा।अस्यार्थः॥ ॥इमे सर्वे ब्राह्मणाः
आगमपरंपरामनतिक्रम्य आशीर्वादं कुर्युः।आगमशब्देन आगमज्ञा आचार्या उच्यंते॥
आप इत्यादिकैः शांतिं ततः कुर्युः समाहिताः॥८६॥स्वस्तिवाचनमत्रेष्टं सर्वेषामपि कर्मणां
आदावंते प्रयोक्तव्यमिति यज्ञविदां मतं॥८७॥जयंतस्वामिना प्रोक्तमिदं तु स्वस्तिवाचनमि २५
ति।अस्यार्थः।आप इत्यादिभिः आपो हिष्ठा समुद्रज्येष्ठाः इत्यादिभिः ततः शांतिं कुर्युः।समा
हिताः एकाग्रमनसः सर्वत्र ऋधिकर्मसु स्वस्तिवाचनमिष्टं कर्तव्यं भवति।कर्मणामादौ समा

प्तावपि स्वस्तिवाचनमिष्टं कर्तव्यमिति।यथैव कर्मादौ गंधदक्षिणाद्युपचारैः स्वस्तिवाचनं वा
चयति कर्त्ता।एवं तानुविविधोपचारैः प्रसाद्य स्वस्तिवाचनं कारयितव्यं।इदं स्वस्तिवाचनं अ
स्मद्गृहे नास्ति।किंतु अस्मदनुग्राहकेन जयंतस्वामिना उक्तं।तदवश्यं कर्तव्यमिति॥ ॥अत्र
कलशस्थापने विशेष उच्यते हारीतेन।गोमयेनोपलिप्यावनीं रंगवल्लिकया चैव च।
धान्योपरि स्थाप्यं पूर्णं हि कलशादयमिति॥दक्षिणस्योत्तरे चैव तत्तरेत्तु निधापयेत्।पात्रमक्ष
तपूर्णं तु फलपुष्पसमन्वितं।विष्णुधर्मोत्तरे।हेमराजतताम्रा वा मृन्मया लक्षणान्विताः।या
त्रोद्वाहप्रतिष्ठादौ कुंभा धार्याः स्युरभिषेचने।पंचाशदंगुलिवैपुल्यमुत्सेधः षोडशांगुलं।द्वादशां
गुलकं मूलं मुखं मष्टांगुलं तथेति।क्षत्रियादीनां निरोंकारं स्वस्ति वाचनं कार्यं।तदाह यमः
पुण्याहवाचनं चैव ब्राह्मणस्य विधीयते।तथैव च निरोंकारं कार्यं क्षत्रियवैश्ययोरिति॥ ॥
इति वाचनसमाप्तं॥ ॥वक्ष्यमाणकर्मानुष्ठानसिध्यर्थं आदौ स्थालीपाकं स्वस्तिवाचनं
चोक्त्वा इदानीं गर्भाधानाख्यं कर्म मारभते॥ ॥जयंतोक्तेन मार्गेण गर्भाधानमिहोच्यते।
॥८८॥चतुर्थदिवसादूर्ध्वं मघामूलादिवर्जिते।अलंकृत्य गृहे गंधपुष्पमाल्यादिभिः शुभे।

Indira Gandhi National
Centre for the Arts

॥८९॥ ऋतुस्नातां शुभैर्गंधमाल्यादिभिरलंकृतां। अलंकृतः स्वयं तद्वदारोप्य शयनं शुभमि
ति॥९०॥ अस्यार्थः॥ ॥आयंतमतानुसारेण गर्भाधानाख्यं कर्म उच्यते। रजोदर्शनानंतरं
दिनचतुष्टयं त्यक्त्वा पुत्रकामः पंचसप्तादीनि विषमानि दिनानि त्यक्त्वा समदिने शुभमघामूला
दिवर्जितेषूक्तनक्षत्रेषु गर्भाधानाख्यं कर्म कुर्यात्। आदौ सुमूहूर्ते रात्रौ क्वियं तस्मिन्दिने स्व
कीयं कुलधर्मं विधाय इष्टदेवतापुण्यार्थं ब्राह्मणान्भोजयित्वा स्वस्तिवाचनपूर्वकं स्वयं
च मधुराद्यन्नं भुक्त्वा हृष्टमनाः कर्पूरचंदनागरुकस्तूर्याद्यनुलेपनैः सुवासितशुभमाल्यै
ःपथाविनं गृहमलंकृत्य शयनस्थलां भार्यांश्चित्वाप्यामपि तथैव स्वयमप्यलंकृतः शुभं शय
नमारोप्य परिकल्प्य। ततः किं कुर्यादित्याह। पेषयित्वाश्वगंधाया मूलं शुद्धांबरे। क्षिपेत्। सत्वो
दीर्घान इत्यस्या दक्षिणे नासिकापुटे॥९१॥ निष्पीड्य वस्त्रेण तन्मूलं वस्त्रसंशोधितं तत इति।
अस्यार्थः॥ ॥रात्रौ शुभलग्ने अश्वगंधाया मूलं पेषयित्वा शुद्धवस्त्रे क्षिप्त्वा उदीर्घात इत्युक्त्वा
अस्याः दक्षिणनासिकापुटे क्षिपेत्। अश्वगंधायामूलं ततो निष्पन्नं पिष्टं निष्पीड्य वस्त्रसंशो २८
धितं सत् नासिकापुटे क्षिपेत्। ततः किं कर्तव्यमित्यत आह। एवं कृतोपगमने कृतस्यात्तग

र्भलंभनमिति॥९२॥ ॥अस्यार्थः॥ ॥एवमनया रीत्या विधिं कृत्वा उपगमने समीपगमने संभो
गार्थं प्रवृत्ते सति गर्भलंभनं स्यात्। गर्भो लभ्यते येन कर्मणा तत् गर्भलंभनं। आचार्यस्य मते ग
र्भाधानं पासिकमिति कृत्वा यौन कार्यं के मार्गेणोक्तमिति गृह्यते इति टीकाकारः। भगवान्॥
षोडशास्वृतुरात्रेषु दिनेष्वाद्यं चतुर्दिनं। आर्तवरात्रौ च संष्टकं वर्जयित्वा परेष्वृतुदिनेषु द्वादश
स्वपत्र दस्मिन्यनि नार्ययोः। उभयोरपि जन्मर्क्षानुगुणं तारकं ध्रुवं। स्नापयित्वाथ गंधाद्यैर्न
षयित्वाश्वत्थमुहूर्ते त्वश्वगंधाया मूलं संपीड्य तत्पुनः। कृत्वा नवांबरकं तु परिगृह्याग्निपा
णिना। उदीर्घातः पतिवती साध्याम्स्वमुदीर्य च। जायाया दक्षिणनासारंध्रे सिंचेत्तु तद्रसं उ
दरस्थे रसे तस्मिन्नान्वांत सलिलां सती। उपगच्छेद्धूमवं विधिनापगमे कृते। गर्भे स्थिरस्या
दित्येवं गर्भलंभनमूचिरे इति। आचार्योपि स्मृतिरूपेण। आस्वप्य गोपयित्वा तां पत्नीं सम्य
गलंकृतां। स्वयं चालंकृतस्तद्वच्छयनं समुपाविशेत्। आनयित्वाश्वगंधाया मूलमालोड्य सू
क्ष्मवत्। आर्षभेण तु मंत्रेण नूतनमूलेन वा नयेत्। कपिलापयसा मिश्रं कांस्यपात्रगतं शुभं।
दक्षिणस्यां नासिकायां सिंचेन्मंत्रेण तत्सति। समंत्रकं तु दीर्घं निसिक्त्वास्मिन्नुदरंगतो नोप

Indira Gandhi National Centre for the Arts

षन्निति मंत्रेण तामुपेयाद्यथाविधि।एवं कृत्वा स कृत् भर्त्ता समे नित्यं समाव्रजेत्।असत्त्वेद्भवेन्न
स्याद्गर्भाधानं कृतं स्त्रियः।ऋतुः।उत्तमां वरगंधाद्यैः शुचिर्भूत्वा समाहितः।विष्णुर्योनिमुदंर्त्योच
जपित्वाधानमाचरेत्।गर्भाधानाकरणे प्रायश्चित्तमाह आश्वलायनः।गर्भाधानस्याकरणात्तस्यां
जातस्तद्दुष्यति।अकृत्वा गां द्विजे दत्वा कुर्यात्पुंसवनं पतिरिति॥ ॥इति गर्भलंभनं॥ ॥इदा
नीं पुंसवनमुच्यते॥ ॥तृतीये गर्भसंस्कारे मासे पुंसवनं भवेत्।आद्ये गर्भो न विज्ञातस्तृती
ये मासि व्यक्ततः॥९३॥ ॥चतुर्थे मासि कर्त्तव्यमाद्यगर्भे स्मृतो विधिरिति॥अस्यार्थः॥ ॥तृ
तीये मासि पुंसवनं भवेत्।तत्किं नाम गर्भसंस्कार इति।येन कर्मणा गर्भस्य पुंस्त्वं जायते॥
तत्पुंसवनं अतः गर्भसंस्कारः।तृतीये मासि चेदाद्यो गर्भो न ज्ञातः तदा चतुर्थमासि तत्
स्यात्।तदा चतुर्थमासि पुंसवनं।एतत्तु आद्यगर्भविषयं।गर्भांतरे तृतीयमास्येव भवति
।कुतः तत्र द्वितीयगर्भे ज्ञायते।तस्मात्तृतीयमास्येव भवति।बृहस्पतिरपि।तृतीयमासि कर्त्त
व्यं गृष्टेरन्यत्र शोभनं।गृष्टेश्चतुर्थमासे तु षष्ठे वाप्यथवाष्टमे।सकृत्प्रसूता गृष्टिः स्यात्।उ २७
त्क्रान्त्या सीमंतसीमंतेन सह कर्त्तव्यं तदाह जातूकर्ण्यः।द्वितीये वा तृतीये वा मासि पुंसव

नं भवेत्।व्यक्ते गर्भे भवेत्कार्यं सीमंतेन सहाथवा।नृसिंहोपि॥ ॥सीमंतोन्नयनस्योक्ततिथि
वासरराशिषु पुंसवं कारयेद्विद्वान् सह [illegible] दिने थवा॥ नात्र नक्षत्राण्याह वराहः।मूलश्र
वणपुनर्वसुमृगशिरोहस्तपुष्यतिष्यः।पुंसि क्षिप्रकाणिकायेषु तानि शुभानि धिष्ण्यानि।राशी
नाह बृहस्पतिः।कुलीरं मिथुनं कन्यां हित्वा शेषा [illegible] बृहः।कन्याराशौ विशेषमाह स एवात्र
नुक्तो वापि राशौ तु शुभनस्यात्तु भवीक्षिते।कन्यायां [illegible] सांतिशुभदृष्टयुतेपि बेति।तिथीनाह
नृसिंहः।रिक्तामपर्वनवमीस्त्यक्त्वा पुंसवने शुभाः।अथाष्टमशुद्धिमाह वसिष्ठः।अष्टमस्था
ग्रहाः सर्वे नेष्टाः स्युस्ते शुभावहाः।एवं सम्यक्परीक्ष्यैव कुर्यात्पुंसवनक्रियामिति।वारानाह
दीनाह बृहस्पतिः।गुरुः शुक्रो बुधो हन्ता द्रेष्काणो दिनवमांशकाः।तेषामुदयहोरा च पूस
वतिशुभावहा इति।विधिरत्नेपि।तिष्ये वै पुंसवने विशुद्धनिधनेषु अर्कं दृष्टपुंसांलग्ने तद्दिवसे
यमं दृष्टमवनस्त्रीन्यान्यलग्नं शुभं।पूर्वाह्ने सुरपूजिते व्यपगते दृष्टे चतुर्थे विधिर्येन तत्पुंसवनं
परत्र विधिना मासे तृतीये ततः इतिः द्वितीयमासि कुर्यादिति मासि प्राधान्येनास्या विहितत्वात्सुरगु
रुशुक्रमौद्ध्येपि पुंसवनस्य कर्त्तव्यतावगम्यते।तदाह बृहस्पतिः।मासप्रयुक्तकार्येषु भू

Indira Gandhi National
Centre for the Arts

दत्वं गुरुस्तु आयोः। न दोषः कृत्तदा मासलक्षणो बलवानिति॥ ॥स्यादासुदयिकं श्राद्धं गर्भिण्या
एकभोजनं। अथापरेद्युः स्वस्तिव्यसे पत्नी। कृताक्षसमीपतः पूर्णपात्रनिधानांतमन्वाधानादि पूर्ववत्
तु॥५४॥ ॥अस्यार्थः॥ ॥स्वस्तिवाचनविधितः कृत्वा तदनंतरं नांदीमुखं विधाय तदंगत्वेन
गर्भिण्या एकभोजनं। एकस्मिन्काले भोजनं। एतत्कर्म दिनद्वयसाध्यं। स्वस्तिवाचनादि यद
दुक्तं तत्सर्वं दिनकृत्यं। अपरेद्युः स्वस्तिष्यर्से पुष्यनक्षत्रे उपोषितां पत्नीं एकभोजननियमितां तां
समीपतः कृत्वा सहासनेउपवेश्य प्रतिज्ञां करोति। अस्याममुत्पन्नस्य गर्भस्य पुंस्त्वजनल
क्षणं पुंसवनाख्यं कर्म करिष्ये। एतत्कर्मोपासनाग्निसाध्यमेव। यतः अन्वाधानादि पूर्व
वदित्युक्तं। इतरथा उपलेपादि पूर्ववदिसेव मुख्ये तान्यथा लौकिकाग्नौ। अन्वाधानमादौ यस्य क
र्मणः तदन्वाधानादि। पूर्णपात्रनिधानं रक्षापनुसते [illegible] कर्मणः। एतावत्पर्यंतं कर्मकलापं कृत्वा
। अन्वाधाने प्रजापतिं प्रधानदेवतां चरुद्रव्येणेति विशेषः। इतरत्तु समानं। निर्वापप्रोक्षण
स्या। तां प्रजापतयस्त्वस्थ्या। कृत्वाज्यभागप[illegible] प्रधान[illegible] पूर्ववत्॥५५॥ ॥अस्यार्थः॥ प्रजा २८
पतय इत्यनेन नाममंत्रेण निर्वा[illegible] प्रोक्षणं भवति। प्रजापतये त्वा जुष्टं निर्वपामीति मुष्टिच

तुष्टयं निर्वपेत्। प्रजापतये त्वा जुष्टं प्रोक्षामीति मंत्रेण वा चतुष्टयं प्रोक्षणं भवति। तत
:व्रीह्यवहननादि पूर्ववत् कृत्वा आज्यभागपर्यंतं स्रुचिपर्यंतं कृत्वा। अत्र पुंसवनविष
याकिंचिद्विशेषकर्म विधानमाह। समानरूपवत्साया गोर्दधि प्रसृतौ क्षिपेत्। तादृक्पा
श्चेदभावे तु अन्यस्या गोर्दधि क्षिपेत्॥५७॥ ॥अस्यार्थः॥ ॥समानरूपो वत्सो यस्याः ता
दृक्पाः गोः दधि पत्न्याः पुंसवनकर्मार्थमुक्तं तिनायाः प्रसृतौ अर्थो दक्षिणपाणिपुटात
त्रतः दधि क्षिपेदित्यर्थः। एकलक्षणाया अभावे तादृशी समानरूपवत्सा गौर्यदि न लभ्ये
त्। तदा अन्यस्या अपि गोर्दधि निक्षिपेदित्यर्थः। प्रसृतिर्नियमपरस्परसंदष्टाकुंचितां
गुलिः पाणिः। पाणिर्निकुब्जः प्रसृतिरित्यभिधानात्। अत्र कर्मणि गव्यमेव भवतीत्यर्थः
:। एवं प्रसृतौ दधि निक्षिप्य। माषद्वयं यवं च त्रिः पृष्ठोत्किंपिबसीति तां। त्रिः पुंसवनमि
त्युक्त्वा प्राशयेत् प्रसृतित्रयं॥५८॥ अंडरूपेण माषौ स्तः शिश्नरूपेण वै यवः। अस्यार्थमा
ह। तत्र दधिमध्ये माषद्वयं माषधान्यबीजद्वयं क्षिपेत्। ततः प्रश्नः तां नार्यां प्रति किंपिबसी
ति त्रिः प्रश्नो भवति। नार्यया प्रत्युत्तरं देयं पुंसवनमिति वारत्रयं प्रत्युत्तरं भवति एवं प्रश्ना
एकं यवमपि क्षिपेत्॥

Indira Gandhi National
Centre for the Arts

नीतं प्रत्यक्तरदने साभार्या ततः प्रसृतिस्थं यवमाषद्वयमिश्रितं दधि पिबेत्। तथैव पुनः
प्रसृतौ यवमाषसहितं दधि निधाय पूर्ववत्प्रश्नोत्तरपूर्वकं प्राश्नीयात्। तथैव तृतीयवा
रमपि प्राशनं भवति। अत्र माषौ अण्डरूपेण स्तः। शिश्नरूपेण यवः। एवं पुंस्त्वजनकत्वे
ण भवति। एतत्कर्म कस्मिन्प्रदेशे कुर्यादित्यत्राह। पतिर्मण्डलगृहच्छायायामुपवेश्य पत्नीं।
सिंचेद्दूर्वारसं तस्याः दक्षिणे नासिकापुटे॥ ॥अस्यार्थः॥ ॥मंडलाकारं गृहं मंडपेनेवसं
भवति। तस्मान्मंडपं कार्यं। तस्य छायायां तामुपवेश्य अस्याः पत्न्याः दक्षिणनासिकापुटे
दूर्वारसं सिंचेत्। क्षिपेदित्यर्थः। तत्सेवनं तु तूष्णीं मंत्रेण वेति संदेह आह। प्रजावज्जीवपु
त्राभ्यां सूक्ताभ्यां वा तदिष्यते॥१००॥ ॥अस्यार्थः॥ ॥प्रजावता दृष्टो मंत्रः प्रजावान् जीवपु
त्रेण दृष्टो जीवपुत्रः। यथात्र। आने गार्भ इति सूक्तं प्रजावत्। अग्निरैतु प्रथम इति सूक्तं
जीवपुत्रः आभ्यां सूक्ताभ्यां दूर्वारससेवनं भवति। अन्ये त्वाहुरिदं कर्म छत्रस्यान्मंडल
गृहे। अन्ये तु पुनः सर्वकर्म मंडलगृहे कुर्वन्तीति वृत्तो। अन्ये तु दध्यादिप्राशनान्तं कर्म स्थानां
तरे कृत्वा दूर्वारसप्रक्षेपणार्थं स्थानान्तरं मंडलागारे एनां पत्नीमुपवेश्य विधानं कुर्यात्। २९

एतच्च अनवलोभनं कर्म पृथगिति वृत्तिकारः। अनवलोभनं नाम येन कर्मणा पुंस्त्वे जाते ना
वलुप्येते तत्। आपैस्तु पुंसवनमनवलोभनमिति कर्मद्वयं मंडलागारे कुर्वन्ति। कात्यायनेन क
र्मद्वयमेकस्मिन्ने कर्मणि इष्टव्या प्राचीनानां तु पुंसवनं। दूर्वारसप्रक्षेपणात्मनवलो
भनमिति। तत्रायं विवेकः। पुंसवने गृह्यान्तरे भवति। एकदेशोच्चरोऽडुला प्रजापतनु इत्यथ
। यत्ते सुसीम इत्युक्ताह हृद्दशं पाणिनालभेत्। न वा स्विष्टकृदादि स्यात्। स्यात्तु निर्देशबाध
वा। कर्त्ता स्याद्देवरस्तस्य तस्याः पत्युरसंभवे। आवर्त्तेत इदं कर्म प्रतिगर्भमिति स्थितिरि
ति॥३॥ ॥अस्यार्थः॥ ॥स्विष्टकृतादिकर्म यथापूर्वं समापयेत्। अपनध्यातंत्रे न क
र्त्तापतिः स्यात्तदसंभवे तदसंनिधाने देवरः। अस्य कर्मणः कर्ता देवरः। यदि तस्याः प
तिसन्निहितो न स्यात्। इदं कर्मद्वयं पुंसवनं अनवलोभनं च प्रतिगर्भमावर्त्तेत। प्रतिगर्भे
कुर्यादित्यर्थः। इति पुंसवनमनवलोभनं च समाप्तं॥ ॥अथ सीमन्तोन्नयनमभिधातुमु
पक्रमते। चतुर्थे गर्भमासे तु सीमन्तोन्नयनं भवेत्। पूर्वस्यासंभवे षष्ठे मासे वाष्टमे भ
वेत्। पुन्नक्षत्रे सितेपक्षे त्वन्वाधानादि पूर्ववत्॥ ॥अस्यार्थः॥ ॥गर्भमासे गर्भसहितो

Indira Gandhi National
Centre for the Arts

मासः गर्भमासः चतुर्थे संख्यानियमितश्चतुर्थः तस्मिन्चतुर्थे गर्भमासे सीमंतोन्नयनं कर्म भ
वेत् । सीमंतो यस्मिन्कर्मणि उन्नीयते क्रियते तत्सीमंतोन्नयनं । अस्य कर्मणः प्रतिगर्भमावृ
त्तिर्नास्ति । स्त्रीसंस्कारत्वात् । सीमंतोन्नयनाख्येन कर्मणा स्त्रीसंस्कार्यो भवति । नात्र गर्भसं
स्कारः । नेजमेष इत्यादिऋक्त्रयमध्ये एवं त्वं गर्भमाधेहीति मंत्रलिंगात् । किंच । गर्भस्या
धारभूतायाः पत्न्याः सीमंतोन्नयनकर्मणा संस्कृतत्वात् । सकृदपि संस्कृता इयं वधूः यं यं
गर्भं सूते स स गर्भः संस्कृतो भवेत् । पूर्वस्य चतुर्थस्य मासस्यासंभवे कच्चु मनुवत्सरे षष्ठे
मासे भवति । तत्राप्यसंभवे अष्टमे मासे भवेत् । तथा च ज्योतिर्वसिष्ठः । चतुर्थे सप्तमे मासि
षष्ठे वाप्यथवाष्टमे इति । तत्रापि पुंनक्षत्रे शुक्लपक्षे एतत्कर्म भवति । पुंनक्षत्राणि चैतानि ति
ष्यो हस्तः पुनर्वसुः । अभिजित्पौष्ण्यमूले च अनुराधाश्च पुंकृतथा । ऋक्षस्य मध्यमे पादद्वये
कर्मेदमिष्यते ॥ अस्यार्थः ॥ अत्रोक्तानामष्टसंख्याकानां तिष्यो हस्तः श्रवण इत्यादीनां पुं
नक्षत्राणां मध्ये षष्टिघटिकात्मकयोः द्वंद्वं कर्म भवति । शुक्लपक्षे कस्मिंश्चित्पुंनक्षत्रे तत्राप्य
नुकूले चंद्रमसि भवति । तथा च गृह्यसूत्रे । आपूर्यमाणपक्षे यदा पुंसा नक्षत्रेण चंद्रमा १०

युक्तः स्यादिति । सूत्रार्थस्त्वयं । आपूर्यमाणपक्षे इत्यनेन शुक्लपक्षे भवति । उक्तानां पुंनक्षत्राणाम
न्यतमेन नक्षत्रेण चंद्रमा युक्तश्चेत् पुंनक्षत्रेणापि युक्तः सन् अनुकूलश्चेत् इष्टश्चेत्तदा एतत्कर्म भवति
। शुक्लपक्षपुंनक्षत्रचंद्रानुकूल्यमित्यादिनिश्चयानिमित्तेन शुभे मुहूर्त्ते नियमेन तत्कर्म भवतीति
ज्ञापनार्थमादावेव कारिकाकारेण पूर्वस्यासंभवे । यदि चतुर्थे गर्भमासे शुक्लपक्षादियोगस्या
संभवे षष्ठमासे भवति । तत्राप्यनस्य योगस्यासंभवे अष्टमे मास्येव भवति । इति प्रायेण पक्षत्रय
मंगीकृतं । यस्मिन्काले विरोधोस्ति ज्योतिःशास्त्रागमोक्तयोः । ज्योतिषानां विहायेव वक्ष्कानि नोदि
तमाचरेत् । प्रयोगशास्त्रविहितकालो यत्र न लभ्यते ॥ विधिने ज्योतिषतंत्रविहितकालविरोधत
इति काश्यपाजिनिरुक्ता प्रसवात्सीमंतकाल इत्याह । गर्भे लंघनमारभ्य यावत्स प्रसवस्तदा
। सीमंतोन्नयनं कुर्यात् छंदोगस्य वत्नं यथेति । मासश्चात्र सौरसावनयोरन्यतरो गृह्यते । सो
रत्नावदुक्तकालविधानात् चतुर्थषष्ठाष्टममासि ग्राजिसारेण गर्भे प्रथमं विधेयं । सीमंतक
मांद्विजनामिनीनां मासेष्टमे विद्युज्ज्वलितं कुर्यात् । तत्रायं विधिः । पूर्वेद्युः तथैव स्वस्तिवाच
नासुदयिके कृत्वा स्वकुलाचारानुसारेण लोकव्यवहारानुसारेण च कुलधर्माचारप्रासि

Indira Gandhi National
Centre for the Arts

द्वाभिः पुण्यस्त्रीभिः आज्ञापितं यद्यत्सर्वकर्म गर्भिणीकारयित्वा कर्त्ता पतिरपरेद्युः कृतमं
गलस्नानः सालंकृतः सन् प्रातरौपासनं हुत्वा तस्मिन्नेवाग्नौ अन्वाधानं कुर्यात्। प्राणानायम्य
शुद्धे आसने उपविश्य एवं गुणविशिष्टायां शुभतिथौ स्त्रीसंस्कारद्वारेण गर्भसंस्कारार्थं सीमं
तोन्नयनं करिष्य इति संकल्प्य तदंगमन्वाधानं क्रियमाणं धाता राका विष्णुः प्रजापतिः प्रधा
न देवताः आज्यद्रव्येण निविशेषः। एवमन्वाधाय प्राग्रीवं [illegible] पूर्धलोमस्या
ह्युरुगानडुहाजिनमिति॥६॥ अस्यार्थः॥ ॥ततः अन्वाधानानंतरं रुषभचर्मास्तीर्य [illegible]
कप्राग्रीवं। पूर्वग्रीवा यस्य तत्तदुर्धलोमानि यस्य तत्तथा एवं चर्म प्रसृत्य पश्चिमभागे [illegible]
स्तीर्य। आज्यहोमेषट्पात्रासादनप्रकारमाह। प्रोक्षणीस्रुवमासादोनेमसंवाज्य [illegible]
नं। इध्मा बर्हिरयं प्रोक्त आज्यहोमेष्वयं क्रम इति ॥७॥ अस्यार्थः॥ ॥पात्रद्वयं द्वयं गृहीत्वा
आसादनं भवति। तत्रायं क्रमः। प्रोक्षणीपात्रं दक्षिणहस्तेन गृहीत्वा स्रुवं च वामहस्तेन गृ
हीत्वा आसादयेत्। पूर्णपात्रमाज्यपात्रं च गृहीत्वा आसादनं। तथैव इध्मबर्हिषोरासा 
दनं। एवमाज्यहोमेषु सर्वत्र षट्पात्रप्रयोगः। आज्यासादनपर्यंतं पवित्रकरणादि यथैति।

प्रोक्षणीपात्रोदकेनापूर्यैतयैव गंधपुष्पाक्षतां निक्षिप्य [illegible] नस्तरतः स्थाप्य ४

अस्यार्थः॥ ॥पात्रासादनानंतरं उक्तरीत्या पवित्रद्वयं संपाद्य प्रोक्षणीपात्रमुत्तानं कृत्वा
तथैवोदकपूरणं च कृत्वा गंधपुष्पाक्षतान्निक्षिप्य पवित्रद्वयेन प्रोक्षणीपात्रोदकं त्रुली
त्रिरुत्पूय पात्राण्युत्तानानि कृत्वा इध्मं च विस्त्रस्य तेनोदकेन पुनः प्रोक्ष्य तत्पवित्रद्वयं प्र
णीतापात्रे निधाय आसनोग्रतः स्थाप्य तदेव पवित्रद्वयं आज्यपात्रे निधाय तदाज्यपात्रं
उत्तरतो अंगारेषु निक्षिप्य उल्मुकेनावज्वाल्य दर्भाग्रद्वयं निःक्षेप्य तेनैवोल्मुकेन त्रिः पर्यग्नि
करणं कृत्वा तेन पवित्रद्वयेन तदाज्यमुत्पूय सकृन्मंत्रेण द्विस्तूष्णीं तदाज्यं बर्हिषि स्थाप्य तत्प
वित्रं प्रोक्ष्याग्नौ प्रहरेत्। एतावत्कर्मकलापं कृत्वा। यथाप्रथा पविष्टाः समन्वारब्धप-
त्नेपतिः। स्यादाज्यभागपर्यंतं [illegible] मिध्माधानादिपूर्ववत्॥८॥ अष्टावाज्याहुतीर्हुत्वाम
त्रैर्धाताददातिति। अस्यार्थः। अथ बर्हिषि आज्यभागपर्यंतं हुत्वा। तत्र पूर्वं स्रुवसंमार्जन
म० ग्न्यलंकरणं च कृत्वा ततः इध्माधानादिकं कर्म कुर्यात्। पश्चात् धाताददातियादिभिर्मंत्रै
रष्टावाज्याहुतीर्जुहुयात्। धाता ददातु दाशुष इति द्वाभ्यां मंत्राभ्यां राकामहमिति द्वाभ्यां
नेजमेषेति तिसृभिः प्रजापते न त्वदेतान्यन्य इत्येकया। एवमष्टसंख्याकैर्मंत्रैः आज्याहुती

Indira Gandhi National
Centre for the Arts

र्डुत्वा। फलवत्स्तबकौ ग्राह्यौ त्रिःशुक्ला शलली तथा। त्रीणि स्युः कुशपिंजूलान्येनिरेकी कृते
रथेति॥ त्रिर्व्यूहेद्यथ सीमंतमाभूर्भुवःस्वरोम्॥१०॥ चतुर्वा व्यूहनं कार्यं सूत्रकारवचो
यथा। आवत्तेनेत्वयं मंत्रः सर्वत्र वप्रतीयत इति॥११॥ अस्यार्थः॥ आज्यहोमानंतरं फलव
त्स्तबकौ उडुंबरवृक्षस्यैकस्मिन्वृंते संलग्नौ फलगुच्छौ ग्राह्यौ। तथाच शौनकः। औडुंबर
स्तबकं युग्मपक्वफलान्वितमिति। शलली त्रिःशुक्ला स्थानत्रये श्वेता शललाख्यप्राणिनः
शललीव ग्राह्या। त्रीणि कुशपिंजूलानि त्रीणि कुशपत्राणि एतैः सर्वैः एकी कृतैः
र्मिश्रितैर्हस्ते नु धृत्वा। अथ पत्न्याः मूर्धानं मर्यादीकृत्य सीमंतं भ्रुवोर्मध्यदेशमारभ्य मू
र्धांतं त्रिर्व्यूहेत् घर्षयेत्। भूर्भुवःस्वरोमिति मंत्रेण। एतस्य मंत्रस्यावृत्तिर्भवति। अथवा सूत्र
कृन्मतमेवलंब्य चतुर्वारं व्यूहनं तथैव चतुर्वारं मंत्रावृत्तिः। कर्त्तव्या। एवं सर्वत्र व्यूहने प
तीतिर्भवतीति। संप्रेष्यसोमं राजानमिति प्रेषेण गाथिनौ। सोमो न इति गायेतां तोस्थाने
ऽसौपदस्य तु॥१२॥ ॥ समीपे या नदी तस्या नाम गंगा सरस्वती। इति। अस्यार्थः॥ ॥ तताय
जमानः वीणागाथिनौ। वीणाचगाथाश्च वीणागाथे ययोस्तौ। तथोक्तौ ब्राह्मणौ प्रतिसोमं ७२

राजानं संगायतामिति प्रेषेण आज्ञारूपेण मंत्रेण संप्रेष्य आज्ञाप्य इमं प्रेषं श्रुत्वा तौ च
विप्रौ सोमो न इत्यादिमंत्रं गायेतां। मंत्रे असौपदस्थाने निकटवर्तिनी समुद्रगा या नदी त
स्या नाम संबुध्यानि दिनानि। सच मंत्रः सोमो नो राजावतु मानुषीः प्रजाः निविष्टचक्रा
सावितिः। अत्र मंत्रे निविष्टचक्रा गंगे इति। निविष्टचक्रा सरस्वति इत्यादि भवति। ततः स्वि
ष्टकृदादिस्यादीयते वृषभस्ततः। ब्रह्मणे तदभावे तु ब्राह्मणेभ्यः प्रदीयत इति॥१३॥ ॥
अस्यार्थः। ततः स्विष्टकृदादिहोमं संसमाप्य ततः होमांते पर्यूहनपर्युक्षणे कृत्वा कर्म समाप्य
यत्। ततः कर्मांगदेवतातुष्ट्यर्थं वृषभो दक्षिणा ब्रह्मणे दद्यात्। तदभावे ब्राह्मणेभ्यः। यद्वा
पदिवा दृद्धा ब्राह्मणी सधव प्रजापत्नी कुर्यादिहापि स्यान्नांदीश्राद्धं पुरैव तु। नावर्त्तेत
इदं कर्म प्रतिगर्भमिति स्थितिः। अस्यार्थः। सधवा सन्तोका प्रजावती पुत्रवती वृद्धा ब्रा
ह्मणीय द्वदुपदिशेत् तत्सर्वं गुर्विणी कुर्यात्। ततादिति कुलधर्ममिति। अस्मिन्नपि नांदी
श्राद्धं पूर्वं कर्त्तव्यमेव। तदग्रे वक्ष्यति। गर्भे गर्भे प्रतिगर्भं सीमंतोन्नयनं कर्म नावर्त्तेत। इति
स्थितिः व्यवस्था। सीमंतादिने तद्दहेनो कुर्दोषमाहुपरावारः। ब्रह्मौदनेन सामेव सीम

Indira Gandhi National
Centre for the Arts

तोन्नयनेन यथा।जातश्राद्धेन वश्राद्धे तुल्कास्वांड्रायणं चरेत्।अथोदनाख्यं कर्म आधानांगन्न
तं सोमसाहवयोत्।प्रथमगर्भे सीमंतस्य प्रयोजनमाहाचार्यः।पत्न्याः प्रथमजं गर्भं मान्न
कामाः सुदुर्जनाः।आयांति काश्चिद्राक्षस्यो रुधिराशनतत्पराः।तासां निरसनार्थाय
श्रियमावाहयेत्सतिः।सीमंत कारणा लक्ष्मीस्तामावहति मंत्रतः॥श्रियाश्रितनारी
रत्यातांस्तर्जंतीहमोहिनाः।अकृतसीमंताया प्रसवे विशेषमाह सत्यव्रतः।स्त्री यद्य
कृतसीमंता प्रसूयेत कथंचन।पुत्रं गृहीत्वा विधिवत्पुनः संस्कारमर्हति।गार्ग्योपि
।यदि सीमंततः पूर्वं प्रसूता वेत्कुलामिनी।तदानीं पेटकगर्भे स्थाप्य संस्कारमाचरेत्।
अत्राष्टमे मासि विष्णोः पूजां कुर्यात्।तथा च संग्रहे।वैष्णवोह्यष्टमे मासे विष्णुर्गर्भे
स्पदेवता।बलिं च तूष्णीं वा कुर्याद्गर्भरक्षापरितुष्टये इति॥ ॥इति सीमंतोन्नयनं॥ ॥
अथ जातकर्म॥ ॥जाते पुत्रे पिता स्नात्वा नांदीश्राद्धं विधानतः।जातकर्म ततः कुर्यादन्ये
रालंभनात्पुरेति॥१६॥ ॥अस्यार्थः॥ ॥पुत्रोत्पत्त्यनंतरं पुत्रग्रहणं कन्यकानिवृत्य
र्थं।ततः पिता सचेलमेव स्नात्वा विधानतः सांगं नांदीश्राद्धं कुर्यात्।हिरण्यात्मपदं विधि

मेव भवति।यथा व्यासः।द्रव्याभावे द्विजाभावे प्रवासे पुत्रजन्मनि।हेमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्व
ला।आमश्राद्धं न दद्यात्तु पृथक् द्विजाभावे द्रव्याभावे ब्राह्मणेष्वपि।यस्मात्त्वां ड्रायणा बुधैः तेषां
भवति नान्यथा।जातकर्मकालमाह गार्ग्यः।जातमात्रकुमारस्य जातकर्म विधीयते।स्तनप्रा
शनतः पूर्वं नाभिकर्त्तनतोपि वा।एष्वतीतेषु कालेषु शुभयोगे शुभोदय इति।नांदीश्राद्धानंतरं
जातकर्म कुर्यात्।यावदन्ये मनुष्याः जातमपत्यं न स्पृशेत्।तावत्सर्वमेव कर्त्तव्यमिति भावः।त
था च शौनकः।जातं कुमारं जननादन्यस्तं स्पृशेन्नातुरा स्नापयित्वा कुमारोऽप्य प्राङ्मुखं वाप
वेशयेत्।कुमारस्यान्यास्पृष्टत्वं नाम प्रसवसमयोपयोगिन्यस्त्रियो मुक्त्वापि तु रन्ये स्त्री
स्त्रियः।न स्पष्टव्यः पुरा नालच्छेदनात्।इत्यादि निरुक्तमिति।नांदीश्राद्धानंतरं प्राणानायम्य कु
मार संस्कारार्थं जातकर्म करिष्य इति संकल्प्य।एकस्मिन्भाजने सर्पिर्मधुनी समभानयेत्।
अव घृष्य हिरण्येन संसृज्येरन्।वाय थेति॥१७॥ ॥अस्यार्थः॥ ॥एकस्मिन्शुद्धे कांस्या
दिपात्रे सर्पिर्मधुनी।गव्यं घृतं शुद्धं मधुना सममानीय तत्तत्र द्रव्यद्वयं हिरण्येन सुवर्णेन वा
रंवारं संघर्षयेत्।यथा हिरण्यपरमाणवः संसृज्येरन् मिश्रीभावं प्राप्नुवंति।शौनकोपिम

Indira Gandhi National
Centre for the Arts

नतो विषमे कृत्वा संसृज्य मधुसर्पिषी॥ सिक्ता शलायां तत्रैव सुवर्णं तदूषः कषन्। मधुसर्पि
:सुवर्णानि मिश्रीकृत्य साथ खलिकी॥ हिरण्येन कुमारं तं प्राशयेन्मधुसर्पिषी। प्रतेददामिमंत्रेण
मातुरुत्संगआस्थितमेति॥ ॥अस्यार्थः॥ ॥मधुसर्पिषी हिरण्येन गृहीत्वा तं कुमारं प्राशयेत्
।तत्र मंत्रमाह। प्रतेददामीत्यादिमंत्रेण। कीदृशं कुमारं। मातुरुत्संगआस्थितं स्थापितं तं पिता
प्राशयेदिति। मंत्रस्तु। प्रतेददामि मधुनो घृतस्येत्यादिकाऽस्त्वं। उक्तानि सुवर्णेन तेनैव प्रा
शयेच्छिशूनिति। हिरण्यं दक्षिणकर्णे निधाय नामत्र्यं जपेत्। मेधां त इति सव्ये च। निधायेनामत्र्यं
जपेत्॥१७॥ ॥अस्यार्थः॥ ॥तदेव हिरण्यं बालकस्य दक्षिणकर्णे स्थाप इत्याद्यतां ऋचं जपेत्।
मेधां त इति मंत्रं जपति। तत्र मंत्रः। मेधां ते देवः सविता मेधां देवी सरस्वती। मेधां ते अश्विनौ देवा
वाधत्तां पुष्करस्रजाविति। तथैव तदेव हिरण्यं सव्येऽपि कर्णे निधाय मेधां त इत्येतामेव ऋचं जपे
त्। यत्नो नु तस्य कुमारस्य मुखसमीपे आत्मनो मुखं निधाय जपति। सूत्रे उपनिधायेत्युक्तत्वात् 
ऋक्त्रयेणास्य युगपदंसावभिमन्त्रोदथ। प्रथमाश्मा भव तीदश्रेष्ठानीत्यपरा तथा॥ २०॥ नती ２४
यास्मै प्रयंधीति कुमार्यैस्यादमंत्रकामिति॥ ॥अस्यार्थः॥ ॥अथ ऋक्त्रयेण अस्य असौ युगप

दभिमन्त्रोत्। स्तनबाह्वोर्मध्यप्रदेशो अंसाइति वृत्तिकारः। अश्मा भवेत्यादिसूत्रेण ऋक्त्रयं पठि
त्वा अस्य बालकस्य अंसद्वयमभिमन्त्रानीत्यर्थः। इह तु वाक्यने युगपदंसौ स्पृष्टुं प्रथमा ऋक्
अश्मा भव परशुर्भव त्येषा। इंद्रश्रेष्ठानि द्रविणानि धेहीति या। अस्मे प्रयंधीति तृतीया। अत्र
बहुधा विप्रतिपन्नाः केचन सकृन्मंत्रं पठित्वा पर्यायेण अंसाभिमन्त्रणं वदंति। अन्ये तु मंत्रवि
भागं कृत्वा अंसाभिमर्शनं कुर्वंति कथं। अश्मा भवेत्यनेन दक्षिणमंसमभिमन्त्रोत्। इंद्रश्रेष्ठा
न्यस्मे प्रयंधीति द्वाभ्यां सव्यमंसमभिमन्त्रोत् सूत्रे तु सजीवत्वात् रःत्वात मिति इंद्रश्रेष्ठानीति ऋक्
त्रयमध्ये इति करणान्मंत्रविभागो बलीयान्। अपरे तु सकृदेव मंत्रं पठित्वा अंसाभिमर्शनं
वदंति। न च मंत्रविभागः। न च पृथगमवमंत्राः। एवं पक्षत्रये विद्यमानेपि त्रयाणामपि पक्षाणा
मन्यतमं पक्षमवलंब्य कर्म कुर्वतो न दोषः। सर्वेषांगमकत्वात्। तेनात्र त्रीन् मंत्रान् सकृदुक्त्वा
युगपदेवांसावभिमन्त्रोदिति भगवता भाष्यकारेणायं पक्षः परिगृहीतः। स एव सम्यगिति। ए
तच्च जातकर्म कुमार्या अमंत्रकं भवति। तच्चाव श्यमेव कर्तव्यं न त्वाहमनुः। अमंत्रका या
यं स्त्रीणां विधिरशेषत इति। अत्र भगवान् मंत्र मश्मा भवेत्याद्यमुक्तो सौ युगपच्छिवाः स्प

Indira Gandhi National
Centre for the Arts

द्वानथैं इश्रेष्ठानि द्रविणान्यादिकामन्त्रं । अस्मे प्रयंधीत्यायान्त्वं जपित्वा सो पुनरस्य त्वोत्ता । इदं
कर्म कुमार्योश्च सर्वं कार्यममंत्रकामिति । कुमार्या मधुसर्पिप्राशने अस्माभिमन्त्रेन पितृमंत्रः
तूष्णीमेव भवति । केचन पत्न्यास्तनं प्रक्षाल्य इमं कुमार इत्यादिमंत्रं पठित्वा आयुर्वर्चो यत्नो
बलमिति दक्षिणं स्तनं प्रदाप्य स्तनपानं कारयंति । तदेतत्कर्म अस्म शास्त्रे नास्ति शाखांतर
विषयमिति ज्ञातव्यं । अत्र कुमारस्य मेधादि पानस्य प्रयोजनमाहाचार्यः । गर्भांबुजं दोषाणा पा
मुपनुत्त्यै नाशं पिता । प्राशयेन्मधुनासार्धं साज्यं हेमर संशुभं । स्वर्णन कर्णयोर्युग्मस्य अंशा
तोनादेवतात्रिन्नाः । मंत्र एवत्व योग्यत्वस्याच्च दुर्वासः श्रुतिः । मंत्रोल्लजनमात्रेण श्रुतिस्यान्म
लवासमः । रसायुर्वोर्विहृ ध्यंधं अजिघ्राति पिता सुतं । तावन्नाभिस्मरेत्तस्य स्तनं माताथ
पाययेत् । प्राक् जातकर्मणा यस्मात् स्तनपानं दुष्टस्य तदिति । इदमपि होमपूर्वं कुर्यादिति के
चिद्वदंति । नसत्कारमाहमगवान् । केचित्स होमकर्मापि कर्मछंति मनीषिणः । तत्साक्षात्कृत्वा पुन
स्तत्रमनोदेत्रा । द्रुतीस्ततः । कृत्वा ग्निरिंड इत्यादि देवता पंचकस्य च । पश्चात्कर्म दमान्वायस्ति ७५
नस्विष्टकृता कृदादिकं । उपरिष्टात्तनं तंत्रं कुर्वीरंश्च यथाक्रममिति । जयंतोपि । यत्तु होममि

च्छंति तेनादत्ताज्याहुतीर्हुत्वा स्विष्टकृदादि होमशेषं समापयेत् । जातकर्महोमे त्वग्नि निर्णयमाह
संग्रहकारः । जातकर्मादिसिद्ध्यर्थं यो व्याहृतिभिराहृतः । सो ग्निः पौरुष इत्युक्तः त्वालाग्नि लौ
किकस्तथेति । अत्र परिस्तरणादि नास्ति । अनादिष्टाज्यहोमेषु तत्र नित्पाप रिस्तरणमिति परिभा
षाव्यचनात् । जन्मकाले दानं तु हेमदानफलानि दायकुर्व्यात् । तत्र वराहपुराणे । यावत्कालं सुते जाते
ननालं छिद्यते नृप । चंद्रसूर्योपरागेण तमाहुः समयं समं । जननाशौचं तावन्मप्याहुर्जैमिनिः
या वन्न छिद्यते नालं तावन्नाप्नोति सूतकं । छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते । जन्मदिव
से प्रतिग्रहीतुः प्रतिग्रहनिषेधाभाव उक्तो व्यासेन । जाते कुमारे तदहः कामं कुर्यात्प्रतिग्रहं । हिर
ण्यधान्यगोवासस्तिलान्नगुडसर्पिषां ॥ ॥ इति जातकर्म ॥ ॥ अथ नामकरणं ॥ ॥ द्वादश्यां
नामकरणं नांदीश्राद्धे कृते भवेत् । पुंसां युग्माक्षराणि स्युर्विपरीतानि योषितामिति ॥ २१ ॥ ॥
अस्यार्थः ॥ ॥ जन्मदिनमारभ्य द्वादशे दिने नांदीश्राद्धं कृत्वा नामकरणं कुर्यात् । उक्तं च मनुना
। नामधेयं दशम्यां तु द्वादश्यां वापि कारयेत् । पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते इति ।
व्यासः ॥ नामधेयं दशम्यां तु केचिदिच्छंति सूरयः । द्वादश्यामाहुरन्ये तु मासे पूर्णे तथापरे । अष्टा

Indira Gandhi National
Centre for the Arts

दत्तोहनि तथा वदंत्यन्ये मनीषिणः।प्राप्तकालेपि निषेधमाह गर्ग्गः॥ ॥व्यतीपाते च संक्रान्तौ ग्रह
णे वैधृतावपि।श्राद्धं विना शुभं नैव प्राप्तकालेपि मानवः।अन्यच्च।अमासंक्रान्तिविष्ट्यादौ प्रा
भकालेपि नाचरेत्।कुमाराणां युग्माक्षराणि समाक्षराणि स्युः।कुमारीणां तु।पक्षो घोषवदि
त्यादिरेवकारादनादृतः।स्वस्त्यस्मै देवदत्ताय ब्रूतेति ब्राह्मणानूवदेत्॥२२॥नामाभिवादनीयं
च पित्रोर्हृद्योपनीतिनदिति॥ ॥अस्यार्थः॥ ॥घोषवदादिः पक्षस्सूत्रकारेणोक्तः।घोषवदत्र
त्रप्रातिशाख्ये।वर्गाणां प्रथमा वर्णा द्वितीया ऊष्मसंज्ञकाः।हकारवर्जोश्चाघोषाः शिष्टं घोषव
दुच्यते।अयमर्थः॥ ॥प्रतिवर्गं प्रथमद्वितीयवर्णाः ऊष्मसंज्ञकाः शषसहाश्च हकारं वर्ज
यित्वा अघोषवंतः।शिष्टं घोषवदुच्यते।अवशिष्टं वर्णजातं घोषवत्।कथं वा नाम कर्त्तव्य
मिति घोषवद्वर्णजातं आदौ यस्य नाम्नः तत्तथोक्तं।रुद्रदेवः भवदत्तादि।आदिशब्दादन्तर
मपि।गृह्य।घोषवदाद्यन्तरन्तस्थमभिनिष्ठानान्तमिति सूत्रार्थः।घोषवदादिनामसमासस्त्वनव
नितद्धर्मीतं।अन्तरस्थमपि भवति अन्तः नाममध्ये अन्तस्था वर्णा यस्य यरलवा इति।तथा चतुर
नितद्धर्मीतं।अन्तरस्थमपि भवति।पुनः कथंभूतं अभिनिष्ठानान्तं।अभिनिष्ठानो वि ७६
दसरं कर्त्तव्यं।शिवदत्तः पुरंदरः विनायकः।

सर्जनीयाः अन्ते यस्य अः इति।यथा अत्रैवदर्शितं।द्व्यक्षरं चतुरक्षरं वा।द्व्यक्षरं प्रतिष्ठाकामः चतुर
क्षरं ब्रह्मवर्चसकामः।युग्मानि त्वेव पुंसां अयुग्मानि स्त्रीणामिति सूत्रार्थः।युग्मानि त्वेवेत्यत्र
एकारेण समाक्षरं नाम नियम्यते।अत्र एवकार अवधारणार्थः।न पूर्वाणि लक्षणानि।तस्मात् घो
षवदादित्वस्य अनादरो वा।त्वं जनार्दननामासि।ततो ब्राह्मणान्प्रति अस्मै जनार्दननाम्ने कुमा
राय स्वस्ति भवन्तो ब्रुवन्त्विति वदेत्।तथैव तेपि ब्रूयुः।ततो व्यवहारार्थं नाम कुर्यादिति नियमेन व्य
वहारनाम्नि कृते सति अभिवादनीयं नक्षत्रं नाम वर्त्तव्यमिति।यथारेसं आवदनादौ अ
ग्निं गुरुं च नमस्करिष्यति।अनेनैव नाम्ना।येन नाम्ना उपनयनानन्तरं अग्न्यादिदेवानाचार्यादीश्च
अभिवादयति।तच्च समीक्षेत कुर्यादित्यर्थः।तन्मातापितरावेव विजानीयातां।कोपि यथा न शृण्वंति
तथा कर्त्तव्यं।व्यवहारिकनामकृता अभिवादनीयं कर्त्तव्यं।तत्तु तस्या गुरतो वक्तव्यं।ननत्रानीवे
चनं भवति।यथा व्यवहारनाम गृहीत्वा अस्मै जनार्दननाम्ने स्वस्त्यस्त्विति तथात्रापि नेभवती
त्यर्थः।ननु पित्रोर्हृदि आ उपनीतेः उपनयनपर्यन्तं नाम मातापितृभ्यामेव वेदितव्यं।उपनीतस्य
आचक्षते।अनेन नाम्ना अभिवादयस्वेति।अत्र भगवान्।येन नाम्नोपनीतः सोकरिष्यति

वादनं। तच्चास्मिन्नेव समये कर्त्तव्यं सौनामकर्मणः। अभिवादननामेदमस्येत्याभ्यवेनसा। उपा
सुनिर्दिवाश्चैव जानीयुर्यथा परे। नक्षत्रनामोपनयने स्मरेतां पितरौ शिशोः। स्त्रीणां तु स्युः युग्मा
क्षराणि नामधेयानि भवंतीति। यथा सुभद्रा सावित्री वसुदेवानि नामानि भवंति। इदमपि
कर्मवेदि त्स होमकं इति भवेत्। तस्य होमप्रकारमाह भगवान्। अत्रापि होमवत्से जानकर्मो
वदादितः पुरस्तात्तंत्रमाज्यभागैः कृत्वा नादेशा आहुतीः। नूनं त्वैव पुण्याहप्रकारेण यथापूर्वं।
नामाधिसितं मध्यायं ततः स्विष्टकृदादिकं। उपरिष्टात्तंत्रं कुर्याच्चैव यथाक्रमं। कुमार्याश्चैव द
मन्त्रवत्कर्म कुर्यादमंत्रकमिति। अस्मिन्कर्मणि गुरुमूढादिदोषानास्तीत्याह बृहस्पतिः।
यस्याः क्रियायाः सर्वोक्तः कालो मासो दिनेरपि तस्यां न दोषमूढत्वं वक्रं वाजीवशुक्रयोः। मुहू
र्त्तसंग्रहे विशेषउक्तः। पूर्वोक्तः अश्वइत्युक्तो मघाक्षोमघ मस्मृतः। अपराह्णं च रात्रिं च वर्ज्ज
येन्नामकर्मणि॥ ॥इति नामकरणं॥ ॥अथ निष्क्रमणं॥ ॥चतुर्थे मासि पुण्यर्क्षे शुक्ले निष्क्र
मणं भवेत्। स्नातं स्वलंकृतं चाभिनंदितस्वस्त्ययनं शिशुं॥ ॥आदाय नेहाभिनिष्क्रम्य गच्छेयुर्दे
वतालयं। अभ्यर्च्य देवतां सम्यग्वाशिषो वाचयेदथ। कृत्वा प्रदक्षिणं गेहमानयंति ततस्वक २१

मिति॥२॥ अस्यार्थः॥ ॥जन्मदिनमारभ्य चतुर्थे मासि पुण्यर्क्षे पुण्यनक्षत्रे शुक्लपक्षे अनुकूलदिने
शिशोर्निष्क्रमणं भवेत्। तत्रायं विधिः। बालकस्य स्नानालंकरणादिकारयित्वा स्वस्तिवाचनपूर्व
कं तं बालकमादाय पित्रादयो ब्राह्मणपुण्यस्त्रीभिः सह गृहान्निष्क्रम्य देवतालयं गच्छेयुः। देवतां
सम्यक्संपूज्य ब्राह्मणैराशिषो वाचयित्वा देवालयं प्रदक्षिणीकृत्य ततः स्वकं गेहमानयंति। नीरा
जनादिकृत्यं लोकव्यवहारानुसारेण। मातृपक्षस्य गृहे यद्वा मातुलादिगृहं नयेत्। तदात्री देवना
द्यैः स्याद्दीर्घायुरभिनंदितः॥२४॥ जयंतस्य मतेनायं लिखितः शिशुनिष्क्रमः॥ ॥अस्यार्थः॥
ततः मातृस्वसृगृहे मातृस्वसृगृहं प्रति बालको नेतव्यः। यद्वा बालकं मातुलादिगृहं नयेत्।
तेषां मात्रीर्वंदनाद्यैरभिनंदितः दीर्घायुः स्यादित्यादिकमेव प्रशंसा। अथो पुनः स्वगृहमानी
य महोत्सवं ब्राह्मणभोजनं कुर्यात्। अयं शिशुनिष्क्रमः जयंतमतानुसारेण निरूपितइति
अत्र भगवान्। मासे चतुर्थे षष्ठे वा शिशोर्निष्क्रमणं गृहात्। विदधीतास्य पित्रादिर्हिते वीय
श्च रसकः। पूर्वपक्षे शिशोर्जन्मनक्षत्रानुगुणे शुभे। नक्षत्रे गुणसंपन्ने तिथिवारादिसंयुते
स्नापयित्वा शिशुं पूर्वं भूषयित्वा ततो द्विजान्। भोजयित्वाथ तैः स्तोत्रैः कृतपुण्याहवाचनं। निर्ग

Indira Gandhi National
Centre for the Arts

॥पादेशश्च ततः स्थानान्निष्क्रमणं ततः॥ [illegible] मातुरङ्के मासमन्वंधो अप्याश्रयं दृढं॥
ततोपहारदानाद्यैराशिभिर्ब्राह्मणैः सेत ॥१॥

मध्यगृहाद्दर्शनीत्वाथोदेवतालयं।गंधमाल्यादिभिस्तत्र पूजयित्वाथ देवतां।प्रणमय्यवतं बालं
ततोदेवालयस्थितैः।विद्वद्भिर्ब्राह्मणैराशीर्वादो दद्यैरभिनंदितो कुमारं परिगृह्णैनं प्रापयेत्स्वगृ
हं ततइति॥ ॥इतिनिष्क्रमणं॥ ॥अथान्नप्राशनं॥अथपुण्येह्नि षष्ठे तु मासेनप्राशनं भवे
त्॥२७॥ ॥कृत्वाभ्युदयिकं श्राद्धं दधिमध्वाज्यसंयुतं।अन्नंतं प्राशयेदन्नपतइत्यादिमंत्रतः॥२८
कामयोगेन वाजादिपसोकं प्राशयेद्द्विजः।अमंत्रकमिदं कुर्यात्प्राशनं योषितामपि॥२९॥ ॥अ
स्यार्थः॥ ॥षष्ठमासे पुण्यदिने अन्नप्राशनकर्म कुर्यात्।अथप्रागेव स्वस्तिवाचनाभ्युदयिके कृत्वा
दधिमध्वाज्यं पुनत्रयं तत्संयुतमन्नं सुमुहूर्ते प्राशयेत्।अनेन मंत्रेण तस्यायं मंत्रः।अन्नपतेन्न
स्यनोदेह्यनमीवस्य शुष्मिणः।प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे।अनंतरं अमं
त्रकं वीजनादीनि प्राशयेत्।आजादिपसोकं गृह्यगतं अजादिमांसप्राशनं गुह्योक्तं नतत्का
मनया।इदमत्रगृह्यं।आजमन्नाद्यकामस्तैत्तिरं ब्रह्मवर्चसकामो घृतौदनं तेजस्कामः क्षीरो
दनं पशुकामः दध्योदनमिंद्रियकामः दधिमधुमिश्रमन्नं प्राशयेत्सार्वकामो भवतीति।कुमारी ३८

णां तु अनेनैव प्रकारेण प्राशनं मंत्रवर्जं भवति।अत्र भगवान्।जन्मप्रभृति षष्ठेस्य मासे
न्नप्राशनं नीराजः।प्रशस्तेहनि मौहूर्ते विहिते नरो ननेपिव।मुहूर्ते ब्राह्मणानन्नदानाद्यैः परि
पूज्य च।पुण्याहं वाचयित्वाथ गंधपुष्पाद्यलंकृतैः।उपवेश्यासने शुभ्रे प्राङ्मुखं बालमंतिके
अंके वा दधिमध्वाज्यमिश्रमन्नं सुसंस्कृतं।मंत्रेणान्नपतेन्नस्येत्यादिना प्राशयेत्सकृत्।यथे
ष्टं प्राशयेत्पश्चात्क्षोधयेन्मुखं नीराजः।इदं कर्म कुमार्याश्च सर्वं कार्यममंत्रकमिति।अत्र
होमपूर्वकपक्षे नक्रममाह सएव।होमपक्षाश्रयेचापि जातकर्मवदाचरेत्।वृद्धिश्राद्धं तु पू
र्वं घृतस्नास्मिन्पक्षे समाचरेत्।उत्तरे घृतकवधान कौतुकं यथाविधि देति।होमापदेशो यत्रा
स्ति न तु मंत्रोपदेशनं।तत्रानोद्दिश्य मास्य इति सूत्रकृतो मतं।नत्र जा।केना मु कर्मोन्नप्रा
शनादिषु होमस्यापि विधानेन ह्युना देनाहुतिर्भवेदिति।अन्नप्राशनानंतरं जीविका
परीक्षा कर्तव्येति मार्कंडेयेनप्रदर्शिता।अग्रतोथ प्रतिन्यस्य शिल्पभांडानि सर्वशः।शा
स्त्राणि चैव वस्त्राणि ततः पश्येत्तु लक्षणं।प्रथमं यत्स्पृशेद्बालः ततो भांडं स्वयं तदा।जीवि
कातस्य बालस्य तेनैव तु भविष्यति।अन्नप्राशनस्यकालांतराण्याह नारदः।जन्मतो मा

Indira Gandhi National
Centre for the Arts

सिषष्ठेस्यात्सौरेणोत्तमंमन्त्रदं।तदभावेष्टमेमासेनवमेदशमेपिवा।कुर्वीतप्रथमान्ना
न्नानंपुरं।संवत्सरोवासंपूर्णकेचिदिच्छंतिपंडिताः।शुक्रमौढ्यादिदोषोनास्तीतिविधिरत्रे
।बालान्नभोजनविधौगुरुशुक्रमौढ्यमासप्रयुक्तमशुभंत्वधिमासदोषः।नास्त्येवसावनवि
धाविदमासिषष्ठेयुग्मेत्वमासिपरतःशुभचंद्रपक्षे।इत्यन्नप्राशनकर्म।अथचौलकर्म॥ ॥
तृतीयेवत्सरेचौलंकुर्वीतास्योत्तरायणे।शुक्लपक्षेशुभदिनेकृत्वाभ्युदयिकंतथा॥३०॥ ॥
स्वस्त्यादिवाचयेत्पूर्वंऋद्धिपूर्तेषुकर्मसु॥ ॥अस्यार्थः॥ ॥जन्मतःआरभ्यतृतीयेवत्सरे
चौलकर्मभवति।चौलमितिकर्मनामधेयंभवति।अस्यकुमारस्येतिसंबंधः।तृतीयवर्षेसं
त्युत्तरायणेतत्रापिशुक्लपक्षेशुभनक्षत्रेज्योतिःशास्त्रोक्तानुकूलदिनेएतत्कर्मभवति।त
त्रपूर्वेद्युःअस्यकुमारस्यःकरिष्यमाणचौलकर्मांगभूतमाभ्युदयिकंकरिष्यइतिसंकल्प्य
यथोक्तमाभ्युदयिकंकृत्वाअपरेद्युःकर्त्तापिताकृतमंगलस्नानःअर्थप्राप्तस्वस्तिवाचनं
कारयित्वायथान्वयंकुलधर्मानुसारेण।कोयंकुलधर्मानुसारइति।केचिन्मतेउपनीत्या २९
सहउपनयनकर्मणासहचौलंभवति।यस्मिन्पक्षेचौलमुपनयनंचयुगपद्भवतितत्रचौ

लंकृत्वाउपनयनंभवति।तत्रपूर्वंस्वस्तिवाचनंविधिनः।ऋद्धिपूर्तेषुकर्मसुभवति।ऋद्धिर्मंगलं
तेनपूर्तानिपदिपूर्णानितेषुकर्मसुस्वस्तिवाचनंभवति।एतस्मिन्नेवकालेस्याद्व्रतस्नानोप
नायनं।३१।अन्यत्रापिविवाहस्यादितिसूत्रकृतोमतमिति॥ ॥अस्यार्थः॥ ॥एतस्मिन्ने
वकालइतिउदगयनआपूर्यमाणपक्षेकल्याणनक्षत्रेमहानाम्न्यादिगोदानांतानिव्रतानिवि
दव्रतानिसमावर्त्तनोपनयेत्वकुर्यात्।वर्षनियमस्तुभिन्नः।यथाअष्टमेवर्षेब्राह्मणमुपन
यीतेतिवाक्यात्।अत्रगृह्यं।उदगयनआपूर्यमाणपक्षेकल्याणेनक्षत्रेचौलकर्मोपनयन
गोदानाइति।एतत्कर्मलौकिकाग्नावोपासनाग्नौविनिस्थितिरिति॥३२॥ ॥चौलंउपनयनं
आद्योविवाहश्चयदात्वद्वितीयंविवाहंकरोतिविद्यमानभार्यःतस्मिन्नेवगृह्याग्नौकुर्यात्।व्र
तानिमहानाम्न्यादीनिस्नानंसमावर्त्तनंयेषांकर्मणांलौकिकाग्नाविनिस्थितिः।व्रीहिपूर्णश
रावंस्याद्यवपूर्णंतथापरं।माषपूर्णंतथान्यस्यात्तिलपूर्णंतथापरं।एतानिचशरावाणि
न्यसेदुत्तरतोनिलादिति॥ ॥अस्यार्थः॥ ॥पूर्णपात्रनिधानानंतरंएतानिचत्वारिशरावा
णिव्रीहीयवमाषतिलपूर्णानिकृत्वा।एकंशरावंव्रीहिपूर्णंअपरंयवपूर्णंअन्यंमाषपू

Indira Gandhi National Centre for the Arts

र्णं चतुर्थं तिलपूर्णमिति। एतानि त्रिलाये पितृरावाणि अनन्तात्। अग्नेरुत्तरदेशे क्रमेण स्थाप
येत्। ततः किं कुर्यादित्याह। कुमारो मातुरुत्संग आस्ते प्रसव्य विर्गुजः। अस्यार्थः॥ ॥मातुरु
त्संगं कुमार ह विर्गुजः प्रसगर्गः पश्चिमभागे तिष्ठेत्। अत्र चौलकर्मणि कुमारस्य प्राधान्य
मिति कुमारस्यैव स्वत्रेकादिकायामपि अग्नेः पश्चिमभागे उपवेशनं। यतः कुमारस्य चौल
मिति। कुमारस्तु मातुरुत्संगे आस्ते। अथानडुहमन्यस्मिन् शरावे गोमयं क्षिपेत्॥ ३५॥ ॥
शमीपर्णान्यन्यस्मिन् दृष्टो मातुः समीपतइति। अस्यार्थः॥ अनंतरमुपवेशनानंतरं अ
न्यत् शरावद्वयं मातुस्तथा कुमारस्य समीपे अयुतं स्थापनीयं। एकस्मिन् शरावे आनडुहं गो
मयं अभूमिस्पृष्टमिति जयंतत्रैनकौ वृषभसंबंधि गोमयं क्षिपेदिति स्थापयेत्। अपरस्मि
न्शरावे शमीपर्णानि शमीपत्राणि स्थापयेत्। मातुर्दक्षिणतो ब्रह्मा सहासम्भवसंभृच॥ ३६॥
कुशपिंजूलिकानां तु गृहीत्वा यदि वा पिता कुर्याद्दाघारूपयंतं माज्यसेकादि पूर्ववत्॥ ३७
इदमादौ चिवाहांतेनैवेष्टावाज्यभागकाविति। अस्यार्थः। कुमारस्य मातुर्दक्षिणभागे ब्र ४०
ह्मा तिष्ठेत्। यद्यस्ति ब्रह्मा न दा कुशपिंजूलकानां समेकत्रयं एकविंशति गृहीत्वा आस्ते।

तदभावे पित्रा वा कुशधारणं कार्यं। ततः आज्यसेकादि आज्यसेको नाम आज्यपात्रे आज्यप्रक्षे
पः। तदा किं कर्म आज्यसेकादि भवति। आघारपर्यंतं पूर्ववत्कुर्यात्। अत्र कर्मसु आज्यभागौ नैव का
र्यौ। इदं चौलादि भूतं कृत्वा विवाहपर्यंतेनैवेष्टो न समनो। इतरत्र कृताकृतौ। अत्र चौलादौ पक्षे भिन्
भवति। इदानीं प्रधानाहुतिवक्तुमाह। अग्न आयूंषि पवस इत्यग्नेः प्रजापतयइत्यृचा। स्रुवेणाज्याहुती
हुत्वेति॥ ॥अस्यार्थः॥ ॥ अग्ने आयूषीति तिसृभिः ऋग्भिः प्रजापतयइति त्वत्वा। स्रुवेण आज्याहु
तीर्हुत्वा॥ ॥शीतोष्णमस्य यथा नयेत्। पश्चात्स्थित्वा कुमारस्य शीता उष्णाश्च ताआपः॥ ३८ तथा पा
णिभ्यां भाजने तस्मिन् युगपन्निनयने दधि। उष्णेन वाय उदकेन हीसेनेनतद्भवेत् दिति॥ ४०॥ अ
स्यार्थः॥ ॥अथ हवनानंतरं एकस्मिन्पात्रे शीतोदकं पाणिभ्यां गृहीत्वा आनयेत्। यद्यप्यत्र पा
त्रपादोपादानं न कृतं तथाप्यत्र द्रवद्रव्यस्याधारमंतरेणानयनं न संभवतीति आधारत्वेन पात्रापे
क्षायां शिष्टव्यवहारात् सुधाधवलिते हरिद्राद्यलंकृते मृत्पात्रे नत्त उष्णमुदकं गृहीत्वा आनयेदि
त्यर्थः। ततः पिता कुमारस्य पश्चिमभागे स्थित्वा तत्ताः उभाभ्यां पाणिभ्यां गृहीत्वा केन चित्कर्मकु
शलेन गृहीते अन्यस्मिन् तथा अलंकृते पात्रे तनीयपात्रांतरे युगपदेव पाणिभ्यां गृहीत्वा क्षिपे

Indira Gandhi National
Centre for the Arts

त्वा मंत्रं पठित्वा तृतीयपात्रे शीतोष्णोदकप्रक्षेपः। केन मंत्रेण। उष्णेन वाय उदकेनेदि। एतावता
मंत्रेण क्षिपेत्। अनेन मंत्रेण उदकं निनयं भवेत्। एकदेशं गृहीत्वा सा नवनीतं घृतेन ततः द
ध्नो रससमुपादनेन। अस्ति चेत् नवनीतकं ॥४१॥ प्रदक्षिणं कुमारस्य शिरः त्रिः क्लेदयेत् तथा आ
रभ्य वामतः कर्णप्रदेशात् क्लेदनं भवेत् ॥४२॥ स्याद्वेददितिः केशान्वपत्वित्यादिमंत्रतः
निदध्यादोषधे त्रायस्वैनमित्यस्य दक्षिण इति ॥४३॥ अस्यार्थः॥ ॥ततः पिता स्वस्थाने उपवि
ष्टः पत्नीतो घृतजलपूर्णपात्रं भूमौ निक्षिप्य पात्रस्थितान्नामेकदेशं गृहीत्वा दक्षिणपाणिना
गृहीत्वा कस्मिंश्चित्पात्रे स्थापितं नवनीतं च सहैव गृहीत्वा कुमारस्य शिरः वामतः कर्णादा
रभ्य प्रदक्षिणं त्रिः क्लेदयेत्। आर्द्रं कुर्यादित्यर्थः। नवनीताभावे तु नवनीतस्थाने दध्नो रससमुपा
दनेन रसस्तु वस्त्रपीडनेन भवति। कथं क्लेदनं भवेत् देव विष्णोति। मंत्रेण क्लेदयेत्। अदि
तिः केशान्वपत्वाप उंदंतु वर्चसे इति अनेन मंत्रेण क्लेदनं स्यात्। एवं वारत्रयं मंत्रावृत्त्या क्ले
दनं संपाद्य ततः पाणिस्थकुशात् सप्तकत्रयमध्ये कुशात्रयं गृहीत्वा अस्य कुमारस्य दक्षिणे ४९
दक्षिणकर्णसमीपस्थे केशापक्षीनामकरणं समीपमूलप्रदेश उच्यते। तत्र कुशात्रयं हद

याग्रं यथा कर्णमूलप्रदेशस्थापनसमये कुशात्रयं स्थापयेत्। पिंजूलेषु क्षुरं न्यस्य स्वधिते मैनं
मित्यस्य। अपीडयन्नीत सर्थः। क्षुरस्ताम्रमयो भवेदिति ॥४४॥ ॥अस्यार्थः॥ ॥ततस्तेषु कुशे
षु स्वधिते मैनं हिंसीरिति मंत्रेण ताम्रमयं क्षुरं न्यसेत्। स्थापयेत्। सूत्रे तु निष्पीड इति यद्व
चनं तेन तस्यार्थं विवृणोति। पिंजूलेषु क्षुरस्थापनं सूत्रगतस्य कस्य पदस्यार्थ इत्यपेक्षायां अव
पीडयन्नीत सर्थः। सूत्रगतपदस्यायमर्थः। क्षुरस्तु ताम्रमयो भवेति वपनपर्यंतं पात्रासादन
समये तस्य क्षुरस्य च आसादनं कर्तव्यं। यत्तु सूत्रे लोहेन क्षुरेण प्रच्छिनत्तीति तत्र वृत्तिकारे
ण लोहशब्द ताम्रवर्तने रजतादिष्वपि वर्तते इति कृत्वा अत्र पूर्वार्थे ताम्रमयो गृह्यते। अत्र
विषये विशेषमाह षड्गुरुः शिष्यः। क्षुरस्य नित्यं लोहत्वात्ताम्रत्वाय हलोहगीः। गृह्यांतरेषु च
ऊषु क्षुरस्ताम्रमयो यतः। ततः क्षुरस्थापनानंतरं किं कर्तव्यमित्याह। येनावपदित्याद्येन छिंद्यात्
छिन्नान्प्रागग्रकान्कुशान्। एकीकृत्य शमीपर्णैः स्त्रीभ्यश्च मातृ प्रयच्छति ॥४५॥ छेदनं तु सकेशा
नां पिंजूलानां भवेदिह। निदध्यात् चेत्सामानानां नानानुडुहगोमये ॥४६॥ ॥अस्यार्थः॥ ॥येना
वपदित्यादिमंत्रं पठित्वा सकेशान्कुशान्छित्वा प्रागग्रान्कृत्वा शमीपत्रैः सह एकीकृत्य कुमा

Indira Gandhi National Centre for the Arts

रस्य मातुर्हस्ते दत्वा सा च आनडुहे गोमये स्थापयति। पूर्ववत् कुशापिंजूलनिधानादि समं भवेत्।
येन धानं निर्भवति। तृतीयच्छेदनेपि कुशापिंजूलनिधानं समं भवति। तच्छेषोपच्छेदने तु वि
शिष्यते॥४७॥ तृतीयवच्चतुर्थे च पिंजूलादि समं भवेत्। तृतीये येन भूयश्चतुर्थे छेदनं त्रिभिः
॥४८॥ एवमेवोत्तरे पक्षे त्रिरेव छेदनं भवेत्। अस्यार्थः॥ ॥कुशापिंजूलनिधानादि पूर्ववत्
कृत्वा अनेनैव प्रकारेण पुनरेतत् कर्म संभवति। छेदने मंत्रविशेषः इतरत् सर्वं समानं। द्वि
तीयछेदने येन धाने निर्भवति। तृतीयछेदनेपि कुशापिंजूलनिधानं भवति। तथा चतुर्थछेद
नेपि तृतीयछेदने तु येन भूयश्च इत्ययं मंत्रो विहितः। चतुर्थछेदने तु त्रयोपि पूर्वोक्ता एव मंत्रा
भवंति। एवं दक्षिणं कृत्वा समाप्य वामे केशपक्षे तथैव कुर्यात्। तत्र वामकेशपक्षे चतुर्थछेद
नं नास्ति। अथोत्तरमंत्रपाठेनास्तिाय क्षुरेणेति मंत्रेण क्षुरधारां मार्जेनिमज्यन्न॥४९॥ ॥आ
रभ्याग्रत आमूलप्रदेशानं निर्मार्जनमिति॥ ॥अस्यार्थः॥ ॥ततः यत् क्षुरेणेति मंत्रेण क्षुर
धारामार्जनं भवति। अग्रत आरभ्य मूलपर्यंतं मार्जनं भवति। तन्मार्जनं पिता करोति। अंगु ४२
ष्ठतर्जनीभ्यामिति शिष्टाचारः। तथा च शिलायामार्जनमिति केचित्। शीतोष्णाभिरिति प्रेषा

नुशासस्य च नापितं॥५०॥ ततः स्विष्टकृदाद्येतत् स्यात् कुमार्या अमंत्रकमिति॥ ॥अस्यार्थः॥
शीतोष्णाभिरित्यादि प्रेषेण नापितं वपनकर्तारं अनुशास्ति। आज्ञापयति। ततः वपनानं
तरं मंगलद्रव्यैः स्नापयित्वा यथापूर्वं समीपे उपवेश्य अनंतरं स्विष्टकृदादि पर्युक्षणांतं
एतत्कर्म भवति। कुमार्यास्तु एतत्कर्म मंत्रवर्जं सर्वं भवति। व्रीह्यादि पूर्णान्येतानि नापिताय
प्रयच्छति॥५१॥ ॥शिखा अपि कुमारस्य कर्त्तव्या ऋषिसंख्यया इति। अस्यार्थः॥ ॥व्रीह्याद्यन्न
पूर्णानि च त्वादि पात्राणि नापिताय दत्वा अन्यदपि स्वविभवानुसारेण तं नापितं प्रेषयेत्।
अस्य कुमारस्य शिरसि तत्र तत्र स्थाने कुलाचारानुसारेण केशरक्षणं। एकशिखः
त्रिशिखः पंचशिख इति बोधायनः॥ केषांचिद्गोत्रप्रवरद्वयं केषांचित्त्रयमिति कुलधर्मे
केशान् धारयेदिति। अत्र केशवेशांतं नाम कुमारस्य शिरसि तत्र तत्र स्थाने कुलाचारा
नुसारेण केशरक्षणं। एकशिखः त्रिशिखः पंचशिख इति बोधायनः। केषांचिद्गोत्रप्रवरं
द्वयं केषांचित्प्रवरत्रयमिति कुलधर्मानुसारेणाबोधव्यं। गृह्येत्वाच्छेतेव कुमार्यै॥ ॥अस्या
र्थः॥ ॥आवृताऽमंत्रकमित्यर्थः॥ आवृन्मात्रमेव भवति न मंत्रत इति॥ आवृन्मात्रं ना

Indira Gandhi National
Centre for the Arts

मनूक्ती भवति। एतत्सर्वं कर्म। एवं सति कन्याविषये अमंत्रक होमो प्रसज्यते। अमंत्रकस्य
होमस्य क्वचिदपि अदृष्टत्वात्। ननु द्वितीये जपत्रेसत्र दृष्ट इति चेत् का न कार्यो। तत्रापि द्वि
प्रजापतये स्वाहेति मंत्रोस्त्येव तस्मादत्र सर्वं कर्म मंत्रवर्जं भवतीति सिद्धं। अत्र भगवान्
पूर्वेद्युराभ्युदयिकं श्राद्धं कृत्वा परेहनि। स्नानं चालमलंकृत्य पुण्याहं वाचयेद्द्विजैः। ततः
कौतुकमाबध्य मुहूर्ते चोमनेबल्लं। प्रतिष्ठाप्याग्निं तरे॰ तस्माद्दर्भानास्तीर्य तिष्ठथान्तरना
नित्रारावाणि चत्वारि व्रीहियवैः। माषैस्तिलैश्च प्रत्येकं पूरितान्येकत्राः क्रमात्। प्राकृसं
स्थं सादयेत्तत्र यवालाभे तु तत्समैः। व्रीहिभिः पूरयेत्पात्रं प्रसकृदेत्रान तो नल्लात्। सव्यत
ते चौलकृतः समीपे जननी शिशोः। अंके न बिभ्रती पुत्रमासीत प्राङ्मुखी सती। तस्याः पु
रस्तादग्नेश्च पश्चादानडुहं तु कृत्वा। आस्पृष्टं भूमि विन्यस्य शरावे सादयेत्ततः। शमीपर्णा
नि चान्यस्मिन् शरावे न्यस्य भूतले। तत्रैव सादयेदेशाना कृत्वा त्रस्य पार्श्वतः। ततः कुमारस्य
पिता हस्ते बिभ्रत्कुशांकुरान्। एकविंशतिमासीत शिशोर्मातु दक्षिणे। पितुरन्योन ४३
वादर्थी यजेस्मिन् चौलछंदरः। ब्रह्मत्वे न हि योवि श्रोधारयेद्दाकुशांकुरान्। आस्मि

न् पक्षे पितैवास्तु कर्ता चौलस्य कर्मणः। अत्रैव समये कुर्यात् स्वरस्यापि परिग्रहं। अन्वाधाना
द्यनन्याजनिधानान्तं पुरस्सनं। तंत्रं कृत्वा न दक्षिणेनो श्मुमात्मनः। अन्वारब्धो विधीयेष्म
विधानादिषु त्वोचितं। पुरः कृत्वाज्यभागौ च प्रधानाहुतिमाचरेत्। तत्राग्न आयूंषि साधे हुत्वा
मैत्रौ स्त्रिभिरसनः। प्रजापतये न त्वद्वादवा हति त्रिनयेन वा। व्यस्तेनादौ समस्तान क्रमेण तु जु
हुयादथ। बालस्य प्रत्यगासिता त्रीनोष्णेवादिनी पृथक्। पात्रद्वयस्थे आसिके हस्तान्या
मन्यभाजने। उष्णेन वाय विद्यादि मंत्रेण स्नापनं पुनः। नवनीतेन दध्ना वा संमिश्री कृत्य पाणि
ना। समानीयादितिः केशान्वपत्विति यादि मंत्रतः। शिरोरस्य वामकर्णं तमारभ्य त्रिः प्रदक्षिणं
। उद्देश्य त्युदनं मंत्रं पुनः पुनरुदीरयेत्। दक्षिण केशपक्षे अथ बालस्य त्रीन्कुशांकुरान्। बा
लाग्नि मुखपर्यंतान्यपित्वा मंत्रमोषधे। त्रायस्वेनमिति न्यस्येदन्यमंत्र पृथु कुर्नवेत्।
उच्चार्य मंत्रं स्वधितेमैनं हिंसीरिति क्षुरं। सीधारायां कुरैः केशैः तद्येनावपदादिकं। यथा
सदिति पर्यंतं मंत्रमुच्चार्य रवे लि कैः। प्रछादितां छमीपर्णैः संयोज्य सकुशांकुरान्। प्राकू
लकेशान् बालस्य तस्य मातुः करे दिशेत्। सा च तान्निक्षिपेत्सर्वान् कृदानडुह सहात्र

Indira Gandhi National Centre for the Arts

नेनाविधिनाकुर्यात्द्वितीयंकेशाछेदनं।मंत्ररहितेनधानादिछेदनेनतत्रमन्यतेपुनरुक्त्यैवकु
र्वीततृतीयंकेशाछेदनं।मंत्ररहितेनयश्चतंत्रंपूर्ववदाचरेत्।पूर्वोक्तमंत्रत्रितयंक्रमेणो
पसमाचरेत्।चतुर्थंछेदनंकुर्यात्सावधानमतंद्रितः।एवमुच्चरतःकेशापक्षेपक्षेपिछेदन
त्रयं।कुर्यादादितआरभ्यनचतुर्थंसमाचरेत्।मंत्रंतुयत्क्षुरेणेतिप्रक्रांतंसमुदीरयेत्।वप्ता
रमनुत्रिष्टुभेनमैत्रार्थंवापबोधयेत्।वप्तायतोयेनवीतांकेः पूर्वसेकावरोषितेः।बालस्यस
कलान्केशान्आर्द्रोकृत्वाद्विपाणिना।वैरोचीरनकमोपेतांशिखांकृत्वाउपदिहरः।अथोप्त
केशीस्नातंतमुपवेश्यययथापुरा।आरभ्यस्विष्टकृद्धोममूर्धतंत्रंसमापयेदिति।एतच्चौल
कर्मतानाममीषांसंस्काराणांफलमाह।याज्ञवल्क्यः।एवमेनःशमंयातिबीजगर्भस
मुद्भवमिति।अत्रचौलकर्मणि।नेच्छतेतद्दिनेनक्ष्हेनोक्तःप्रायश्चित्तंमुच्यते।पाराशरप्रा
यश्चित्तकांडे।निरक्तेचूडहोमेतुप्राक्नामकरणात्तथा।चरेत्सांतपनंतुल्काजातकर्मणिचैव
हि।अतोन्येषुतुसुल्कान्नेसंस्कारेषुद्विजोत्तमः।नियोगादुपवासेनशुध्यतेनिंद्यभोजनात्। ४४
॥इतिचौलकर्मणि॥ ॥अथोपनयनकर्म॥ ॥ब्राह्मणस्योपनयनमुक्तकालेनवेदयथ॥५॥

कृत्वाभ्युदयिकंश्राद्धंपूर्वेद्युर्वापरेहनि॥ ॥अस्यार्थः॥ ॥उक्तकालो इति अष्टमेवर्षेब्राह्म
णमुपनयेत्।गर्भाष्टमेवेतिगृह्योक्तकालेभवति।गर्भप्रभृत्यष्टमेवोपनयेत्।तत्रादौपूर्वे
द्युःअर्थोन्मंडपतलेस्वस्तिवाचनपूर्वकंनांदीश्राद्धंकुर्यात्।तत्रेयंप्रतिज्ञा।अस्यकुमार
स्यवेदाध्ययनाधिकारार्थंश्वःकरिष्यमाणउपनयनांगभूतंस्वस्तिवाचनंतथैवनांदीश्रा
द्धंकुर्यात्।उपनयनंनामसावित्र्याब्राह्मणमुपनयीतेतिकात्यायनः।संस्कारेणबटुराचार्या
दिसमीपंनीयतेतदुपनयनंकरणकारकमिदंगुर्वादिसमीपनीतिरुपनयामितिभाव
साधनं।हरदत्तस्तुपितृकुलाद्विधिवदाचार्यकुलप्रापणं।गौणोरुपनयनमितिप्रणीतवान्
कवपरिशिष्टकारस्तु।ज्योतिर्विदुक्तसमयेकुमारमुखदर्शनं।उपानयंतुतंप्राङ्मोक्षि
कारत्वदर्शीनइति।अत्रभगवान्।पूर्वेद्युरेवसकलान्संभारांश्चयथोचितान्।संभृत्या
भ्युदयश्राद्धमपिकुर्याद्यथाविधि।तानेवसआहातत्रादौपरिधानार्थंकल्पयेन्नववस्त्र
कं।शिरोवेष्टंचवनदमन्यत्सकल्पयेत्।यथाकौपीनंवापिकल्पयेदवगुंठनं।उप
वीतंचसंपाद्यतथाकृष्णमृगाजिनं।यथोक्तमेखलांदंडंयथोक्तंचप्रकल्पयेत्।एवंसंभ

Indira Gandhi National
Centre for the Arts

त्यसंभारान्पूर्वेद्युश्च यथोदितानिति। अपरेद्युः। कृत्वा स्नानमलंकुर्याद्राशिषो वाचयेदथे
ति॥५३॥ ॥अस्यार्थः॥ ॥कृतमंगलस्नानं तादृशं कुमारमलंकुर्यात्। आशिषो वाच
येत्स्वस्तिवाचनं कारयेत्। भगवानपि। अपरेद्युः कृतस्नानभूषणस्वस्तिवाचनमिति
भुक्तभोज्यस्य शिरसो वपनं स्नानमेव च। एवंभूतं कुमारं तमवस्थाप्यानिकेतनः॥५४
ज्योतिःशास्त्रविदुक्ते तु मुहूर्ते शोभने ततः इति। अस्यार्थः। भुक्तं भोज्यं येन स भुक्तभो
ज्यः तस्य। यथेष्टं भुक्तवतस्तादृशस्य कुमारस्य शिरसो वपनं। यद्यपि चौलकर्मोपनय
नं च कुलधर्मानुसारेण उभयमपि कर्म युगपदेव क्रियते। तदा आदौ विहितचौलकर्मा
गत्वेन वपने सिद्धेपि ततः क्रियमाणमुपनयनांगत्वेन वपनस्यावश्यकत्वं। चूडाकर्मणि
यत्केशवेषधारणं क्रियते कुलधर्मानुसारेण तदिह नास्ति। इमान् विशेषः। तत्पश्चाद्भु
क्तवंतं वापितशिरसं मंगलद्रव्यैः स्नापयित्वा कौपीनादिकं परिधाप्य तिलकं कृत्वा। ए
वंभूतमलंकृतकुमारं अग्निकसमीपे अथो ग्रामप्रदेशोऽपवेशय अग्नेर्दक्षिणत उ
पवेश्य विधानात्। ज्योतिर्विदुक्ते शुभसमये बालकसमीपे स्थाप्य। यथा विवाहे शुभ ४५

लग्ने निरीक्षणं। एवं उपनयने समीपोपवेशनं शुभलग्ने कर्तव्यं। तथा च जयंतः॥ ॥अ
परेद्युः स्नानमलंकृतमभिहितस्वस्तिवचनं भुक्तवंतं वापितशिरसं पुनरपि स्नातं कुमा
रमवस्थाप्य ततः शोभने मुहूर्ते इति। भगवान्। कृतकौतुकबंधं च कुमारं कृतभोजनं उपो
षितमागं भूयोपि नीत्वा मात्मसमीपतः। संनिधाप्य गुरुः पाण्योर्मुहूर्ते पुरस्तान्मिति। आज्य
संस्कारपर्यंतमुपलेपादि पूर्ववत्। परिधानं नवेदस्य वाससे वाहतेन तु। नवेनावरणवा
सः कृष्णाजिनमथापि वा॥५५॥ एवंभूतं कुमारं तं कुर्याद्यज्ञोपवीतिनमिति। अस्यार्थः॥
ततः शुचिरपि कर्मांगं द्विराचम्य कुशासने आसनेऽपवित्रपाणिः प्राणानायम्य तिथ्यादिस्म
त्वा अस्य कुमारस्य सम्यग्ब्राह्मण्यं वेदाध्ययनाद्यधिकारसिध्यर्थं द्विजत्वसिध्यर्थं चउप
नयनकर्मणि होमं करिष्ये। इति संकल्प्य तदंगस्थंडिलोल्लेपनादि पूर्ववत्कुर्यात्। आदिशब्दे
न तदुल्लेखन षट्पात्रासादनादि आज्यसंस्कारपर्यंतं कृत्वा। ततः परिधानार्थं सदशामहतं
धौतं नवं वस्त्रं गृहीत्वा तं परिधाप्य अन्यदपि अहतं प्रावरणार्थं दद्यात्। कृष्णाजिनं वा प्रा
वरणार्थं। अत्र शुक्लवसनं ब्राह्मणस्य केचन काषायं वसनमंगीकरोति। अथैनं कुमारं एकं

Indira Gandhi National
Centre for the Arts

वस्त्रं परिधाप्य अच्छिन्नेन वस्त्रेण वा कृतप्रावरणं दक्षिणं बाहुमुद्धृत्य शिरोपिधाय वासोरो
प्रतिष्ठापयतीति स्वनात् । एवंभूतं प्राङ्मुखमवस्थाप्य यज्ञोपवीतं कृत्वा यथाशास्त्रमाचा
मयतीति अत्र भगवान् । तत्र कृताज्यसंस्कारपर्यंतमवधानतः । अथोत्थाय गुरुर्वह्नेः पृष्ठान्निष्क्र
म्य कुमारं प्राङ्मुखं समवस्थाप्य परिधाप्यैकमंबरं । अथास्य दक्षिणकरं किंचिदूर्ध्वं प्रसारि
तं स्थापयित्वा द्वितीयेन वाससा चाजिनेन वा अङ्गुष्ठान्तस्य करस्याग्रे वगुण्ठितं । निक्षिप्य
ब्रह्मसूत्रं तु वितस्याधः प्रसार्य च । वासांसि स्थापयित्वे तथा कृष्णमृगाजिनं । त्रीणि वगुंठ्य मुपरि
निक्षिप्याभिधाय च । ततः शास्त्रोक्तविधिनाचमयेद्यदृच्छाति । आचांतमुत्तरेणाज्यं यज्ञ
पात्राणि चानयेत् ॥४७॥ अंतरेणाग्निमात्मानं दक्षिणतूपवेशयेत् । बर्हिरास्तरणादिस्या
त्स्रुवसंमार्जनादिकमिति ॥४८॥ अस्यार्थः ॥ ॥यज्ञोपवीतधारणानंतरं कृताचमनं माणवकं
आज्यं च यज्ञपात्राणि आनयेत् । आज्यं यज्ञपात्राणीति षष्ठ्यर्थे द्वितीया । आज्यस्य यज्ञपात्राणां
च उत्तरेण उत्तरदिग्भागेण माणवकमानयेत् । तु पुनः अग्निमात्मानं चांतरेण अग्नेरात्मनश्च ४६
अंतरेणानयेत् । तं माणवकमानीय आत्मनः दक्षिणभागे उपवेशयेत् । अत्र सर्वत्र षष्ठ्यर्थे

द्वितीया सर्वत्र ज्ञातव्या । एतदुक्तं भवति उत्तरतो गत्वा पुनर्दक्षिणत उपवेशनमपूर्वार्थं । तथा च वृत्तौ । उत्त
रतः उत्तरभागात् ब्रह्मचारी तु तीर्थेन प्रविश्य आचार्यस्य दक्षिणत उपविशेत् । तीर्थं नाम प्र
णीतापश्चिमदेशः । तुल्य एवार्थः । यज्ञपात्राणां पश्चिमदेशेन प्रविश्य आचार्यस्य दक्षिणत उ
पविशेदिति । ततः बर्हिरास्तरणं । अनलात्त्र्यगारनीये बर्हिरास्तरणादिकमिति । स्रुवसंमा
र्जनांतं पूर्ववत्कृत्वा । आचांतं कुमारमाज्यं यज्ञपात्राणि चांतरेणाग्निमात्मानं चांतरेण गमयित्वा
आत्मनो दक्षिणत उपवेशयतीति । तथा च शौनकः । आचांतमवंतमाज्यादि यज्ञभागमु
त्तरेण तं । नीत्वा माणवमात्मायो वह्निश्चात्मानमंतरा । गमयित्वात्मनः पार्श्वे दक्षिणे चोपवे
शयतामिति । समाचारश्चैतस्मिन् ब्रह्मचारेणय रतः । कुर्योदाघारपर्यंतं चौलोक्तकाज्य
कुलीरपि ॥५९॥ आज्यभागौ नैव चेष्टौ विमुक्तं पूर्वमवनुः । अग्नेरुत्तरतः स्थित्वाचार्यः
प्राङ्मुखस्ततः ॥६०॥ अकुर्वन्नात्मनाग्नेश्च व्यवायं गच्छतीतरः । आचार्यस्य पुनः पुरस्तात्
तिष्ठेत्प्रत्यङ्मुखस्ततः ॥६१॥ अव्यवायस्तु संस्कारकर्मस्वग्निकुमारयोरिति ॥ ॥अस्या
र्थः ॥ ॥स्रुवसंमार्जनानंतरमेतस्मिन् ब्रह्मचारिणि सन्निधिस्थे सति दक्षिणबाहुरय

Indira Gandhi National
Centre for the Arts

सति। यत्र यत्र समन्वारब्धपदं तत्र दक्षिणबाहुसंलग्नेन भाव्यं। अथानंतरमितरआचा
र्यः आघारमर्यं तु अग्निमुखकृत इति ततः चौलोक्ताः अग्न आयूंषीत्याद्याः च त
स्र आज्याहुतीर्जुहुयात्। तत्राज्यनागोनकः। ततआचार्यः अग्नेरुत्तरदिग्भागं गत्वा
प्राङ्मुखः सन् तिष्ठेत् इतरो ब्रह्मचारी आसनश्चाग्नेः व्यवायं व्यवधानम कुर्वन् गच्छ
ति। अग्निना सह ब्रह्मचारिणः अंतरं न कार्यमिति। आचार्यं प्रदक्षिणीकृत्य नैव गच्छे
दित्यर्थः॥ अग्नेराचार्यस्य मध्यतो गत्वा प्रत्यङ्मुखः सन्नाचार्यस्य पुरस्तात्तिष्ठेत्। अग्नि
कुमारयोः संस्कारकर्मसु अव्यवायः अपेक्ष्यः। न ह्यंतरास्तीति इत्यर्थः। जयंतः। अथो
पविष्टे तस्मिन् परिधि परिधानादि कृत्वा समन्वारब्धे कुमारे इध्माधानादि प्रधाना
हुत्यंतं करोति। तत उत्तरतोग्नेराचार्यः प्राङ्मुखस्तिष्ठति। ततो ब्रह्मचार्यप्युत्थाया
ग्नेरासनोव्यवायं परिहरन् अग्नेरुत्तरतो गत्वा आचार्यस्य उत्तरतः प्रत्यङ्मुखस्तिष्ठ
ति। शौनकः। परिध्याधानमोरभ्यान् याजस्थापनावधि। तत्र कृत्वा पुरस्तात्। न स स्पृश ४७
पाणिना गुरुः। इध्माधानादिकं शेषमाज्यभागाहुती विना। पुरस्तात्तत्र माचार्ये

प्रधानाहुतिना चरेत्। अग्न आयूंषीत्यादयश्चौलहोमः कृतः पुरा। तैरेव मंत्रैरत्रापि जुहुयात्ता
ननुस्मरन्। हुतमुत्थायाचार्यो बहुरुत्तरतांतिके। प्रदत्तो प्राङ्मुखस्तिष्ठेच्छिष्याप्युत्थायव
ह्निता। व्यवधानं परिहरन् गत्वाचार्यस्य पूर्वतः। आचार्याभिमुखस्तिष्ठेदिति। ब्रह्मचारिण
आचार्यः पूरयेदाद्यैरंजलिं॥६२॥ आचार्यस्यांजलिमन्यः पूरयेद्धृतनागुरुः। तत्सवितुर्व
रेणीमहद्धत्यस्यानि नीयांजलिमंजलौ॥६३॥ अवक्षरयती त्यर्थः स्वनपूर्णतमंजलिं। देव
स्यत्वेति गृह्णीयात्साणं सांगुष्ठमस्य च॥६४॥ असावानस्यनामस्यादेवमुत्तरयोरपि।
अपूरणादितद्वत्स्यादन्यो मंत्रो करग्रहो। सविता ते हस्तमित्याद्यग्निराचार्यइत्यथा। आ
चार्यो देवसवितरि स्वल्पार विमीक्षयेदिति॥६६॥ ॥अस्यार्थः॥ ॥इतः परं निष्ठतोरेव
कर्म विधीयते। ततः आचार्यः प्रथमं ब्रह्मचारिणमंजलिमद्भिः पूरयेत्। अन्यः कश्चिदु
दासीनः वैदिककर्मकुशलः आचार्यस्यांजलिं पूरयेत्। ततो गुरुराचार्यः किं कुर्यादित्या
ह। तत्सवितुरिति त्रिच्यो वाम्भृत्यृषिः सविता देवता अनुष्टुप् छंदः। अवक्षारणे विनियोगः
ः। एवं रूप्यादि पूर्वकं तत्सवितुर्वरेणीमहद्इति मंत्रेण अस्य ब्रह्मचारिणः अंजलावखाज

Indira Gandhi National
Centre for the Arts

लिं निनीय प्रक्षिप्य अवक्षारयति। अवक्षारयतीत्यनस्य देसत्रेवनतेन स्यायमर्थः। पूर्णेनास्य
पूर्णमवक्षारयस्यासिच्यपूर्वोक्तेनार्थमुत्तराईन विवृणोति। स्वेनांजलिना ब्रह्मचारिणो जलि
मासिच्य परिपूर्य तं पूर्णमवक्षारयतीत्यर्थः। अवक्षरणं कारयतीत्यर्थः। ततो गुरुः शिष्यस्य सांगु
ष्ठं देवस्य त्वेति मंत्रेण पाणिं गृह्णीयात्। अनादेशाद्दक्षिणपाणिमेव गृह्णाति। पाणिग्रहणमं
त्रे असाविति पदस्थाने अस्य शिष्यस्य नाम संबुद्ध्यंतं मंत्रांते गृह्णाति। मंत्रं पठित्वा हस्तान्तो हस्तं
त्रे असाविति पदस्थाने अस्य शिष्यस्य नाम संबुद्ध्यं ते मंत्रांते गृह्णाति। मंत्रं पठित्वा हस्तान्तो हस्तं
गृह्णामि विष्णुशर्मन्। एवं मनसा रीत्या वा रद्वयं कर्तव्यं। एवमुत्तरयोरपि कर्मणोरित्यर्थः। तदेव
स्पष्टीकरोति। अपूरणादि उदकपूरणादि पूर्ववत्स्यास्त्सविताते हस्तमग्रहीदिति मंत्रः द्वितीय
हस्तग्रहणे अग्निराचार्यस्तवेति तृतीय करग्रहे। इतरत्समानं। ततो गुरुः देव सवितरेष ते ब्र
ह्मचारी तं मित्यादिकं मंत्रं पठित्वा सूर्यं ब्रह्मचारिणमीक्षयेत्। स्वयं मंत्रं पठित्वा ब्रह्मचारिणं
तूष्णीमेव आदित्यं दर्शयेत् यथा आदित्यो दृष्टुं पार्येत तथा आदित्यमवलोकयेत्। तेनोतु आ
चार्यग्रहणज्ञापनार्थं। अन्यत्र लक्षणब्रह्मचारिणो मंत्रो नाचार्यस्येति तेन आदित्यमीक्षयतुमि ४८
त्रस्य त्वान्य अनुषाप्रतो स्तन इत्यत्र ब्रह्मचारिणो मंत्रः सिद्धः जयंतः। अथ ब्रह्मचार्यंजलिं करोति

। तत आचार्योस्यांजलिमद्भिः पूरयित्वा तस्योपरि स्वयमप्यंजलिं करोति। तमाचार्यांजलिमस्याद्भिः
पूरयित्वा तत्सवितुर्वरेणीम हइत्यनया पूर्णेन स्वेनांजलिना शिष्यस्यांजलिं पूर्णमवसेचयति। ततो
देवस्य त्वा हस्तं गृह्णाम्यसाविति अनेन यजुषा ब्रह्मचारिणो दक्षिणं पाणिं सांगुष्ठं आत्मनो दक्षि
णेन पाणिना गृह्णाति। असाविपस्य पदस्य स्थाने ब्रह्मचारिणो नाम संबुद्ध्यानिर्देशेन। यथा हस्तं
गृह्णाति। अस्यासावितिपदस्थाने स्य नाम संबुद्ध्यानिर्दिशेत्। देवदत्त अग्निरिति। ततीयमप्यं
जलिं पूरयित्वा वक्षायोग्निराचार्यस्तवासौ देवदत्तेति। पूर्ववद्देवहस्तं गृह्णाति। यत्र स्थितेनादित्यो
द्रष्टुं शक्यः तं प्रदेशं गत्वा शिष्यमानीय देव सवितः समामते येन मंत्रमुक्त्वादित्यमीक्षयेदिति
॥ ॥ अत्र भगवान्। वृत्तय स्वयमंजलिं। निदधाति तमप्यन्योदकेण पूरयेत् ततः। तत्सवितुर्वरेणीम
हवयम्मिस्यानुवानपि। शिष्यांजलौ स्वांजलिस्थमेव क्षारयोदकं गुरुः। शिष्यांजलिमतश्चापाव
क्षाय सव्येन पाणिना देवस्य त्वेति गृह्णामीति तं यजुर्दीर्वयेनुशाम्मो तं नाम संबुद्ध्यानिर्दिश्य दये
पुनः सांगुष्ठं दक्षिणं पाणिं गृह्णीयात् स्वेन पाणिना। एवमेव पुनः कुर्यादंजल्योः पूरणादिकं।
मंत्र स्तत्राग्निराचार्यस्तवेत्यादि परिग्रहे। विद्युतेनान्यदखिलं तंत्रं पूर्ववदाचरेत्। मंत्रेण देव
सवितरेष ते स्यादिना गुरुः। आदित्यमीक्षयेच्छिष्यमथो नाव पिपूर्व वदिति ॥ ॥ कस्यासि परि

Indira Gandhi National
Centre for the Arts

दायेनं प्रजाधिपतयेनयः। युवासुवाईर्चेतः कुर्यात्प्राङ्मुखं दक्षिणाङ्गनं॥६७॥ अस्योपर्यं सयोःस्व
स्यपाणी हृत्वा हृदं स्पृशेत्। नैधीराईर्चेतः कृत्वा ब्रह्मचार्यूहनोक्षणं॥६८॥ पर्यूहनवक्तव्येवमुत्तरा
र्द्धमिदं कृतं। अत्रपर्यूहनं नास्तीत्याह हृदयमितिचतुर्कृदिति॥६९॥ ॥अस्यार्थः॥ ॥ततः कस्य ब्रह्म
चार्यसी। त्यादिमंत्रेण प्रजाधिपतये ब्रह्मणे परिदायमनसापरिकल्प्य एनं ब्रह्मचारिणं मंत्रार्थे
नैस्मरन् प्रजाधिपतये ब्रह्मणे मनसापरिकल्प्य पत्रस्य यावल्लोकनं तत्रैव। युवासुवासा इत्य
र्द्धर्चे दक्षिणा कृतं दक्षिणागनप्रदक्षिणमावृत्य। शिष्यं प्राङ्मुखं कुर्यात्। ततस्तस्योत्तरार्द्धेनतंधी
राइत्यनेनमंत्रेण अस्य ब्रह्मचारिणः अंसयोरुपरस्वस्य पाणी कृत्वा अंगुष्ठायोरुपरिदेशात् युग
पत्ती ता हृदयं स्पृशति। उत्तरार्द्धेजपत्पुहृदयस्पर्शनिनव ति। ततो ब्रह्मचारिणा सह गुरुः यथा
पूर्वं अग्निसमीपपश्चिमविभागे उपविश्य अग्निकार्यं करोति। तत्र प्रसंगादह रहः कृत्समु
च्यते। उत्तरोत्तरग्रे प्रत्यहं पर्यूहनाक्षणपूर्वं किं कार्यमिति। यजुर्गृह्यपरिसमूहनमुक्तं तदु
उत्तरार्थप्रसक्तव्यं। अत्र च परिसमूहनं नास्त्येवाकम्मेणः आदावंते च पर्यूहनाक्षणयोर्वि ४९
धमानत्वात्तस्मादिह उपनयनकार्ये मध्ये यदुक्तं तदुत्तरार्थप्रत्यहं वेदितव्यं। तस्मादिहना

स्तीत्यर्थः। अतः एतिसूत्रपर्यूहनं नात्र हेतुमप्याह। अग्नेः संरक्षणत्वादिति॥ ॥जयंतः॥ ॥अ
थोपस्थापनाग्निसमीपमागत्य पूर्ववदवतिष्ठतः। मंत्रलिंगादनं प्रजापतयेपरिददामीति मन
सासंकल्प्य परिददामीत्येवमेनमुपांशुवदाति ततो युवासुवासा इत्यनेनार्द्धर्चेन ब्रह्मचारिणं
प्रदक्षिणमावर्त्तयति। प्राङ्मुखं करोतीत्यर्थः। ततः शिष्यस्यांसयोरुपरिपाणी कृत्वा तं धीरास
इत्यनेनार्द्धर्चेन तस्य हृदयदेशमुभाभ्यांपाणिभ्यामालभेत। अथाचार्यः पूर्ववदेवोपविशति। त
तो ब्रह्मचार्यग्नेः व्यवायं परिहरन् गत्वा आचार्यस्य दक्षिणत उपविशति। शौनकः। निष्ठताग्नु
त्तरेणाग्निमन्यान्याग्निमुखो ततः। धात्रे परिददाम्यूनमितिसंकल्प पूर्वकं कस्य ब्रह्मादिकंम
न्त्र ददाम्यंतं गुरुर्जपेत्। युवासुवासा इत्याद्यमथार्द्धर्चेमुदीर्यतं। प्रदक्षिणमुपावर्त्य प्रापयेत्प्रा
ङ्मुखं वटुं। अस्योपरितदंसाभ्यांपाणि हृत्वात्मनो गुरुः। तं धीरासः कवय उत्तरं पूत्वा यमुत्तरं।
अर्द्धर्चमुक्त्वोरादेशौ हस्ताभ्यां युगपत्स्पृशेत्। ततः पूर्ववदासीनगुरुः शिष्योप्यात्मनाव्यव
धानं परिहरन्नमेगत्वांतिकं गुरोः। आसिता दक्षिणतस्पति तूष्णीं। तूष्णीं समिधमादध्याद
ग्नौ प्रादेशसम्मिताएतयद्योथवादध्यादग्नयेसमिधं त्विति॥७०॥ स्पृष्ट्वाग्नितेजसामेति॥

Indira Gandhi National
Centre for the Arts

समार्ष्टि ततो मुखं वा प्रक्षाल्य हस्तमनलमुपस्पृश्य तया वा मार्ष्टि॥७१॥ ॐ त्वावृलोमकां कृत्वा संस्त्वौत
न्निमार्जनं। एवं त्रिरवमृज्याग्निमुपस्थायमपीसथति॥७२॥ ॥अस्यार्थः॥ ॥इदानीं समिद्धा
से विदधाति। अग्नौ प्रादेशमात्रां समिधं जुहुयात्। अश्वत्थखदिरपलाशादीनां पक्ष वृक्षाणां
समिद्भवति। तूष्णीमिति। अग्नौ प्रादेशमात्रां समिधं जुहुयात्। अश्वत्थखदिरपलाशां प
द्प्राजापत्यं न वेति। ब्रह्मचारी च प्राजापत्य इति श्रुतिमूलत्वात्। तूष्णीमव समिद्धोम इति एकः
पक्षः। अथ द्वितीया। यायनित्याग्निहोत्रप्रकरणप्रथमाहुतिसमंत्रकं हुत्वा। तूष्णीं। नूयसीम
संसृष्टां प्रागुत्तरतो वा प्रजापतिं मनसा ध्यायेत् तूष्णीं होमेषु सर्वत्र। पूर्वाहुसपक्षयान्
यसीमधिकां असंसृष्टां अंगुलग्नाईशान्यनागेसेपणीया। आहुतरूपदिनाश्चितं। इत्रा
न्यन्नागुत्तरनागेवाद्वितीयाहुतिः। पूर्वाहुतिस्तु मध्यप्रदेशाएव। प्रजापतिं ध्यात्वा होमः
स्वाहेति मुखतोच्चारणं। इति सूत्रदर्शनात् तूष्णीं समिद्धोमपक्षे प्रजापतिध्यानं प्रतीयते। स्मा
र्तसूत्रे उपनयनप्रकरणे। मंत्रेण हेके। एकमंत्रेण। समित्सर्पं कुर्वंति। तत्रायमंत्रः। अ ५०
ग्नेसमिधमहार्षं इत्यादि दशाब्द अग्निमतज्ञापनार्थं इति वृत्तिकारः। ततः समिद्धोमानंतरं अग्नि

स्पृष्ट्वा दक्षिणपाणिं अग्नौ प्रताप्य मुखं समार्ष्टि तेजसा परमाणुभिः तेजसा मामोमि मंत्रेण
त्रिः संमार्ष्टि अनंतरं हस्तं प्रक्षाल्य पुनस्तथैव मुखं संमार्ष्टि। पुनस्तथैव तनीयां। मार्जनं कथं
कर्त्तव्यमिति। अलोमकेऽ ष्ठौ सीवृत्तौ कृत्वा तादृशं मुखं समार्ष्टीत्यर्थः। निर्लोम प्रदेशमो
ष्ठयोर्गोपयित्वा ओष्ठान्यामेव एवं त्रिरवमृज्य त्रिमार्जनं कृत्वा ततउपस्थाय मपि मेधामित्यादिभिः
षड्भिर्मंत्रैरग्निरग्निमुपतिष्ठेत। ॐ च म इत्यनेनापि उपतिष्ठेत्। सेस्लाजपइति। अथोत्तेनिग
दितत्वात्। जयं न रक्षा। निर्लोमप्रदेशावोष्ठौ संवृत्तौ कृत्वा ललाटप्रदेशादारभ्य न्यादिं मार्ष्टी
ति। वाल्पदक्षिणं पादाचार्यस्योपगृह्य वाना म्नानिवादनीयनशिरः स्वरस्यावन म्यच॥
॥७३॥ अधीहीत्यादिकं प्रेष ब्रह्मचारी अदीसर्थः। ब्रह्मचारिण आचार्यः परिनीय वाससा
॥७४॥ पाणिन्यो मात्मनस्तस्य पाणी गृह्णात्यनः परमिति॥ ॥अस्यार्थः॥ ॥ततउपविश्य
दक्षिणं जानुन्यूर्व्यां निपात्य आचार्यस्य पादौ उ गृह्य स्पृष्ट्वा अत्रमनुरनिवादनान्यस्य
पाणिना पाणिमुपसंग्रहणं गुरोः। सव्येन सव्यः स्पृष्टव्यो दक्षिणेन तु दक्षिणः। गुरोरुक्त
प्रकारेण पादानुपसंगृह्य यत्पूर्वं मातापित्राभ्यां दिष्टं अभिवादनीयं नाम तदिदानीमा

Indira Gandhi National Centre for the Arts

चार्यस्तु ब्रह्मचारिणमेनत् अग्निनादर्दीनियंनामेनिबोधयति॥ ॥शौनकोपि॥ ॥भूतले दक्षि
णंजानुपातयित्वाभिवादयत्। इत्युक्त्वा प्रथमं पश्चादामीयं गुह्य नामत्व। शर्मेशाब्दांतमुच्चार्य
नतोनामाहमस्मिनोः। इति चोक्त्वा गुरोः पादौ पाणिभ्यामपि संस्पृशेत्। सव्यं सव्येन चरणं द
क्षिणं तु दक्षिणमिति। अनेन नाम्नात्वमाचार्यादीन्नमस्कुरु। स्वष्टाशिरः श्रवनस्य अथ
ब्रह्मचारी अधीहि भोः सावित्री भो अनुब्रूहि। इदं प्रै ॐ षं ब्रू यात्। प्रैषः आज्ञारूपः शाब्द
प्रयोगः। ततो गुरुरात्मनः पाणिभ्यां ब्रह्मचारिणः परिधानीयवाससाऽसहतस्य पाणिद्व
यं गृह्णाति। शिष्टव्यवहाराद्वा परिधानीयवाससा आच्छादनं। तस्य परिधानीयवस्त्रैकदे
शेन। न प्रावरणीयेन अनित्यत्वात्॥ ॥ॐ नत्तु वस्वः सहितां सावित्री वाचयेदथ॥७४॥
॥५॥पादं पादं सावित्र्याः स्वयमुक्त्वाथ वाचयेत्। ततस्त्वर्द्धमर्द्धर्च्चे ऋत्वं तमृथवाचये
त्। एवं वक्तुमशक्तश्चेत् यथाशक्ति वाचयत्। स्थापयेन्न्सूमीपरस्थ ममतमूर्द्धांगुलिं क
रमिति॥७५॥ ॥अस्यार्थः॥ ॥अथ स्वयं प्रणवव्याहृति पूर्विकां सावित्रीमुक्त्वा तं वाचये ५१
त्। कथं रीत्या पादमात्रमेकवारं वाचयित्वा अनंतरमर्द्धर्चे वाचयित्वा तृतीयवारं वसवीवा

चयति। अथस्वेयदि तथा गृहीतुं न शक्नोति तदा यथाशक्ति वाचयेत्। पादं पादैकदेशमिस्सादिप्र
कारेण त्रिवारं तथैव वाचयेत्। शक्तिभावादनुकल्पोऽयं। विधिरेकपादशः अर्द्धर्चशः सर्वामि
त्ययं मुख्यः पक्षः। तीक्ष्णबुद्धेरपि माणवकस्य श्लोकमात्रश्लोकद्वयं वा श्रवणमात्रानंतरं ग्र
हीतुं शक्तस्यापि उपदेशक्रमस्यापादनं आरभ्य नवति। नियमविधिसामर्थ्यात्। उपदे
शानंतरं माणवकस्य अस्य हृदयस्थले आत्मनो दक्षिणपाणिं ऊर्द्धांगुलिं स्थाप
यति मंत्रेण। करतलं स्थापयेत्। मम व्रते हृत्यादि मंत्रः। आवध्य मेखलां मौंजी दंडमा
लाप्य मानकं। आदिशेद्ब्रह्मस्व यैव सौ प्रतं ब्रह्मचार्यसि॥७७॥ आपोशानेति मूत्रादा
वक्तुमाचमनं कुरु। कर्म्म कुर्विति संध्यादि विहितोपासनादिकं॥७८॥ दिवा मास्वाप्सीरि
त्यस्य दिवा निद्रां न कुर्विति। आचार्याधीनः इत्यस्य मयानुज्ञात एव सन्॥७९॥ मंत्रशान्ति
मध्यीषघत्वं ब्राह्मणानि समाहितः। प्रैषार्थमव्यमुक्त्वाथ कालमकंचनि। दृंशादिति॥८०॥
॥ ॥मेखलारूपिणी मौंजी कटिप्रदेशे आवद्धीयात्। तन्निर्म्माणप्रकारमाहाचार्यः। त्रि
वृता मेखला कार्या त्रिवारं स्यात् समावृता। तद्ग्रंथयस्त्रयः कार्याः पंच वा सप्त वा पुनः। वेद

Indira Gandhi National
Centre for the Arts

त्रयेणावृतोहमिति मन्यते स द्विजः। तद्ग्रथनं दंग। नित्य इहस्यानि संस्मरेदिति। जयंतस्कन्द्र
यमेखला माबध्नाति त्रिवृतां ग्रंथिनैकेन त्रिःपंचवा निरवयेत्युक्ता ग्रंथिविकल्पा नवनीति
।मौंजीबंधनमंत्रस्तु अस्मदाचार्यगृह्यनारकी। तेन थापि अविरोधेन ज्ञातव्या तस्यापि ग्रा
ह्यः। तथास्यापरत्न बः मौंजी मेखलां त्रिवृतां प्रदक्षिणमुत्तराभ्यां परिवीय्यति। उत्तराभ्यामियं
दुरुक्तेति ऋग्भ्यां। बोधायनोपि। अथ मौंजी मेखलां त्रिवृतां त्रिःप्रदक्षिणां परिधापय
न्वाचयति इयं दुरुक्तात्परिबाधमानेति। परिवीतामनुमंत्रयते। ऋतस्य गोप्त्री सनया त्वं
ग्रंथिं करोति प्राणानां ग्रंथिरसि समा विस्रसन इति नाभिदेश इति। मेखलाबंधनानं
तरं मानं कं दंडं दत्वा मानं परिमाणं तद्यस्येति समानकः तं। तच्च गृह्ये केशसम्मितः त्रिरव
सम्मितः ब्राह्मणस्येति परिमाणमुक्तं पादनलमारभ्य। मंत्रस्तु ज्ञातव्यतरे द्रष्टव्यः। सत्वसु
श्रवः सुश्रवा असीति। सुवाधिकारिकायां आददीत आषपालाशं दंडं सुश्रव आदिनेति। सु
श्रवः सुश्रवा असीति। सुवाधिकारिकायां आददीतापपालाशं दंडं सुश्रवआदिनेति। स्व
तिरूपणत्वाचायों मंत्रमाह। अदांतं दमयित्वा मां मार्गे संस्थापयेन्नचयं। दंडः करस्थितायः ५२
स्मात्तस्माद्दसयतो नयमिति। ब्रह्मणा तेन ब्रह्मणजेति च मंत्रः। ततः ब्रह्मचर्यमादिशन्। अत

आरभ्यत्वं ब्रह्मचार्यसीत्युपदिशतीति वचनं। गृह्ये। ब्रह्मचार्यस्यपोशान कर्म कुरु दिवा मास्वा
प्सीराचार्याधीनो वेदमधीष्वेति। इत्यस्यार्थं श्लोकद्वारा विवृणोति। अपोशानेति पदद्वयं व्या
करोति। अपः अशान आचमनं कुरु। कुत्रेत्याह। सूत्रादिषु सर्वेष्वपि आचमनस्थलेषु आ
चमनं कुर्वीति उपदिशतात्। अपोशानेत्यस्य सूत्रादौ मन्त्राद्युक्तप्रकारेण आचमनं कुर्वीत्य
र्थः। आचार्याधीनो वेदमधीष्वेत्यस्य मया अनुज्ञात एव सन्नन्यत्र न येव रीता उत्तरत्र सूत्रार्थो
द्रष्टव्यः। कर्म कुर्वीति सूत्रपदं व्याख्याति। पूर्वशास्त्रविहितसंध्यादिविहितोपासनं कुरु।
दिवा मास्वाप्सीरित्यस्य दिवा निद्रां न कुर्वित्यर्थः। आचार्याधीनो वेदमधीष्वेत्यस्य मया
अनुज्ञात एव सन्नहं मंत्ररात्रिं वेदमधीष्व अध्ययनं कुरु। ब्राह्मणान्त्विति अधीष्वेति स
माहितः सन्नेकाग्रमनाः सन्नहं मंत्ररात्रिं वेदमधीष्व। मंत्रब्राह्मणयोर्वेद इत्युक्तत्वा
त्। अपोशानेत्यादीनां प्रैषाणामर्थ उक्तप्रकारेण उक्ताकारची हतस्य ब्रह्मचर्यव्रतस्य ए
ककालं एकमेव विधिं निर्दिशति। कल्पयति केचनोपनयनप्रभृति षोडशवर्षगोदाने
तत्प्रागेव महानाम्न्यादीनामाचरणं। अपरे तु व्रतकृत्वामसहमानस्योपनयनकाल

र्धगोदानकालादर्वागेवव्रतपरिसमाप्तिमंगीकुर्वंति।एवंत्रैविधकालःवेदग्रहणांतमको
ब्रह्मचर्यकालः।एकस्तुद्वादशवर्षपर्यंतं।अपरस्तु असहमानःगुर्वाज्ञयाव्रतपरिसमाप्तिं
कुर्यात्।एवंत्रिष्वपिपक्षेष्वेकंपक्षमाश्रित्यनियमंकुर्यात्।अतःस्नातकस्त्रिविधःस्नानंद्वि
ते।विद्यास्नानंव्रतस्नानंविद्याव्रतस्नानमिति।यस्तुद्वादशाब्दःप्रागेवदमधीत्यस्नातिसवि
द्यास्नातकः।यस्तुद्वादशवर्षाणिब्रह्मचर्यंकृत्वाअनधीत्यविद्यःस्नाति।सव्रतस्नातकः।यः
स्तुपुनर्द्वादशवर्षाणिब्रह्मचर्यंकृत्वाअधीतविद्यस्नाति।सविद्याव्रतस्नातकः।विद्यांतेतु
क्रमन्यथ्यस्नानं।स्नानंतुविद्यायाःअंतेविहितं।अतस्तमध्यमसत्यज्यअंतमारण्यकम
धीत्यस्नायात्।रहस्यंवआरण्यकंप्राधान्येनस्नाननिमित्तमधीत्यस्नातकोभवति।विद्या
व्रतस्नानमित्यत्रतुनयोरन्यान्तरणं।उक्तरीत्यासमूयंपरिसमाप्यस्नायादिति॥ ॥पर्वेवन ५२
पर्यंतंकुर्यात्स्विष्टकृतादिकं।अप्रत्याख्यायिनंपूर्वंयाचेद्भिक्षांनवानीतिः॥८१॥नवनीत न
घृतवापात्वेदत्याख्यापिनीयदिव्रीह्यान्यतमंलब्धगुरवेनिवेदयीत्॥८२॥अहःशेषतनः
स्तिष्ठेत्सायंसंध्यामुपास्यसपूर्णपात्रंनिधानांतमुपलेपादिपूर्ववत्॥८३॥विप्राणांजो

जनायालंत्वहंहीनिर्वोप्ययात्विनोनंस्त्रीप्रादेश्यवधानादिश्रपणांनकरोत्यघेति॥८४॥अस्या
र्थः।आज्येनैवस्विष्टकृदादिपरिषेचनपर्यंतंस्थालीपाकोक्तप्रकारेणभवति।ततःब्रह्म
चारी।भिक्षांयाचेत्प्राथयेत्।कर्म्मोदेयाचेत्प्राथयेत्।अप्रत्याख्यायिनेप्रार्थिनेनास्त्रीति
यानब्रूयात्सअप्रत्याख्यायी।तादृशंघनिनंयाचेत्।प्रथमभिक्षायामयंनियमः।अथा
उदासीनमपियाचेत्।अप्रत्याख्यायिनमिति।अविशेषेणोपादानात्।ब्रह्मौदनार्थंद्वि
तीयभिक्षायामयंनियमः।अनुप्रवचनीयार्थंभिक्षांददातिति।तथामंत्रस्मरणा
त्।अथवाअप्रत्याख्यायिनीगृहस्थस्यस्त्रियंवायाचेत्।भवतीभिक्षांददात्विति ब्रूया
त्।अत्रतंडुलव्रीह्याद्यन्यतमंयद्द्विप्ययेलब्धंप्राप्तंतद्गुरवेनिवेदयीत।एतत्प्राप्तमिति।व
क्तव्यं।ब्राह्मणभोजनपर्याप्तंयाचितव्यं।आचार्यस्मृतेः।अप्रत्याख्यायिनीनारीमप्रत्या
ख्यायिनंनरंब्रह्मौदनार्थंविप्रार्थ्यसुश्रद्धार्थंवायाचेत्तदा।पात्रंगृहेत्वासंयम्यभिक्षामाह
त्यततस्वयं।निवेद्यगुरवेदत्वाप्रेषंस्मृत्वासमापयेत्॥ ॥शौनकः॥ ॥ब्रह्मादीनिचारभ
फर्तुंब्रह्मौदनंचरं।द्विजान्याजयितुंपश्चाद्द्रव्यंनिक्षेतबांधवान्।निक्षेतपात्रहस्तःस

Indira Gandhi National
Centre for the Arts

न प्राप्य प्राप्य तदंतिकं।अग्रे निक्षेत जननीमप्रत्याख्यायिनीं च यां।पश्चादितरमन्येपि
ये वा स्युर्बोधवास्तवः।ततस्तदनंतरं ब्रह्मचारी अवशिष्टं दिनं वाग्यतः सूर्यास्तमयात् प्राक्
अवशिष्टं।घटिकामात्रदिवसपर्यंतं तिष्ठेत्।नोपविशेत्।यदि तथा कर्तुं न शक्नोति त
दा व्रतलोपप्रायश्चित्ते तदनुग्रहार्थं गायत्रीं जपेत्।सहस्रमात्रं शतमात्रं वा।ततः संध्यास
मये प्राप्ते संध्यावंदनं कारयित्वा अनंतरं ब्रह्मौदनहोमं प्रारभेत्।तत्रैवं प्रयोगः।सुत्वि र
पि कर्म्मागं दिराचम्य प्राणानायम्य तिथ्यादि स्मृत्वा एवंगुणविशिष्टायां तिथौ अस्य ब्रह्म
चारिणः ब्रह्मचर्येण वेदात्मकफलप्राप्त्यर्थं अनुप्रवचनीयं चरुहोमं करिष्ये अनुप्रवचनी
यमिति कर्मनाम।अनुप्रवचननिमित्तमनुप्रवचनीयं तद्धितान्ददाविति नाषण।निय
मः।अनुप्रवचनीयं न सेवा कुतः।अनुप्रवचनीयं भवान्ददात्विति निसामंत्रान्।नवा
न्नि सौ ददात्विति।स्त्रीनिसाद्विडुन यत्र मंत्रे भवती ददात्विति ब्रूयात्।अनुप्रवचनी ५८
यं अपयित्वेति गृह्यवचनेन तस्मादस्य कर्मणः शास्त्रतो लोकतश्च प्रसिद्धः।अनुप्रव
चनीयं अपयित्वेति होमार्थं ब्राह्मणभोजनसमर्थं च तथा स्थालीपात्रं स्थूलतरं पाक

समर्थं योजयेत्।ततः संकल्पानंतरं उपलेपाद्यग्निप्रतिष्ठापनांतं कृत्वा अन्वाधानादि कृत्वा
तत्रान्वाधानादि कृत्वा तत्रा न्वाधाने सदसस्पतिः सविता ऋषयः प्रधानदेवताः चरुद्रव्ये
ण शेषेण स्विष्टकृतं इतरत्समानं पूर्णपात्रनिधानांतं कृत्वा ततः पवित्रद्वयं प्रणीता शूर्प
स्थापयित्वा निर्वपणं कुर्यात्।कथमित्याह विप्राणां भोजनसमर्थं यावितं व्रीह्यादि कांउ
तूरत्र होमाविधानदर्शनात्।देवतात्रयोद्देशेन प्रत्येकं तूष्णीमेव चतुरश्चतुरो मुष्टीन्नि
र्वपति।निर्वपनस्य ब्राह्मणभोजनपर्याप्तस्य विहितत्वात्।यावद्पासितमाधिकं च
अप्प्रक्षिपति।अनंतरं पवित्रेण उपरिस्थाप्य तथैव निर्वापसंख्यं प्रोक्षणं कुर्यात्।
अथोदधिकानामपि प्राप्नुणं भवति प्रोक्षणानंतरमवघातादिसंस्कारः कार्यः।ब्र
ह्मचारी चरुश्रवणांतं कुर्यात्।अस्य नाचेत्रोकरोत्यन्यः अपणीतमिति।स्थितिरिति श्र
पे विहितत्वादाचार्यश्चरुं कुर्यात्॥ ॥आचार्ययुक्तः स्थालीपाकस्त्विति निवेदयेत्।अन्वा
रब्धो गुरुः कुर्यादाघारांतमतः परं॥८५॥चवां जुतित्रयं कृत्वा सदसस्पतिमित्यृचा।ऋच
स्तत्सवितुस्तद्वदृषिभ्यश्चेति मंत्रतः॥८६॥कुर्यात्स्विष्टकृदाद्यं तन्नानाद्विजभोजनं।अ

Indira Gandhi National
Centre for the Arts

स्यात्तक्तो कर्मोत्यन्यः अर्पणांतमिति स्थितिरिति॥८७॥ अस्यार्थः॥ ॥चतुरर्पणानंतरं ब्रह्मचा
री आचार्याय शृणोतु यं स्थालीपाकः होमयोग्यः संपन्न इति तस्मै गुरवे निवेदयेत्। ततो
गुरुरन्वारब्धे दक्षिणस्कंधलग्ने सति ब्रह्मचारिणि आघारांतं कर्म कुर्यात्। स्थाली
पाकोद्गुद्वासनादिकं आघारांतं कुर्यात्। आघारांतं वमिति निर्देशात् आज्यभागयोः
स्वार्थे। अतः परं चरो राङुतित्रयं जुहोति। प्रथमाहुतिस्के सदसस्पतिमित्यनेन
नमंत्रेण। द्वितीया तत्सवितुरिति त्र्यृचा। तृतीया तु ऋषिभ्य इति। अत्र विनज्य हो
मः। उत स्थाली। स्थितरस्य चरवा। नाद्यः। कारिकाकारेण वृत्तिकारेण अष्टकाप्रकरणे
इति ज्ञापितत्वात्। कथमित्याह। मंत्रोक्तदेवतानां तु तूष्णीमेवाघ निर्वपेत्। चतुरश्च
तुरो मुष्टीन्प्राक्षणं च न थाभवेत्। सहैव अर्पयेद्यत्र नास्ति मुद्धरणं तथा। आदिष्ट
मंत्रहोमेषु सर्वत्र वंप्रतीयतामिति॥ ॥अयमर्थः॥ ॥यत्र वैदिकं मंत्रैर्होम आदिष्ट
स्तत्र निर्वापप्रोक्षणे तूष्णीमेव कुर्यात्। न तु देवतान्यः। यत्र तु केवलं नाममंत्रैर्हो ५५
मस्त्रादिर्यथा अग्नये स्वाहेत्यादौ तत्र देवसंख्यया पात्रां हवि। विनज्य होमानं व

तीत्यर्थः। तस्मादिह प्रकृते ब्रह्मौदनहोमेपि वैदिकमंत्रैर्होमस्य विद्यमानत्वात् त्वस्य
रोर्विभागादस्येव मर्थं उक्तस्त्र प्रकरणांतरगतमिह प्रदर्शितं। अत्र ब्रह्मशब्दः ब्राह्मण
वाचकः। वेदस्तत्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिरित्यभिधानात्। ततः स्विष्टकृतादि
परिसमूहनपर्युक्षणांतं समाप्य अवशिष्टेन स्थाल्योदनेन ब्राह्मणान्भोजयित्वाऽ
अरयात्राक्वावित्यद्दैस्यो रयार्थस्क पूर्वमवाक्कः॥ ॥द्विजान्तुक्तवतो वेदसमाप्तिं वाच
यीनचति॥ ॥अस्यार्थः॥ ॥नादन्नान्परितुष्टान्द्विजान्वेदसमाप्तिं वाचयीत अस्य
ब्रह्मचारिणः निर्विघ्नेन वेदसमाप्तवाचयीत। अस्य ब्रह्मचारिणः निर्विघ्नेन वेदसमाप्तिर
स्त्विति नवं नाभुवं तु नेपि तथैव हृष्टमनसः आशीर्वचनं प्रति ब्रूयुः। ब्रह्मौदन कर्म स
माप्तं॥ अथ ब्रह्मचारि नियमाः। क्षारादिवर्जमश्नीयाद् ब्रह्मचारी दिनत्रयं। शायीताधश्च
तुर्थेह्नि मेधाजननमाचरेत्॥८८॥ ॥अस्यार्थः॥ ॥ब्रह्मचारी दिनत्रयं व्रतदिनमारभ्यादि
नत्रयं क्षारलवणवर्जमश्नीयात्। अधःशायनं च कुर्यात्। चतुर्थदिवसे प्राप्ते मेधाजनना

Indira Gandhi National
Centre for the Arts

स्वयं पलाशपूजादिलक्षणं कर्म्म कुर्यात्। शौनकोपि॥ ॥एवं कृतव्रतस्यास्य चतुर्थे दिवसे गुरुः
।त्रयोदशाब्दांतं वा मेधाजननमाचरेदिति॥ ॥आग्नेयादी दक्षिणाप्रसन्दक्षिणा निंदि
तादिशः प्रनिंदितायामन्यस्यां पलाशं शाखवर्जितं॥ ६९॥ तस्यां नावेसशाखं च कुशास्त
बमथापि वा॥ त्रिःप्रदक्षिणमुसंतमंभः कुंभेन तं वटुं॥ ७०॥ आचार्यो वाचयन्मंत्रं सुश्रवः
सुश्रवाइति। तत्रैव मेखलादीनि इत्यान्यानि धारयेदिति॥ ७१॥ अस्यार्थः॥ ॥आग्ने
यीदिक् दक्षिणादिक् प्रत्यग्दक्षिणा नैरृती दिक्। एताः दिशः निंदिताः। एतास्तु वर्जयित्वा
अनिंदितायां प्रशस्तायां दिशि वर्त्तमानं पलाशं पूजयेत्। शाखवर्जितं एकशाखं मित्य
र्थः। शाखांतरणानना व्या। ताहृशोयदिनलभ्येत तथासत्यनुकल्पमाचष्टे। तस्यानावेसशा
खं चेति। तस्याप्यलाभे कुशास्तंबं पूजयेत्। ततः ब्रह्मचारी कर्म्मागं द्विरस्वम्य आ पानाय
म्य तिथ्यादि स्मृत्वा आत्मनः श्रुताधीन धारणशक्ति संपादनार्थं मेधाजननाख्यं कर्म करि
ष्ये। ततः उदकपूर्णं कुंभं अश्यो नाम्रमयं पाणिभ्यां गृहीत्वा मंत्रेण पलाशं तदुदकेन दे ५६
शानी दिशमारभ्य मंत्रेण प्रदक्षिणं त्रिः सिंचेत्। तत्र सेचन मंत्र आचार्यो ब्रह्मचारिणं

वाचयति। उदकुंभेन तं पलाशं प्रदक्षिणं सिंचंतं तं वटुं मंत्रं वाचयेत्। सुश्रवः सुश्रवाइति।
तत्रैव पलाशसंनिधौ मेखलादीनि प्रदस्य दूरीकृत्य अन्यानि गृह्णीयात्। शौनकः स्त्ववा
तत्रैव पलाशसंनिधौ मेखलादीनि त्यक्त्वा। दिशस्तानि निंदिताः। सिद्धितौद
सापेक्ष प्यग्नेयो दिशो यास्यां च नैरृती। वर्जयित्वा दिशो निंद्याः। शस्ता निस्यां दिशि। स्थितं प
लाशं प्राप्य तत्रास्य मेधाजननमाचरेत्। अत्रैकमूलमित्येव पलाशस्य विशेषणात्। मूल
प्रभृत्येवोद्भूतशाखत्वभेदसमन्वितं। सर्वथायस्य कस्यापि पलाशस्य त्वसंभवे। कुशस्तं
बमुपागम्य तं कुंभानीतवारिणा। प्रदक्षिणं त्रिः परितः सिंचंतं ब्रह्मचारिणं। वाचयन्मंत्र
माचार्यः सुश्रवः सुश्रवा असि। इत्येवमादिकं ब्रूयात्समंतमवधानतः। प्रतिदक्षिणं मंत्र
मृष्पन्त्यावर्त्य वाचयत्। ततः पूर्वधृतवस्त्रं मेखलाद्यखिलं वटुः। पलाशमूलसन्यस्य स
वाण्यन्यानि धारयेत्। गृह्यान्तरनीयाद्दुर्वाद्यैः समस्तैर्बंधुभिः सदा पथिरवस्यय नान्मंत्रा
न्वदेपुर्व्वौ धवैः सह। अग्रतोस्य नितयुस्तवारिधारांत्वसं ततौ। ततः सन्मंगलैर्द्वीपैः पूर्ण
कुंभादिभिर्युतः। प्रापुय गृहमाचार्यः पुण्याहं वाचयेद्द्विजैरिति॥ ॥आश्वायनोपि॥ ॥कुर्यात्
त्रिमेखलां वेदिं सर्वतो द्वादशांगुलां। अस्यां प्रागुत्तरेनो गतस्य मेधां समर्चयेत्। पलाश

Indira Gandhi National
Centre for the Arts

चारवांतन्मध्ये पात्रीं कुशसमन्वितां। आदौ वाथ कुशास्तंबं समूलं स्थापयेद्गुरुः। मेधामावाह्य
मतिमान् मेधायै नम इत्यथा गंधपुष्पासनैः सम्यग्धूपदीपादिभिः पुरा। इष्ट्वा निवेदयेद्दत्तं
सक्तुमिश्रं सयावकं। समादकं निवेद्यान्नं पुनश्चान्यच्च पूर्ववत्। अणम्पनस्य मेधायै इति
निःसारयज्जलं। उच्चरन् सुश्रवो मंत्रं जलं गृह्य प्रदक्षिणं। संस्राव्य तानमरस्तत्तथा कुर्यात्पु
नः पुनः। एवं त्रिवारमावर्त्य देवं। जिनं कर्म उत्क्रूनं। वर्या निक्षिप्यवस्नात्वा वाससी च विनिक्षिपेत्।
मेखलां चोपनीतं च बद्ध्वा त्यानि विनिक्षिपेत्। वाससी नेत्र स्वगुरवे मेधाजनकर्मणि। दद्यात्ता
श्च मत्स्येव कोपानेन प्रवर्त्तयेत्। पुण्याहवाचनं कृत्वा ब्राह्मणांश्चापि भोजयेत्। नमावहत्तु सा मेधा
मेधाजनकर्मणः। ततः कर्त्तव्य प्रयत्नेन व्रतस्य च समापयेदिति॥ ॥इति मेधाजनकर्म॥ ॥अ
थ नैमित्तिकमुपनयनं॥ वेदांतरमधीत्यैवमन्यवेदं यदाधीयते। उपनीतिरियं तेषां मलं करण
वर्जिता॥ ७१॥ यदेतदुपनीतस्य प्रायश्चित्ततया भवेत्। कृताकृतं तु वपनं मेधाजननमेव च
॥ ७२॥ मेधाजननसंज्ञां वै व्रतचर्यां निवेदिहा। अनुप्रवचनीयं च तदनावेद्यं यं च॥ ७३॥ परिदा
नं न कार्यं स्यान्निमित्तान्तरं त्विदमिति॥ ॥अस्यार्थः॥ ॥प्रमादवशाद्विद्यातिक्रमे नैमित्तिक ५९

मुपनयनमिति। तत्कथं ब्राह्मणेन चत्वारो वेदा अध्येतव्याः। तत्रस्वशाखैकवेदाध्ययनमादौ
कुर्यात्। तत्र ऋग्वेदादिक्रमेण अध्ययनं विधीयते। यदि देशकालाद्यनुरोधेन नानाप्रमादि
कैः स्वैतदध्ययनप्रसंगो न स्यात्। तदा ब्रह्मचारिणा वेदांतरमधीत्यापि ऋग्वेदः पठनीयः अ
ध्यापकेलब्धे तत्र व्यत्क्रमेणाध्ययनजनितप्रत्यवायापनोदाय प्रायश्चित्तत्वेन ब्रह्मचारिणः
पुनरुपनयनं विधीयते। कथमित्याह। वेदांतरमधीत्य यः ऋग्वेदाध्ययनं कुर्वंति तेषामेवं वक्ष्य
माणप्रकारेण उपनीतिर्भवति। तत्प्रकारमाह। अत्र ब्रह्मचारिणः अलंकारान् संतीति। यदा
उपनीतस्यापि एतदुपनयनं प्रायश्चित्तरूपेण भवेत्। तत्र वपनं कृताकृतं इमे धाजननं पला
शपूजनं कृताकृतं कृते गुणविशेषः। अकृते न प्रत्यवायः। यदि मेधाजननं क्रियेत। तदा अक्षा
रलवणाशी। ब्रह्मचारी अधःशायी त्रिरात्रमित्येतद्व्रतमाचरेदिति। अनुप्रवचनीयं च कुर्यात्
। अन्नौदनहोम इति। मेधाजननस्याकरणपक्षे द्वयं व्रतचर्या अनुप्रवचनीयश्च न स्यादिति
कस्य ब्रह्मचार्यसीत्यादिमंत्रेण ब्राह्मणे परिदानं नास्ति पक्षद्वयेपि • इदमुपनयनं निमित्तज
न्यमिति हेतोः। पूर्वस्याचार्य स्थाने तत्स्थिति वक्ष्यामहे॥ ७५॥ निक्षेप तान्नं दिवारात्रौ वाचार्य
स्त्वनुष्ठेयाभि[illegible]तात्र विशेषाय समानमितरद्ध्रुवा॥ ७६॥ अग्निकार्यं च निक्षायां प्राग्वद्

Indira Gandhi National Centre for the Arts

वानडुच्यते।पर्यूहनेक्षणस्यानामादावेतेन्व कर्मणः॥७७॥ नूष्णीसमिधमित्यादिहुत्पस्था
नादिपूर्ववत्॥ वेदस्वीकरणं यावत्तावदेवं समाचरेत्॥७८॥ अथवा द्वादशाब्दं स्याद्बृहस्व
र्यमिति स्थितिः॥ उपाकरणपर्यंतं सावित्र्या ब्रह्मयज्ञकमिति॥७९॥ ॥अस्यार्थः॥ ॥पूर्व
स्याः सावित्र्याः स्थाने गायत्र्युपदेशावसरे गायत्रीस्थाने। तत्सवितुर्वृणीमहे वयं देवस्य
भोजनं।श्रेष्ठं सर्वधातमंतुरं भगस्य धीमहीति तंपादादिक्रमेण पूर्ववद्वाचयत्।नियम
विधिर्न वृत्तीनिष्कृत्वा।दिवारात्राविति प्रातः संध्यां विधाय वेदाभ्यासं कृत्वा भिक्षां कुर्यात्
।रात्र्यावपि सायं संध्यामुपास्य भिक्षां कुर्यात्॥सिद्धान्तेऽयमन्वयः।आचार्यतुष्टिपर्यंतं
मतुष्टिपर्यंतमन्नं निक्षेत।यदा गुरोरवाक्ले भवति तदा तदर्थं भैक्षं संपादनीयमिति भाव
ः।अन्यथा आत्मतुष्ट्यर्थं संपादनीयं अयं विशेषः।कथितः कार्यमिति।नैमित्तिके उपनय
ने अलंकाररहितं कृताकृतं केशवपनादीत्यादि लक्षणं।इतरत्समानं नित्यनैमित्तिकयो
पनयने।भिक्षायाः प्राक्तूर्ध्वं वा अग्निकार्यमुच्यते विधायतदित्यर्थः।उभयमपि भवति। ५८
तत्र अग्निकार्यविधानं पूर्वोक्तमेव तत्र पर्यूहनोक्षणेन विद्यते।अत्र अनुकर्मणः आदाव

ते प्रस्यहंस्यातां।तूष्णीं समिधः स्वेमः।मंत्रेण वा इत्यादि पूर्ववत्कृत्वा मयिमेधातिथ वोपस्थानं
।एतदग्निकार्यं वेदाध्ययनपर्यंतं कार्यमिति।अथवा द्वादशवर्षपर्यंतं ब्रह्मचर्यं भवती
ति व्यवस्था।ब्रह्मयज्ञादि ब्रह्मचारिणा कर्तव्यः।तत्र उपाकरणपर्यंतं सावित्र्या ब्रह्मयज्ञक
मिति वेदाध्ययनसाध्यस्य ब्रह्मयज्ञस्य उपाकरणं विनि वेदाध्ययनराहित्यं उपाकृत्याधी
यीतेप्छंदासीति श्रुतेः।अतः कथं नित्यब्रह्मयज्ञसिद्धिरिति॥ ॥शौनकोपि।येवेदांतरमध्ये
तुं तत्सूत्र विधिना ततः।कृतोपनयनाधीत्यैनं वेदं सकलं द्विजः।द्वितीयमिममृग्वेदमध्ये
तुमभिवांछया।एतद्गृह्योक्त विधिना पुनरप्युपनीयते।केशानां वपनं तत्र स्यद्वा क्रियेत क्रि
येतक्रियेत वा मेधाजननेन कर्म्मापि विद्यते यंन्व कृताकृतं।कर्तव्यपक्षाश्रयणे मेधाजनन कर्म्मे
णः ब्रह्मौदनस्य होमस्य त्रिरात्रादिव्रतं तथा।कस्य ब्रह्मादिमंत्रेण परिदानं न विनेष्यते।तत्रो
दगयनादिश्च कालो नापेक्ष्यते।तत्सवितुर्वृणीमहे वयमित्येव पादिका।तत्सावित्री
परिग्राह्याय द्यजन्यसमीरितं अध्यापन नेतत्तदलेंकारादिवर्जितं।इहापि सर्वं कुर्वी
त ह्युपनीतः पुनर्न वेदिति॥ ॥अत्र समयन्त्रियमानास्तीत्याहुस्वार्यः॥ ॥उत्तरायणका

Indira Gandhi National
Centre for the Arts

लादिनियतिर्न विधीयते। निष्पर्योपनयने चालंकारस्तु सुवर्णादिति॥ ॥इत्युपनयनकर्म्म
ब्रह्मचारिधर्म्मोश्च॥ ॥महानाम्न्यादिकर्त्तव्यं तत्काले व्रतत्रयं। तत्काले वदाम्यं तं वपन्
तुपनीनिवत्वा नवां मौंजीं नवं दंडं दत्वा स्विष्टकृदादि यथा संवत्सरं चरेदेतत्पूर्णे ब्देन्नराय
ण॥२०१॥ शुक्लपक्षे बहिर्ग्रामाद्दिविक्तं देवामेवस्य तत्पूर्णे पात्रं निधानांतमुपलेपादि पूर्व
वत्॥२०२॥ स्वस्याल्लंनुक्तय तूष्णीं निरूप्य प्रोक्ष्य तत्र चेति॥ ॥अस्यार्थः॥ ॥महानाम्न्या
दिव्रतत्रयाम महानाम्नी व्रतं महाव्रतमुपनिषद्व्रतं चेति उदवत्वा वपनादिकर्म ददाम्यं तं
कायत्वा गयनकाले शुक्लपक्षे कर्त्तव्यं तत्तत्काले एकैकं समाप्य अपरं कर्त्तव्यमिति नावः। उप
नीतिवदुपनयनवत्वा वपनादिकर्म ददाम्यं तं कायत्वा पदि ददामीत्यंतं। कायब्राह्मणे त्वं प
दि ददामीति एतदंतं कुर्यात्ततः नवां मौंजीं धार्या। नवापि दंडः। अथ स्विष्टकृतादि होमत्रा
षसमाप्य संवत्सरपर्यंतं महानाम्नीव्रतांगं ब्रह्मचर्यादि एतदाचरेत्। पुनः महानाम्नीव्र
तानंतरं पूर्णे संवत्सरे जाते उदगयने शुक्लपक्षे अग्निमंतं ग्रामाद्बहिः विविक्तं पवित्रं ५९
प्रचारं तं देशं प्राप्य तत्र आदाय उपलेपादि प्रणीतापात्रस्थापनपर्यंतं पूर्ववत्कृत्वा ततो ब

टुर्ब्रह्मचारी होमार्थं यन्निर्वपणं देवता उद्देशेन कुर्यात्तत्तथा निर्वपेत्। तथा स्वस्य भोजनसि
द्धिर्भवेदिति। आत्मनत्नुक्त्य भोजनायानुक्ते भोजनं अलं समर्थं। तूष्णीं निरूप्य निर्व
प्य तथैव तूष्णीं प्रोक्ष्य। तिलानोप्यव्वेस ध्वमाचार्याय निवेदयेत्॥२०३॥ पृच्छति व्रतलो
पंस्त्वानृद्दते प्रतिवचनस्य थाबहवो व्रतलोपाश्चेत्पुनरावर्त्तयेत् व्रतं॥२०४॥ लोपेषापत्ये
युक्ते पुनर्नो व्रतं ये हुता तेनान्वारब्ध आचार्य इध्माधानादि पूर्ववत्॥२०५॥ ऊत्वा
ग्नावग्निरित्यादिमंत्रैश्च वा हुतीर्यथा ततः स्विष्टकृतेव घेछषं तूमौ निधायत्व॥२०६॥
एवमित्यादि यत्नानां नमाहृषेषमतःपरमिति। अस्यार्थः॥ ॥तत्रातिलानपिरक्षाल्यां प्रक्षिप्य
पाकं कुर्यात्। वटुः पक्वं हविराचार्याय निवेदयेत्। ततः आचार्यः ब्रह्मचारिणं व्रतलोपान्
पृच्छति। त्वया कानि व्रतान्याचरितानि कानि लुप्तानि वेति। अथ ब्रह्मचारिणा प्रतिवचनं
दत्तं मया आचरितानि (कानि लु) नवेति यथाचरितानि स्युः। तदा कृतार्थता। अथ चेद्व्रत
लोपान् ब्रूयात्तदा तेषां गुरुत्वं लाघवं विचार्य लाघवे प्रायश्चित्तं तेन ब्रह्मचारिणा अन्वा
रब्ध आचार्यः पूर्ववदिध्माधानादि अग्निरित्यादिभिर्मंत्रैश्च वा हुत्वा ततः स्विष्टकृदर्थमव

Indira Gandhi National
Centre for the Arts

द्येत्। अवदायहोमम कृत्वैव स्थापयेदिति प्रतीयते। उत्तरत्र स्विष्टकृद्धोमविधानदर्शनात्।
अवशिष्टश्चरुः स्थालीस्थः तं भस्मोपरि स्थापयेत्। ततो गुरुरनेन सर्वेण त्राणेनेति प्रैषमाह। तस्मि
न्नेव समये स्थालीपाकान्नं भुक्त्वा। गुरुक्तवंतं तमाचांतं जलपूर्णांजलिं ततः॥२०७॥ सं व्रतानां
व्रतेत्यादिसुक्तवंतं दिवाकरं। उपस्थापयथ कुर्वीत मीलितास्यं वचायतं॥२०८॥ त्रिः प्रदक्षिण
मावेष्ट्य वाससाथ मुखं शिरः। उक्त्वैकरात्रमित्यादि प्रैषं स्विष्टकृद्यथेति॥२०९॥ ॥अस्यार्थः॥
भोजनांते उच्छिष्टलेपस्पृश्याचम्य मूनं कृत्वा जलपूर्णमंजलिं कृतवान्तं दत्वा ब्रह्मचारिणं उत्थाप्य लें
व्रतानां मित्यादि मंत्रजपांते सूर्योपस्थानं कारयित्वा ततः स्वच्छीमेव चक्षुषी संमील्य मौनमंगी
कृत्य गुरुर्ब्रह्मचारिणमुपदिशति। चक्षुर्मीलनं कुरु। ततो ब्रह्मचारी अहतेन वाससा शिरो
मुखं त्रिः प्रदक्षिणमावेष्ट्य एकरात्रमित्यादि प्रैषमुक्त्वा स्विष्टकृदादि होमतंत्रशेषं समाप्य आव
श्यकेभ्यः शारीरव्यापारेभ्यः इतरेषु तायनासनानाजनादिष्वन्यतमं कुर्वन् वर्जयन् एकरात्रं
यद्वा महानाम्नीव्रतांतर्भूतमेव व्रतसमाप्तिलक्षणमुत्तरकृत्यमाह। इदान्यां च विधायाग्निं प
श्चादानेस्तृणेषु तु। ईशान्यग्रे यूपविष्टावीक्ष्यमाणस्तता दिशं॥२[illegible]॥ शिष्यापि स्वमु ६०

खं प्रक्षाल्याग्नर्वाचार्यं दक्षिणं। कृत्वा तस्योपसंगृह्य पादौ तेषु तृणेषु च॥२११॥ ईक्ष्यमाणो
दिशं प्रत्यक् दक्षिणामुपविश्य चेति॥ ॥अस्यार्थः॥ ॥ग्रामाद्बहिर्गत्वा प्रशस्ते देशे ग्रामस्य
ईशान्यभागेऽग्निं प्रतिष्ठाप्य ततोऽग्नेः पश्चिमभागे ईशान्याग्रकान् दर्भानास्तीर्य तेषु दर्भे
षूपविश्य पतामेव ईशानीं विलोकयन् वक्ष्यमाणं कर्म कुर्यादिति। ततः शिष्योपि स्वमुखं प्रक्षा
ल्य। तत्रापि हि तस्य मुखस्य प्रक्षालनकार्यशास्यत्वात्। अर्थप्राप्तमुष्णीषपिमात्रं तत्काल
मात्रं तथैव पूर्वं चापि संध्यावंदनाद्यावश्यककर्मोपासनमनादावप्यनुसंधेयं। ततस्तथैव वेष्टि
तशिरा एव शिष्यः अग्निमाचार्यं च प्रदक्षिणीकृत्य आचार्यसमीपे गत्वा गुरोः पादौ पूर्वव
दुपसंगृह्य स्पृष्ट्वा तत्रैवास्तृतकुशेषु नैर्ऋत्यां निमुखः नामवदिशामीक्ष्यमाण उपविशे
त्। स्वेन पृष्ठेन तत्पृष्ठं संदध्यादितः परं॥२१२॥ मनसा महानाम्नीर्जपेदनु ब्रूहीति गुरोः प्रे
ष्ठतदहं उपसन्नान् व्रतलोपान् ततो गुरुः॥२१३॥ स्वयं संमीलनं कुर्वन् महानाम्नीर्वाचयेत्
॥ त्रिः पुरीषपदैरुक्त्वा तस्योष्णीषं विस्रंसयेदिति॥२१४॥ ॥अस्यार्थः॥ ॥ततस्तथाकृते
वटुः गुरावार्यपृष्ठेन स्वपृष्ठं मेलमन्त्रास्ते ततः गुरवोच्चारणं विनैव केवलं मनसा महाना

Indira Gandhi National Centre for the Arts

म्नीर्नो अनुब्रूहीति प्रैषं तं गुरुं मनसा ब्रूयात् । जापयेदिति भावः । ततो गुरुः । प्रमाद वशाच्च
द्द्विवास स्नान व्रतलोपान् पृच्छन्नास्ती क्षत व्रत व्रत लोपो जातो रवेति वदेत् । अथ गुरुः
स्व स्य आक्षिणी संमील्प महानाम्नी स्वः पुरीष पदैः सह त्रिर्वदेदिति । अथ महानाम्नी
श्रवणानंतरं शिष्यस्याक्षीणि विमोचयेत् । हरी कुर्यात् । ईक्षये दकेमी क्षत मित्रस्य निद्रूय
न्तु । स स्वंना रादित्यावीक्ष्य मित्रस्य वइतत्वथ ॥२१४॥ मित्रस्येत्यादि मंत्रेण पुनरादित्य
मीक्षयेत् । ईक्षणे केदित्या मंत्रा ब्रह्मचारिण एव तु ॥२१५॥ मंत्रोक्त कर्म कर्त्तव्यं सर्वत्र केर
णांत्विदमिति । अस्यार्थः । आदित्यं विलोकयति शिष्यं प्रतिवदेत् । ततः शिष्यः मित्रस्य
त्वा चक्षुषा प्रतीक्षइत्येकः । मित्रस्य त्वा चक्षुषा समीक्ष इत्यपरः एवं मंत्रद्वयं पठित्वा सू
र्यं विलोकयेत् । अनंतरं मित्रस्य त्वा चक्षुषा वीक्ष इति मंत्रेण तथैव दित्या प्यनुवीक्ष्य मि
त्रस्य त्वा चक्षुषा प्रतीक्षामि यास्मान् द्वेष्टि यं च वयं द्विष्मः तं त्वक्षुषा हेति क्रत्वनु । अ ६९
नेन मंत्रेण । शिष्यः पुनरादित्यमीक्षते । अर्केदर्शने दित्यादर्शने ब्रह्मचारिण एव मंत्रं म
त्राः पठनीयाः । न त्वाचार्येणापरिभाषात्कमपि मंदमतिनामनुग्रहार्थं पुनः स्मारयति

सर्वत्र मंत्रं पठित्वा कर्म कर्त्तव्यमिति मंत्राणां करणरूपत्वात् । क्करपं तु कुर्यात् पूर्वेणावीम
वनी । नि नियमात् । उत्का चाग्न इत्येयादी मंत्रान्भूमिमुपस्पृशेत् ॥२१६॥ अनुप्रवचनी
यार्थे कार्यो यं ने दस्यने । महानाम्नीन्यः स्वाहेति सावित्र्यास्त्वानरूपान इति ॥२१७॥ ॥अ
स्यार्थः ॥ ॥आरण्यके कांडे उपनिषद्विभागे वेदांते भूमिस्पर्शो नेजप मंत्राद् भूमिमुपस्पृ
शेदग्न इत्येत्यादिः । अग्न इलान मइलादिन मन्त्र ऋषिभ्यो मंत्र छन्द्रो मंत्रपतिभ्यो नमो वो
अस्तु देवेभ्यः शिवा नः शं तमा न यस्सु मृडीका सरस्वति । मा ते व्योम संदृशि । भद्रंक
र्णेभि रित्येकः । उपनिषच्छब्देन वेदांत विभागः । तत्र मंत्र ब्राह्मणयोर्वेद नामधेयमि
ति सर्वेषामपि वेदांतानां मंत्रविभागाः संहिता विभागो ब्राह्मण विभाग इत्युच्यते वेदशब्दे
नोच्यते । तत्रापि कर्मकांड ब्रह्मकांडात्मके ब्राह्मणे ब्रह्मबोधनाय प्रवृत्तस्य ब्रह्मकांड
स्य उपनिषच्छब्द वाच्यता । आरण्यकं चेति । तत्र उपनिषज्जपे आदौ उक्तं मंत्रे भूमिस्पृ
शान्त्र व उक्तं मंत्रान् जपित्वा उपनिषदं पठेत् । उपनिषत् स्त्रीलिंगः । आद्यो ज्ञात व्यं प्रकृ
तमनुसरामः । स्तुषजनमित्यपरः । कयानश्चित्रइति त्रयो मंत्राः । स्योना पृथिवीत्येकः ।

Indira Gandhi National
Centre for the Arts

ततःस्तैत्तिरीयमंत्रः। उदितःश्रुक्रियं दधे। तदहमात्मनी दधे। अनु मा सामे न्विंद्रियं।
मयिश्रीमेधियत्ताः। सर्वैः सप्राणसबलः। जित्तिष्ठाम्यनु माश्रीः। जित्तिष्ठत्वनु मा यंतु देव
ताः। अदब्धं चक्षुरिषितं मनः। सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हिंसीः। ततश्च श्रुतिरिति
नूमिस्फुटो नेनान्मंत्रान्पठित्वा सन्ध्ये सायंकाले संध्यावंदनं विधाय अग्निकार्यं च कृ
त्वा पूर्ववदनुप्रवक्ष्यनीयहोमं कुर्यात्। तत्र सावित्र्याः स्थाने महानाम्नीभ्यः स्वाहेत्येतावाने
व विशेषः। तत्राहाचार्यैः स्मृतिनिरूपणे। सर्वत्र वपनं तत्रास्ति न द्वैतकल्पनीतिवदतो वपना
दिप्रदानानंतरं कृत्वा कमेव ते पुनः। तद्वने वर्षमात्रं तु चरेच्चेति विनिर्दिशात् लक्ष्वरिष्यामी
ति शिष्यस्य व्रतं नाम्नीवदेद्गुरुं। दिवा ब्रह्मोदनं कृत्वा चरेत्संवत्सरं व्रतं। देवतायतनं
गत्वा नदीतीरमथापि वा क्षेत्रं वनं च तत्र गत्वादौ प्रथमं श्रावयेत् व्रतं। उक्तार्थे तेन महा
नाम्न्याः क्रियाः सम्यक्तथापि वेति। कृसरान्नकरणे फलमाह स एव। प्रोक्षणानंतिला ६२
नूक्षिप्तान् तंडुलैः श्रपयेच्चरुं। तत्पत्ति कृसरान्नेन महानाम्न्युक्तदेवताः। सर्वं हविःशो
षजाजने कारणमाह स एव। आत्मनायत्तु स हविः संश्रपयेद्द्विजः। तावदेव महाना

म्याजुल्का तत्र नदोषदर्शनात् व्रतिना भुक्तशिष्टान्नं मौलं कृत्वा हेतिकथ्यना। सुश्रुधत्वाद्युत
ततस्यालर्वेमश्नाति हि रचयमिति। अंजलिसेचने कारणमाह स एव। खब्रेन पतेत्स्थ
व्रतस्य परिपूर्तये। जुल्कावा पाजलिं पूर्णं शिष्यः सिंचति मंत्रवित्। गुरुश्च तत्स
दस्तुयोन्मंत्रेनानोः कृतांजलिः संमीलनं वाग्यमनं शिष्यः कुर्यात्। ततः परं संमीलना
दौ करणमाह स एव। आलोक्यालोकनेनासीद्भाष्याणां वचनाषणात्। तद्दोषस्यापनु
त्यर्थं मौलं संमीलनं न वेत्। कर्तव्यत्वान्महानाम्न्यां मौनं स्यादिष्ट द्विजातिनः। दुष्टदर्शन
वर्जयित्वा कृताच्च वसरोऽह कराते। त्रिरात्रं वा यथोक्तप्रसिद्धये। तस्मात्संमीलनं कार्यं
तथा वाग्यमनं तदा। समुखत्रिरो वेष्टने कारणमाह स एव। व्रतादेशादृषिः प्रभृतिभ्य वृणां
तै यदास्तुविः। कंवाद्ध समाश्रित्य वसंति व्रतिनं सुराः। केशान्वसंति वसवो रुद्राः श्रोत्रे
त्ववस्तुषी। आदित्याना सिक्वाद्वा रवषट्कारश्च कस्तथा। व्रतिनो गात्रजं तोयपातुकामा
इमसुराः। त्रयस्त्रिंशद्द संत्येव महानाम्न्यः प्रजावतः। तेषां संत्राणनार्थाय वेदत्रयमनं
स्मरन्। अहतेनांवरणात्र वेष्टये त्समुखं शिरः। दस्त्रोनाद्दहितानां च दुष्टानां माहितं

Indira Gandhi National Centre for the Arts

र्णां वस्त्रादयः सुरास्तस्मात् किरसो वेष्टनेन वेन्॥ शुश्रूषासिद्धये तस्य गुरोरादौ महर्षयः।
आत्मनो पापनाशार्थं वक्रिरनुग्रहं महन्। संमीलना दौतुकालविशेषमाह स एव। संमीलनं वा
च्यमनं मुखीपणस्त्रवेष्टनं। एकरात्रं त्रिरात्रं वा न कृतानेन्त्वरदिति। सुराणां मानवध्यर्थं तथाकु
र्वति हि द्विजाः। व्रतस्यश्रवणेन वदेवानां संप्रियो भवेत्। तथा संवत्सरं सर्वमन्त्रकलात्सवर्ति
नु। त्रिरात्रं वैकरात्रं वा पश्चात्कार्यमिति निस्थितिः। एवंभूतास्वयन्कालो न वतिगुरुणादित इति।
अनंतरं कर्तव्यमाह स एव। संध्यात्रयं तथा भूतः कुर्यान्नान्यत्तु केचन। एकरात्रं त्रिरात्रं वार
युडुपविश्वान् द्विजः। नरायी तनश्चोत्तिष्ठेदते संध्यार्थमादनः। अथ रात्र्यां व्यतीतायां संध्यामा
त्र्मुपास्य च। तथा भूतस्तदा न व कुर्यात् स्नानादिकाः क्रियाः। वत्सतरीबंधने कारणमाह स एव। र
त्नो वत्सतरी। नावत्सुरवरूपांत्यहायनी।। वायव्यां दिशि बध्नाति महानाम्न्या असंश्रये। श्रेष्ठ
त्वात्तु पशूनां सा रक्ता वत्सतरी मता। देवानां सुप्रियत्वाच्च सुरूपं तं निगद्यते। योगिने मुन ६७
यः शांताः पिंगागास्तुर्ध्वरेतसः। सुधामास्त्रित्य तां वत्सकामि छं सेव समाधितः। पश्चिमादकू

समुद्रतुगिरिर्नाम्नाप्यंजनः। प्रभंजनाश्रयः श्रीमान्वरास्यमरसंश्रयः। नानाश्चर्यमयेन स्मिन्
वायुः पुरवरोत्तमा। जगत्प्राणो वसत्यत्र वे मुदनाह्लादकारकः। तस्मिन्वसंति मुनयो योगसिद्धाम
होजसः। योगशास्त्रप्रणेतारः पिशंगानामयोगिनः। तेषां कथितवानादौ वायुर्वायव्यमुत्तमं
। पुराणं शिवदं साक्षाच्छिव माहात्म्य सूचकं। तस्मिन्नोतु महानाम्नी व्रतिनंदस्तु मेकवा। आया
स्यांति महात्मानः सार्द्धिर ऊर्ध्वरेतसः। विश्रामार्थं प्रबध्नाति तेषां वत्सतरीं द्विजः। तस्यां दि
शिश्रनेतास्मिन्नस्या मश्रवणात्तदा। आश्राव्यत्वाम हानाम्न्याः स्त्रिनेश्रपितदानथा। अ
संश्रवतां बध्नाति स्तुद्धां वत्सतरी द्विजः। नच्छंति नामने वस्तुं किंचिदन्यदिहासने। सुस्तुधत्वा
द्वायुनतास्तुशुद्धाब्रह्मचारिणः। तां मध्ये गुरवे दद्याद्दक्षां नावसितापि वा। दूरस्थिनापि
ना श्रुत्वा नरपदास्यंति वांछितं। महानाम्नीप्रवतकाले गुरुशिष्ययोरन्योन्यप्रश्नसं
धाने कारणमाह स एव। ततोपराजिताशायां विधायाग्निं यथाविधि। पर्युक्षणांतं तत्रस्थ
कृत्वा णपूर्व विशान्गुरुः। सुरवासः समुद्धृत्य मुखं प्रक्षाल्य वारिणा। आग्नेय्यां दिशि गोक्
सगुरुं त्वेवाभिवादयेत्। पृष्टेन पृष्टं संधायेगुरोरासनएव च। दक्षिणं तूपविशाद दात्रां तासती

Indira Gandhi National
Centre for the Arts

संयतस्थितः।सुप्रियोंत्यप्रतिष्ठास्वदेवानामपराजितात्रासीन संश्रण्वानोगुदितो देवांश्च
ऋषयश्चानयोदिरयंते निवसंति हि।श्रानुकामामहानाम्नी जीनाः संत्वा किनास्तदा।तेषां
सीत्राणनार्थाय असुराणां तथैवचानेत्राग्निना दहन्नीसन्त्रासीनारोगान नक्ती।मतकल्प
नकुर्यंति निश्चेष्टा व्रतिनक्षिताः।।निवीर्या बाधितुं देवान्नूनत्वाका स्युअुरेतराः।देवान्प्रासु
तराशास्त्रान् ईक्षन्संश्रावयद्गुरुः।मानयन्निवृतान्तत्त्या नत्स्ये प्रयतस्तदा।अंतरेणस
मायान्तुं कश्चिदिष्टं तिराक्षसाः।वावद्व्रतलोपार्थं मायया गुरुः त्रिष्यायाः।तेषां निरसानार्थो
यसंधीपनेत्रपश्चिमाविति।व्रतलोपप्रश्नादाकारणमाह।वसिता व्रतपूर्वस्य व्रतिनो
नान्यथाकृतं स्थापनादनुनायेनदोषः संसीयतेकृतः।यस्मात्तस्मात्स्वगुरुणा पृष्टोलोप
नतप्यते।रवेः सर्वात्मकत्वात्तु तेषपश्चिमतस्थिताः।असुरादिविनूमोत्वा विचरंतिस्व
मायया।एवंज्ञात्वाचरेत्कर्म कारणानीहविन्तमः।श्रोनान्स्मात्तो च्यमिश्राश्च कुर्यात्तत्फल ६४
सिद्धये।रहस्यमरम हृष्टोक्तपंचविंशतिकर्मणां।उक्तमितिविशेषः।अत्र हविः अपण
विशेषमाह।हविरेकाईपर्यंतविहितंतत्रकर्मणि।अत्सोदनेनुविहितहविःसम्य

कृद्धिपरूषमिति।महानाम्न्यस्त्व विदामघवन्नित्याद्याऋचः।एवाह्येवेवाह्यग्नाइत्यादिनवपुरी
षपदानित्रिवारंब्रूयात्।तथाचशौनकः।तृतीयारण्यवत्स्यांतेसमाम्नातास्तुयाऋचः।विदा
मघवन्विदागातुमित्युपक्रमसंयुताः।तामहानाम्न्यइत्युक्ताः पुरीषपदसंयुताः।एवाह्येवा
दिभिःसार्धंसमीलितविलोचनः।त्रिरन्त्यायत्रिष्यस्यति।इतिमहानाम्नीव्रतं॥ ॥अथ
महाव्रतं॥ ॥महानाम्नीव्रतंप्रोक्तंमहाव्रतमथोच्यते।पूर्ववद्व्रतआदिष्टसंवत्सरमिदंच
रेत्॥२१८॥पूर्णेसंवत्सरेदेशेविविक्तेउपविश्यच।प्राङ्मुखंश्रावयेत्स्येनं महाव्रतमतःप
रं॥२१९॥अनुप्रवचनीयादि कुर्यादर्केसुणादिके।महाव्रतनायस्यादितिसावित्र्यास्त्वानद
यते॥२२०॥ ॥अस्यार्थः॥ ॥महानाम्नीव्रतमुक्त्वा महाव्रतानिधेयं व्रतांतरमिदानीमु
च्यते।व्रतस्वीकृते सतिमहानाम्नीव्रतरीत्यासंवत्सरमाचरेत्।अस्यव्रतस्यापिस्वीकार
प्रकारस्तुमहानाम्नीव्रतस्वीकरणप्रकारएव।पूर्णेब्देतथैवविविक्तेदेशेप्रागग्रेषुदर्भे
षूपविश्यआचार्यः ब्रह्मचारिणंमहाव्रतंश्रावयेत्।आश्वलायनाविनागश्रावयेदित्यर्थः।श्राव
येदित्युक्तत्वाद्ब्रह्मचारिणोनात्रपाठः।किंतुश्रवणमात्रं।तत्कारयित्वापूर्वोक्तैरेवमंत्रैःप्र

Indira Gandhi National
Centre for the Arts

वेदसादित्यमीक्षयेत्। आचार्यशिष्यावपि पूर्वोक्तमंत्रान् जपित्वा पूर्ववत् भूमिस्पर्शनं। पूर्व
वदनुप्रवचनीयहोमार्थं निसिलानदुरुवेनिवेद्यचरुं पक्वा होमं करोति। तत्र सावित्र्या स्था
ने महाव्रताय स्वाहेति जुहुयात्। एवं होमशेषं समापयेत्। अत्र भगवान् महाव्रतेपि प्र
थमव्रतादनोनुमाचरत्। पूर्वोक्तविजनशुद्धदेशे ग्रामाद्बहिर्गत्वा प्राक्कूलदर्भेष्वासीनं
प्राङ्मुखं संयतं गुरुं। शिष्यो निवाद्य प्रथमं श्रोतुकामो महाव्रतं। भोः द्युत्क्रान्त प्रथममा
चार्ये तदनंतरं। अनुब्रूहीति चवनुयाचित्वा तत्समीपतः। आसीत प्राङ्मुखः शांतः प्राक्कूलद
र्भेसौ तत्र प्रार्थितस्त्रिरनुब्रूयादाचार्यो महाव्रतं। इंद्रोपक्रमसंयुक्तां प्रथमारम्भकें श्रुतिं। मि
त्रस्य त्वादिभिर्मंत्रैः पूर्ववत्सूर्यमीक्षयेत्। जपित्वा मंत्रसंघातमुनावन्न इत्यादिकं। गुरुशि
ष्यौ स्पर्शनं च यथा पूर्वं महीतले। अनुप्रवचनीयं च पूर्ववज्जुहुयादथ। महाव्रतापरस्या
हेति द्वितीयामंत्रायिष्यते। इदं मंत्रगतं। समानं संचारं वर्जं मे च हयोः स्वाध्याय धर्म आचार्य
वदेकः फाल्गुनाद्यो श्रवणापात्त अनधीतपूर्वाणामध्याय स्व ध्यायधीत पूर्वाणामनधी ६५
यत। पूर्वाणामिति॥ अस्यार्थमाह हरदत्तकनारायणः। यदिदं महानाम्न्यो ध्ययनं सवि

धिकमुक्तं तत्सामान्यं उत्तरयोरपि महाव्रतोपनिषदाख्ययोः व्रतमनुयुज्य श्रवणांतं महानाम्नीव्रतेन
समानरूपं कर्तव्यं अयमत्र विशेषः पूर्ववत्स्मात् संचारवर्जमिति। संचारो नाम श्रोष्यन् बहि
र्ग्रामादित्यादि अरण्ये पुनरादित्यं मित्रस्य त्वा चक्षुषेत्येव मंत्रं तदुर्जयितस्यर्थः। एतदुक्तं भवति। म
हाव्रतोपनिषदाख्ययोः व्रतमनुयुज्य संवत्सरादूर्ध्वं उदगयने पूर्वपक्षे ग्रामाद्बहिर्गत्वा श्र
वणांतमवकर्तव्यं। नान्यद्ग्रामादिति। एष एव महाव्रतोपनिषद्व्रतयोरध्ययनविधिः व्रतमनुप्र
ज्य संवत्सराय मंचारयित्वोदगयन पूर्वपक्षे ग्रामाद्बहिर्गत्वा आचार्यसकाशात् निःश्रुत्वानुप्र
वचनीयं च कृत्वा ततो प्यध्ययनं कर्तव्यमिति। एतदनयोरध्ययने संपादनीयमित्यर्थः। अयम
पि विशेषो महाव्रतोपनिषदोरध्ययने भवति। यद्येकाधीयीत शिष्यः तदाचार्यवद्भू
त्वा अधीयीत। यथाचार्यो पराजितायां दिशामग्निसमीक्षमाणो ब्रूयात्। एवमवस्थे शिष्य
स्तामेव दिशामग्निमुखो धीयीत यदि द्वौ बहवो वा तदा नायं नियम आदरणीयः। अत एव
तत्रूतायताः एकाद्वा बहवो वा धीयीरन्निति। अध्ययनएवायं नियमः श्रवणं तु कदेशाएव व्र
तादेशानादरनुप्रवचनीयांतस्य संस्कारस्य तत्र सिद्धो प्रमाणाभावात्। एषां महानाम्न्या

Indira Gandhi National
Centre for the Arts

दीनां अध्ययनकाल उच्यते। श्रवणमात्रमेव कृत्वा पूर्वमनधीनं वेनाएतेषामयं कालः। फाल्गुन
मासस्यारभ्या श्रावण्याः पौर्णमास्या यः कालः स तेषामध्ययनकालः। येधीतपूर्वास्ते अस्मिन्का
ले धीयीरन्। तिष्यपूर्णमासी पूर्वावधिः श्रावणपूर्णमासी परावधिर्यस्य कालस्य स कालइ
त्यर्थ इति॥ ॥इति महाव्रतं॥ ॥अथोपनिषद्व्रतं॥ ॥आवर्यतोपनिषदमादित्याचेक्षणादिकं
।अत्रोपनिषदे स्वाहा सावित्र्या स्नान इष्यते॥२२१॥ ॥अस्यार्थः॥ ॥तथैव वेदारम्भनमुप
नयनवत्कृत्वा नवां मौंजीं नवं दंडं तथैव दत्वा स्विष्टकृदादि होमं त्वा पंचसमाप्य उक्तनियमान्पा
लयन् वर्षं नय त्वा तत्र पूर्णे दउक्तकाले ग्रामाद्बहिः उक्तप्रदेशं गत्वा महाव्रतवत्स्थिता आ
चार्यं प्रति माणवको ब्रूयात्। नो उपनिषदं अधीहीति। तत आचार्यो माणवकं प्रयातः शोहि
ताया उपनिषदिति तृतीयारण्यकश्रुतिमुपनिषदं त्रिरनुद्य पूर्ववदकेमीसयेत्। ततो मा
णवकसायंकाले पूर्ववदनुप्रवचनीयहोमं करोति। तत्र सवित्र्या स्थाने उपनिषदे स्वाहेति
जुहोति॥ ॥इत्यान्विशेषः॥ ॥अत्र भगवान्। व्रतादेशानपूर्वं यत्कृतं कर्म महाव्रते। सक ६६
ले दनुष्ठेयं तथैवोपनिषद्व्रते। अत्रोपनिषदं नोस्त्वमनुब्रूहीति याचितः। आचार्यो यानद

त्यायां तृतीयारण्यकश्रुतिं। त्रिरनुद्योपनिषदं पूर्ववद्याकेमीसयेत्। अत्रोपनिषदे स्वाहे
त्यनुप्रवचनीयके। द्वितीयाहोममंत्रस्यादन्यत्सर्वं यथापुरेति। अत्र मौंजीदंडादिषु विशे
ष उच्यते। पाराशरेण यदस्य विहितं कर्म यत्स्वत्रयाच मेखला। यो दंडो यच्च वसनं तत्तद
त्र व्रतेष्वपीति। इत्युपनिषद्व्रतं। अथ गोदानव्रतं। गोदानं चौलवत्कार्यं षोडशाब्दं तदुच्य
ते। अंत्रं कापवेशानं नास्ति श्मश्रूणां मुंडनं भवेत्॥२२॥ ॥आदितिः श्मश्रूणि वपत्वाप
उदंतु वर्चसे। पिंजूलादि निधानं तं श्मश्रुपक्षे न वदिहेति मार्जने विशेषोयं श्मश्रूणि
वारिशामुरवं॥२३॥ ॥अस्यार्थः॥ ॥गोदानाख्यं कर्म चौलकर्मप्रकारेण कर्तव्यं तत्र षो
डशे वर्षे कर्म क्रियत्यते। तत्रोपलेपाग्निप्रतिष्ठापनादिप्रधानहोमांतं विधाय पन्थैव दी
ताघ्नौ न सिपात्रयुगपत्प्रक्षिप्य पिकूदनादि कुर्यात्। तत्र विशेषः। ततीयवर्षे यद्विहितं चौलं
तत्र यान विहिता इति कर्तव्यता सात्र कर्तव्येत्यर्थः। तच्चुनतीमेव ततीयविहितं इदं तु षो
डशवर्षे विधीयत इति। अस्मिन् गोदानकर्मणि कश्चन विशेषः। अत्र अंकापवेशानं मातु
कसंगापवेशानं नास्ति। चौलसोदकेन नवनीतेन वा मतःकर्णप्रदेशमारभ्या तोरसि

Indira Gandhi National
Centre for the Arts

शिरःकुंदनं भवति। तत्स्थाने श्मश्रूणां मुंडनं भवति। इयानेव विशेषः। अत्रसौकर्यार्थं श्लोकत्र
कारेण स्वयमेव मंत्रेश्च दर्शयति। अदितिः श्मश्रूणि वपत्वापउंदंतु वर्चसइति मंत्रेण श्म-
श्रूणां वामप्रदेशमारभ्य तथैवार्द्रीकरणं भवति। पिंजूलादिनिधानांतं नाम ब्रह्म हस्ते स्थि
तेष्वेकविंशति कुशांकुरेषु त्रीन् कुशानादाय कुमाराभिमुखं पश्चिमभागान् कृत्वा ओं
षधे त्रायस्वेति मंत्रेण दक्षिणश्मश्रुनाशे निधाय तेषां कुरेषु क्षुरं स्वधितेमैनंहिंसीरिति मंत्रे
ण निधाय येनावपदिति मंत्रेण निधाय येनावपदिति मंत्रेण सश्मश्रुकान् कुशांकुरान् छि
त्वा तान् कुशान् प्रागग्रान् कृत्वा शमीपर्णानादाय तैः सह वीं कृत्य मातुः करे दद्यात्
।सा च मातानन्सश्मश्रु शमीपर्णकुशांकुरान् डुहे गोमये प्रागग्रे निदध्यात्। एवं देवनिधानं
तदंते श्मश्रुपेसनं भवेत्। द्रुहगोदानकर्मणि क्षुरमार्जने अयं विशेषः। यत्क्षुरेणास्मि
न्मंत्रेण प्रथमार्द्धे उत्तरार्द्धे स्वेवं पठनीयः। वप्ता वपसि श्मश्रून्। शीर्षं शिरो मुखं मासिति
पादे नवमज्यादि स्पष्टं। तस्तननापितस्याग्रे विशेषः प्रेषउच्यते॥२४॥ केशान् श्मश्रु लोम
नखान्युदकान्तं स्नानि कुर्विति॥ ॥अस्यार्थः॥ ॥नापितमाहूय प्रैषविशेषेण तं शिक्षय ६७

न्तरीताष्णा निरङ्गिरव र्थं कुर्वाणोऽक्षुण्वन् कुशली केशान् श्मश्रु लोम नखान्युदकं संस्था
निकुर्विति। प्रथमं वनापितप्रति एतत्प्रैषविशेषः। केशादीनुदकसंस्थानि वापयित्वा स्नान
मा हास्नात्वा वा गमतः स्त्रिष्टं नन्दन दृशोषं नयेदिथ॥२५॥ आदिसेत्तेनमितु वाचं विसृजतां। तिक्ति
गुरोः। उत्का वरं ददामीति दद्यात् गोमिथुनं नत इति॥२६॥ अस्यार्थः॥ ॥वपनानंतरं स्ना
नं कृत्वा स्विष्टकृदादि होमशेषं समाप्य मौनी भूत्वा दिनशेषं निःक्षेन्नयेत्। ततोऽस्तं गते
आदित्ये गुरोरंतिके गत्वा मौनं विसृज्य नाऽऽचार्य त्वदर्थमपि सौतं वरं ददामीति कवं नुस
त्का। आचार्याय गोमिथुनं अनक्ष्वाहं गांच दक्षिणात्वेन याचित्वा दद्यात्। सर्वं वङ्कलादेशः
संवत्सरमिदं चरेत्। व्रतेष्वेतेषु सर्वेऽप्युद्गति इंकेशधारणं॥२७॥ ॥अस्यार्थः॥ ॥सब्रतादे
शाः एवं वङ्कवनि। आदेशो नाम अशाशा रूपोऽर्थः। इदं गोदानव्रतं संवत्सरपर्यन्तं चरेदि
ति गुरुणादिशति। अयं व्रतादेशः। तत्र व्रतं ब्रह्मचारी संवत्सरपर्यंतं चरेत्। सर्वेषु पिमहान
म्न्यादिषु व्रतेषु केशधारणं प्रसिद्धं। कर्मांगत्वेन वपनं भवति। स्वेच्छया न कार्यमित्यर्थः।
अत्र नगेवान्॥ ॥गोदाननामषष्ठं कं चतुर्थं व्रतमस्यतु। महानाम्न्यादिभिः सार्द्धं पोवाप

Indira Gandhi National
Centre for the Arts

र्यंतु । विद्यतोऽबालत्वाज्ञानमयं केशनिवेशोप्यस्य नेष्यते । केशानाब्दोक्तिर्देशेषु तु श्मश्रुशब्दमु
दीरयेत्तान श्मश्रूणामेव स कोत्र न केशानामिति रितं । केशान्वपति । यत्रापि श्मश्रूणीति
समीरयेत् । केशापसेतु कत्तव्यं श्मश्रूपक्षे तदा वरेत् । स्कनादिमार्जने मंत्रे यत्क्षुरेणादि
केष्वपि श्मश्रूणि ष्टुंधीस्फत्का थवि रोमुखमुदीरयेत्तु । यत्क्षुरेण नाप्राग्नि रिया दिमंत्राना
पितत्रासनः । तत्र कर्त्ता श्मश्रूलोमनखानी । नेपदां तरेणा । उदक्संस्थानि कुशाली । कुवि
यवमुदीरयेत् । ततः स्नाने समीपस्थे तस्मिन् स्विष्टकृदादिकं । उपनिष्ठात्तनंतंत्रमात्वा
यूनेस्तु समापयेत् । शिष्यः स्नातानतो वाचं नियम्यादिवमसयात् । निष्ठदस्त मिलस्व
ये गुरोरंतिकमागतः । वरं ददामीत्युक्त्वा च गोद्वयोगुरवे दिशेत् । असंभवे गोद्वयो
र्मिलित्वा वा गुरोर्दिशेत् । उत्तरेद्युर्गुरुरस्य वत्सरं व्रतमादिशेत् । सर्वास्तु व्रतचर्यासुत्र
सिद्धके शाधारणमिति ॥ ॥ इति गोदानव्रतं ॥ ॥ अथ समावर्त्तनाख्यं कर्म ॥ ॥ वेदव्रतानि
वा पारंनीत्वा ह्युभयमेव्वा व्रतपक्षे पिशब्दार्थमारण्याध्ययने कृते ॥ २८ ॥ विद्यांते गुरुमा ६८
हा । हेकमर्थं करवाणीत्यमथ माहृतं कृत्वा ततोनुज्ञामवाप्य च ॥ २९ ॥ आचार्यायात्मन

चैव मण्यादीन्यनुकल्पयेत् । आचार्यायैव कल्प्यं तेन लब्धेनोभयोर्यदीति ॥ ३० ॥ अस्यार्थ
ः ॥ ॥ समावर्त्तनं वक्रमादौ तत्समयमाह । वेदशब्देन चत्वारो वेदाः प्रदर्श्यते । चतुर्णामपि
वेदानां पारः कार्यः । वेदशब्दस्य कत्व प्रयोगात् । स्वशाखोक्तवेदस्याध्ययनकृतेनपाठो
द्यात् । ते वेदानां पारंनीत्वा अथवा महानाम्न्यादीनां चतुर्णामपि पारंनीत्वा उभयोर्वेदव्रत
योर्वा पारंनीत्वा व्रतपक्षेपि यदा केवलं व्रतानामेव पारंनीत्वा व्रतपक्षेपि । यदा केवलं व्रता
नामेव पारंनीत्वा स्नायात् तदा शब्दार्थज्ञानपर्यंतं पठित्वा कर्मविवाहार्थं विद्यांते आर
ण्याध्ययने कृते रात्रिस्नानं करोति । तदा विद्यांतता । स्नातकस्तु त्रिविधः । विद्यास्नाता
व्रतस्नातो विद्याव्रतस्नातश्चेति । गुरूपासनया सम्यगर्थावबोधपर्यंतं वेदं शास्त्राम्य
संहृत्या दक्षिणादिभिस्तोषितेन गुरुणाभ्यनुज्ञातः स्नानं करोति स विद्यास्नातः महा
नाम्न्यादिचत्वारि वेदव्रतानि यथोक्तं चरित्वा व्रतांते गुरुणा स्नानार्थमभ्यनुज्ञातः स्नानं
को व्रतस्नातकः । विद्यामभ्यस्य सम्यग्व्रतानि च चरित्वा तदंते स्नातको विद्याव्रतस्ना
तको भवति । विद्यांतव्रतांते विद्याव्रतांते माणवको गुरुमाचार्यमेव पृच्छति । अहं तव आ

Indira Gandhi National
Centre for the Arts

र्थे धनं त्वदर्थे किं करवाणि इति शिष्येणोक्तः गुरुर्यमर्थमाहरेत्याद्यर्थयात्वनेन मर्थेन तस्मै सं
पाद्य दत्वा तस्माद्गुरोरनुज्ञां चावाप्य स्नानसामग्रीं संपादयेत् तथा च गौतमः ॥ ॥ अधी
त्य वेदं शास्त्राणि कृत्वा वेदशास्त्रापोकृत्वा वेदव्रतानि च चत्वारि गुरवे दत्वा यथाशक्ति द
क्षिणां । ततस्तेनाभ्यनुज्ञातः समावर्त्तनमाचरेदिति । आचार्यापि च विदित्वा चतुरो वेदान्त्री
न्द्वावेकमथापि वा । तावयेद्दक्षिणां निस्तु गुरुरन्त्या विचक्षणः । धनं पित्रादिबंधुभ्यः स
माहृत्याथ वा पुरात् । राजन्यो वा गुरुं सम्यक् कुतो वयं साधको ब्रवीति ॥ ३ ॥ गुरुदक्षिणादाने
मनुः । अपूर्वं गुरवे किंचिदुपकुर्वीत धर्मवित् । स्नास्यंस्तु गुरुणाज्ञप्तः शक्त्या गुर्वर्थमाहरेत् ।
क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमंततः । धान्यं वासांसि शाकं वा गुरवे प्रीतिमाहरेदिति । प्र
कृतमनुसरति । तामेव सामग्रीं विवृणोति । आचार्याय मन्त्रवमणपादीन्यानरणानि उपक
ल्पये संपादयेत् । यद्युक्तयार्थं संपादितुमशक्तस्तदा आचार्यस्य संपादयेत् । इदमत्र ग ६९
ह्यामणिकुंडलवस्त्रयुगंछत्रमुपानद्युगं दंडस्रजमुन्मर्दमनुलेपनमांजनमुष्णीषमित्या
मनेवाचार्यायस्वयस्त्युनयोर्निविंदेत तद्धार्यायिवेति । कुर्वीतस्वयमेवेतत्समावर्त्तन

संज्ञकं ॥ ॥ अस्यार्थः ॥ ॥ समावर्त्तनकर्म स्वयमेव कुर्यात् ॥ ॥ इतिकर्त्तव्यतामाह ॥ प्राग्घोदग
यनाद्युक्तमुत्तरायनः स्वयं प्रागुदीची स्वयं गच्छेत्तस्यां वै यज्ञियस्यया । शाखेशानी
मनातस्याः छित्वा प्रादेशास्तं मितां ॥ २ ॥ आहृत्य समिधं तूमेरन्यत्र निदधाति तां । दत्वा गां
नानस्याः छित्वा प्रादेशास्तं मितां ॥ ३ ॥ अस्यार्थः ॥ ॥ उदगयनाद्युक्तकालं प्राप्य स्वय
भोजयेद्द्विप्रान्गोदानोक्तकरात्पथेति ॥ ३ ॥ अस्यार्थः ॥ ॥ उदगयनाद्युक्तकालं प्राप्य स्वय
मुक्तस्तस्य यतः ब्राह्मणैः सह स्वस्तिवाचनं नांदीश्राद्धं च स्वयमेव कृत्वा कर्म प्रारभेत् । अन
एवस्मात्पतरा आसमावर्त्तनात्पूर्वं पिता कुर्यात्तन्नांदिकं । समावृत्तः स्वयं कुर्याद्दाद्यपाणिग्र
हे पितेति । तत स्वस्ति वाचनं स्वयमेव स्वदारासापेक्षया ईशानी दिशां गत्वा तस्यां दिशि प
क्षिपुच्छसस्यई शान्यनागलग्नायाः शाखायास्तस्याः प्रादेशमात्रमेकं समिधं छित्वा तां
गृहीत्वा स्वमंदिरमागत्य तां समिधं तूमेरन्यस्मिन्कस्मिंश्चिदुपरिप्रदेशे निदधाति । तत्र स
निलक्षणं गृह्ये । आर्द्रीमन्त्राद्यकामः पुष्टिकामस्तेजस्कामो ब्रह्मवर्चसकामस्तु पवाना मुन
यां उनयका मदति । अस्यार्थमाह नारायणः ॥ ॥ उपवानां शुष्का ग्रामित्यर्थः । एको भागः
शुष्कः अपरः आर्द्रः । आर्द्री वा न । अथवा आर्द्रां आर्द्रा अग्रे भागः शुष्क इति द्वौ तेकाराः

Indira Gandhi National
Centre for the Arts

अथ कर्मांगं द्विराचम्य प्राणानायम्य तिथ्यादि स्मृत्वा आत्मनः वृत्तस्य समाप्तिं कृत्वा समावर्त्तनक
र्माधिकारार्थं इमां गां अस्मै ब्राह्मणाय संप्रददे । तथैव गोदत्वा स्मृतिप्राप्तं नांदीश्राद्धं कृत्वा
क्तिः। आपस्तंबशाखीयमिताक्षं। नष्टस्यापासनाग्नेपुनःसंधानेक्रियमाणेऽग्निप्रतिष्ठा
प्यान्वाधायदिवाहुत्याहुतयःलाजाहुतयःगृहप्रवेशनीयाज्याहुतयः हृदयांजनंचनवतिर्हो
मद्वयंचात्रसमानतंत्रंस्यात्। लाजहोमात्रापिपत्न्यंजलिनाकार्यः॥ लाजावपनंतुस्वयमेवे

Indira Gandhi National
Centre for the Arts

करोति न धूम्राद्यादयः॥ ॥अथ निसोपासनविधिः॥ ॥अथ यस्मिन्विवाहाग्निः कृतस्तस्मिन्नहनि
तस्यतु॥३६॥ यत्सायं ततआरभ्य वह्निं परिचरेत्स्वयं। आसनोऽसं नवपत्नी पुत्रादय इति
स्थितिः। अन्ये तु मन्यन्ते पत्नी कुमार्यैस्तद्धोमकं। नेत्रंनास्त्यत्र नवावद्धुन्ति लुब्द्धं च न यथेति॥
॥३८॥ अस्यार्थः॥ ॥अथशब्दे मंगलार्थः। यस्मिन्दिने विवाहहोमः कृतः तस्य दिनस्य यत्सा
यं ततआरभ्याग्निं परिचरेत्। नित्यहोमं कुर्यादिति भावः। अत्र जयंतो विशेषमाह। यदि प्रा
दुःकरणवेलायाः ऊर्ध्वमस्तावग्निः कृतस्तन्नः तथा सत्यपरेद्युः सायमारभ्य तत्प्रादुःकरणवेला
नामास्तमानात्सूर्वदिनशेष आग्नेः प्रदीप्तीकरणं। तथैवोदयात्सूर्वे रात्रिशेषेपि भवति। नष्टा
ग्नेरपि पुनःसंधाने सायमेवानित्यहोमारंभो भवति। शौनकोपि यस्मिन्नह्नि विवाहः स्यात्सा
यमारभ्य तस्य तु। परिचर्यो विवाहाग्नेर्विदधीत स्वयं द्विजः। यदि रात्रौ विवाहाग्निः कृतस्त
ःस्मात्तथा सति। उपक्रम्यात्तरस्याहः सायं परिचरेद्बुधमिति। संग्रहेप्याधाने पुनरा ९४
धाने सायं होममुपक्रमेत्। स्थालीपाकपौर्णमासं प्रारभेत्प्रतिपद्गणे इति। अत्राग्नि
परिचरणे स्वस्य मुख्यत्वं कदाचिदनुरोधेन स्वस्यासनं नवपत्नी पुत्रादयो प्याधिकारि

णो भवंति। आदिशब्दात्कुमारी अंतेवासी शिष्य उच्यते केनचिदनुरोधेन स्त्री पुत्रादयसंभवेंऽक
णो भवंति। अदृष्ट्वा ज्ञातेरसंयोमिध्येऽकस्मिन्नग्नि समीपविद्यमाने इतरे
त्विगादिनिर्वाहो भव्यमितिस्मृत्यर्थसारे दंपत्योर्मध्ये एकस्मिन्नग्नि समीपविद्यमाने इतरे
श्राधिकारिण इति स्मृत्यंतरो दंपत्योरसमसं तु होतव्यं न त्विगादिनेति। तस्माद्द्योर्मध्ये एकेन
स्थातव्यमेवा इतरथानष्टाग्निरेव स्यात्। केषांचिन्मते पत्नी कुमार्योः दत्तहोमकं होमकर्तृ
स्थातव्यमेवा इतरथानष्टाग्निरेव स्यात्। केषांचिन्मते पत्नीकुमार्योः नहोकर्मक्त्वनात्। पत्नी
परिचरणमिच्छन्ति॥ ॥कुतः स्त्रीणां मंत्रानधिकारात्। अन्ये तु सहोकर्मकत्वनात्। पत्नी
संत्रहत्यवत्। नित्यहोम इति कर्तव्यतामाह। तंत्र मिसादिना। तंत्र शब्देनान्वाधानादिक
मंगकलापः स चात्र नास्ती निभावः इति वृत्तिकृन्नारायणेन निरूपितं। शौनकोपि। पत्नी
कुमारी पुत्रो वा शिष्यो वापि यथाक्रमं। पूर्वस्य पूर्वस्याभावे विदध्यादुत्तरोत्तर इति। अथ प्रा
दुःकरणकालमाह॥ ॥ज्वलयेदपराह्णेग्निमस्तंयाने दिवाकरे। पर्युक्ष्याग्निं परिस्तीर्य पर्यु
क्ष्य च ततः परं। पयः प्रभृति पुलकं संस्कुर्यादग्निहोत्रवत्। अलंकरोति पुष्पाद्यैरनलाय
तनततः॥४०॥ द्रवं हविः स्रुवेण व पाणिना कठिनं हविः। जुहुयादस्तमयस्याहोसुसमिद्ध
ऊतारानि॥४१॥ ध्यात्वा शब्दं चतुर्थ्यंतं प्रजापतये इत्येषा स्वाहाकारेण जुहुयात्ततः परिस

Indira Gandhi National
Centre for the Arts

मूहूर्तौ ८॥ ॥अस्यार्थः॥ ॥अपराह्णशब्दोयं अस्तमानात्पूर्वं दिनत्रो वाचकः। तस्मिन्काले ऽग्नि
प्रदीप्तं कुर्यादिति सायंसंध्यां सनास्कारामिति वचनात् सायं संध्यामुपास्य अस्तमिते सूर्ये
होमारंभं कुर्यात्। तत्र प्रथमं कर्तव्यमाह। शुचिरपि कर्मार्गं द्विराचम्य होमदेशमागत्योत्त
आसनेउपविश्य प्राणानायम्य इत्यादि स्मृत्वा एवंगुण विशिष्टायां तिथौ आत्मनः परमपुरु
षप्रसादार्थं सायमौपासनं करिष्य इति प्रतिज्ञाय अग्निं पर्युक्ष्य परिस्तीर्य ततः पर्युक्षण
कस्मिन्पात्रे पयः प्रभृतीनां द्रव्याणां मध्ये एकं द्रव्यं गृहीत्वा अग्निहोत्रवद्द्रव्यसंस्कारं कृत्वा
ऽग्निहोत्रशब्देनाहिताग्निविहितः सायंप्रातर्विहितो नित्यहोम उच्यते। तच्च श्रौतकांडे द्वि
तीयाध्याये पशाद्द्रव्यसंस्कार उक्तस्तद्वदिहापि कर्तव्य इत्यर्थः। तच्च द्रव्यादि गृह्यसंग्रहे प
यो दधि यवागूश्च सर्पिरोदनतंडुलाः। सोमो मांसं तथा तैलं मापस्तानि द्रवो वसु। अपराणि
त्रीणि गृह्यकामेन ब्रीहियवतिलैः इति। तत्र द्रवद्रव्याणां संस्कार उच्यते। अग्नेरुत्तरतो
गारान्निरुह्य तेषु द्रव्यं संस्थाप्य आधिश्रित्यश्रुप्रकर्षणेनावज्वाल्य त्रिः पर्यग्नीकृ ८५
त्वोदगुद्वास्याङ्गारान्प्रत्यूह्य एकाकृत्य द्रव्यमग्नेः पश्चादात्मनो ग्रे कुशेषु संस्थाप्य ततः

गंधपुष्पाक्षतैरग्निमलंकरोति। द्रवद्रव्यं हविः स्रुवेणैव जुहुयात्। कठिनं तंडुलादिह
स्तेनैव। प्रदीप्तेग्नौ अग्नये स्वाहेति जुहुयात्। प्रजापतये स्वाहेति च तूष्णीं तंत्रा बद्ध्या
ध्यानमनसैव तूष्णीं द्वितीयाहुतिं जुहुयात्। तूष्णीमिति पदं प्रजापतिध्यानार्थं। पूर्वाहुत्य
पेक्षया किंचिदधिकपरिमाणवतीं ईशान्यदेशाउत्तरदेशे वा स्वाहाकारं पठित्वा जुहुया
त्। गृह्यकारस्मरणात्। तूष्णीं तूपरि सीमसंसृष्टां प्रागुदगुत्तरतो वेति। येनैव द्रव्येण सा
यं जुहोति तेनैव प्रातः। ततः उत्तरपरिषेचनादि कृत्वा गृह्यसंग्रहोक्तोपस्थानमंत्रैरुपस्था
पयेत्। अग्ने त्वम इत्यादिमंत्रैः। तत्र मंत्रानाह। अग्न आयूंषिमंत्रत्रयेणाग्नेस्त्वन्न इति स
कं। प्रजापते न त्वदेतानीत्यनेनानुं तत्वन्नित्यनेन हिरण्यगर्भ इत्यनेन नाएभिर्मंत्रैर्वायव्यदे
शो प्रष्ठान्ततः कृतांजलिः सन्नग्निमीक्षमाणो जपति। सूर्योन इत्यनेन। अदृश्रमित्यनेन चि
त्रं देवानामित्यनेन नमो मित्रस्येत्यनेन प्राजापत्ये घायस्थायां नमदति प्रातः। तेन का
पि पाते समूह्य पर्युक्षाप्युपातिष्ठेद्दक्षिणेन जं। अग्नेः स्थाने सौर्यश्च प्राजापत्यश्च निप
तः। अग्निः प्रजापतिः सायं प्रातः सूर्यं प्रजापतिः। अग्न आयूंषि पवित इत्यनेनः द्वाभ्याम अग्ने त्व

Indira Gandhi National
Centre for the Arts

मित्यथास्सूर्यो नइति मंत्रेणाहुडुत्यंवद्वितीयया। हिरण्यगर्भेसामि तिहुपतिष्ठेहुताग्नाने
।सोयं वैश्वानरी येवीसमस्यसातिपंचभिः। द्विदेवत्स हविष्यांनमिति सूर्याग्नि देवत्तं। याव
ज्जीवंपरिचरद्वमौपासनं गृहीति॥ ॥प्रातरप्येवमेव तु। व्युष्टायांज्वलयेद्विन्नसायं
होमःपुराहुतः॥८५॥ पयसान्येन वाप्रातस्तेनैवताहहुत्नि हुत्वापूर्वं मंत्रस्तुसूर्योयस्वाहे
त्यन्यसम्भवेत्॥ ८४॥ आसायंक्रमेणः प्रातराप्रातःसायंक्रमेणा। आहुतिर्नोनिपद्येत
पार्वणंपार्वणांतरादिति। अस्यार्थः॥ ॥ततउपस्थानानंतरमुपविश्य होमांतेपरिसमूह
नंपर्युक्षणंच कर्त्तव्यं। अस्मिन्समयेविभूतिधारणंबृहत्सामेत्यनेन कार्यं त्रिपुंड्रधा
रणाघ्रहात्। प्रातः कालेतु होमसमयं प्राप्यअग्नयेवरीत्यो कर्त्तव्यमिति। प्रातर्होमे
प्रादुःकरणकालमाहाव्युष्टायामिति। उदयात्पूर्वंघटिकाद्वयादिलक्षणः रात्रेरुषःव्यु
ष्टाशब्दवाच्यः। तस्मिन्कालेअग्निप्रदीपयेत्। आचार्यैः। सम्पादितस्ताविनरवासायं
वजुहुयुस्तदा। अथप्रातहुतेनाग्निसमुदितेकेयथाविधिरिति। मनुरपि। लेखामात्रस्त
स्वयंतरादिमाविस्तासमन्वितः। उदितंतु विजानीयात्तत्र होमं प्रकल्पयेदिति। तत ९८

उक्तप्रकारेण होमं कुर्यात्। सूर्यायस्वाहेतिप्रथमाहुतिः। द्वितीयाहुतौ प्रजापतिंमन
साध्यात्वास्वाहाकारांतं सएवमंत्रः। आहुतिस्थानमपितदेवभवति। येनपयःप्रभृतिके
णहोमद्रव्येण सायंहोमः हुतस्तेनैवद्रव्येण प्रातर्होमोपिभवति। सायंप्रातर्होमौ एकद्र
व्यसाध्याविस्यर्थः। होमकालातिक्रमेओतरत्रैप्रदोषांतोहोमकालः संगवांतःप्रात
स्तमतिनीयचतुर्गृहीतमाज्यंजुहुयान्मनोज्योतिर्जुषतामाज्यमविच्छिन्नंयज्ञंसमि
मंदधातु। याइष्टाउषसोयाश्चनिष्टास्ताःसंतनोमिहविषाघृतेनस्वाहेति। प्रदोषां
तस्सायमारभ्यनवघटिकात्मकःसायंहोमकालोभवति। प्रातस्तुसंगवांतोभवति
। यस्मिन्कालेगावोस्सैवेः साहिताआसतेससंगवकालः। विप्रदिद्रुत्तीयानागादश
नाडिकाः तदतःसंगवावः। केचिद्वादशघटिकात्मकः कालःपदातंकालमतिक्रमेतदोषा
यश्चित्तंभवति। तच्चप्रायश्चित्तंचतुर्गृहीतमाज्यंमनोज्यातिरितिमंत्रेणाजुहोति। का
र्यामपितनीयाप्रायश्चित्तंप्रकरणेवक्ष्यति॥ ॥इदसौकर्योधालिरव्यते॥
नित्यहोमस्त्वतिक्रांतसंरहस्याज्यंचपूर्ववत्। चतुःहुत्वागृहीत्वाउपमनस्वस्याजुहोत्स

Indira Gandhi National
Centre for the Arts

थ। होमात्प्रागेवाचमनादि कृत्वा आत्मनः नित्यहोमस्य कालातिक्रमजनितप्रत्यवायपरिहा
रार्थं प्रायश्चित्तं करिष्य इति संकल्प्य इतिरसंकल्प्य परिसमूहनादि कृत्वा सपवित्र
के पात्रे आज्यमासिच्य अधिश्रपणादि कृत्वा तथैवोत्पवनं कृत्वाज्यपात्रं तथैवाग्नेः अ
त्युदग्धाय दर्वी स्रुवयोः संमार्जनं कृत्वा दर्वीं सव्येन गृहीत्वा दक्षिणेन स्रुवमादायाज्यं
ज्यस्थालुर्वीरं गृहीत्वा तामेव दर्वीं दक्षिणेन गृहीत्वा मनोज्योतिरिति निमंत्रणं जुहो
ति। सैगृहकारादयस्त्वत्रापत्काले आसायं सायंकालपर्यंतं प्रातर्होमकाल इति
तथा प्रातःकालपर्यंतं सायं होमकाल इति। आहुतिर्नाम होमः नानिपद्येत अतिपा
तोनास्ति काललोपो नास्तीत्यर्थः। पार्वणपार्वणांतरालातथैव पूर्वस्थालीपाकमार
भ्य उत्तरस्थालीपाकपर्यंतं इष्टिकालो नातिपद्यत इति। एतच्च स्मृत्यंतरेणाद्रियते। तत्रा
पत्काले आत प्रयाणकालविषयपित्र्यादिनाग्नीनां दक्षहोमविधायि इति। तस्मात्
प्राच्यां तत्पुरुषस्याबलिः एवं दक्षिणभागे वलयाद्वाहिः कमप्यवकारस्य स्वाहा समा ९७
बलिः तस्मादपि प्राच्यामेवतत्पुरुषस्याबलिः एवं पश्चिमभागे तथैव वरुणाय बलिः

आगामिदिनानां होमकालानां कृष्णत्रिमणहोम इति। एकाग्निविषयेत्वपस्तहोमो नास्ति
तत्राग्निवत्समासहोमो भवति। तत्र सायमौपासनं कृत्वा तदैव आगामिप्रातर्होमं चा
कृष्यतदैवक्रियत इत्ययं समासहोमपदः। स्वकार्यव्यासंगेन सर्वत्र प्रसक्तः तच्च त
त्रायं प्रयोगः॥ सायमौपासने समाप्ते आचमनादि कृत्वा एवंगुणविशिष्टायां तिथौ देशा
कालाद्यनुरोधेन आगामिप्रातर्होममाकृष्य इदानीमेव करिष्य इति प्रतिज्ञाय आगामि
प्रातर्होममपि कुर्यात्। व्रीहीणां च यवानां च चतुःषष्टिराहुतिः। तिलानां तु तदर्धस्या
तदर्धस्याहुतस्य विति॥४७॥ ॥अस्यार्थः॥ ॥अत्र आहुतिप्रमाणं संगृह्यते। व्रीहितुष
लक्षणं तंडुलादीनामपि आहुतिप्रक्षेपस्तु प्रजापत्यतीर्थेन दैवतीर्थेनेति तयंतः। तंतुः
षष्टिसंख्यातैः कणैरेव एकाहुतिः। तिलानां तु तदर्धस्यापि द्वात्रिंशत्संख्याकैः कणैर्भवति
तदर्धस्याघृतस्य तु। अत्र तदर्धेन तोलनं तेन प्रमाणेन आहुतिर्भवति। अपरमाहुतिप्रमा
णं शास्त्रांतराद्वगंतव्यं॥ ॥इति नित्यहोमविधिः॥ ॥अथ वैश्वदेवविधिः॥ ॥सायंप्रातः
सिद्धस्य हविष्यजुहुयादिति। गृह्य वैश्वदेवाख्य कर्मणः कालद्वयेपि नित्यमन्वयेतेन चोक्त

Indira Gandhi National
Centre for the Arts

अत्र क्रमानुरोधेन सायमारंभे प्राप्ते तत्राह। गृहस्थो वैश्वदेवाख्यं कर्म प्रारभेत दिवान्तं त्रं ना
न्यत्र नगरव छिद्रं चनं यथा॥८७॥ औपासनाग्निमन्वित्यं वा समिद्धाथ हविर्भुजमिति
अस्यार्थः। वैश्वदेवारंभस्त्वदिवैव न वृति। ननु सायं अत्र तंत्रे नास्ति अन्वाधानादौ गकला
पो नास्ति। अन्यस्मिन्नग्नौ पाकः अग्न्यंतरे होमः इति नायस्मिन्नग्नौ पचेदन्नं तस्मिन्होमो वि
धीयत इति कात्यायनवचनात्। औपासनाग्निं लौकिकाग्निं वा समिद्धा आचमनादि कृत्वा
आत्मनः सिद्धस्यान्नस्य पवित्रीकरणार्थं आत्मनश्चातिथ्या पुंसंस्कारार्थं वैश्वदेवाख्यं कर्म क
रिष्य इति संकल्प अत्र वैश्वदेवे औपासनाग्निमिश्रस्यार्धस्यार्धं मर्थः। अत्राग्नि हयं विधीय य
ते। औपासने विहातव्यं शालाग्नौ वा विजानता विकल्पः स्वेच्छया कार्यो नाकृयेवात्र व्यवस्थि
तिः। अत्र उपासनाग्नीकरणपक्षे स्मृत्यंतरे। प्रातर्होमं तु निर्वर्त्य समुद्धृत्य हुताशनात् शेषं म
हानसे कृत्वा तत्र पाकं समारभेत्। पाकांतेग्निं तमाहृत्य गृह्याग्नौ तु पुनः क्षिपेदिति। नारायण
वि। सर्वाचार्यो विश्वविस्मातो विधिनाचम्य वाग्यतः। प्रविन्यपस्यन्न मिद्धेग्नौ वैश्वदेवं समाचरे
त्। पर्युक्ष्य परिस्तीर्याग्निमलंकृत्य च पूर्ववत्। हविष्यमधुमादध्यादध्योर्धिं। शिशानले च तत्प्रोक्ष्य ९८
होमपर्यंतान्स्रुग्हृदि सव्यं निधाय चेति। अस्यार्थः। परिस्तरणवर्जं पर्युक्षणादि कृत्वा पात्रे घृता

क्त हविष्यमन्नं गृहीत्वा। अग्नावधिश्रित्य तत्रैव प्रोक्ष्य उदगुद्वास्य अग्नेः पुरस्तात् स्थापयित्वा
सव्यं पाणिं हृदयदेशे संस्थापयित्वा वक्ष्यमाणैर्मंत्रैर्जुहुयात्। हुत्वा हस्तेन सूर्याग्नेयादिभिर्दशभि
र्मंत्रैः। प्रजापतिपर्यन्तैः स्वाहाकारैर्वैश्वदेवे न तु स्मृतिः। पर्युक्षणोत्सर्जनं कुर्याद्वयपासोपमीरिनइति। अ
स्यार्थः। सूर्यायेत्यादिभिर्दशसंख्याकैः मंत्रैः क्रमेण हुत्वा अत्र पाणिना हवनं। सूर्याय स्वाहा प्र
जापतये स्वाहा सोमाय वनस्पतये स्वाहा अग्निषोमाभ्यां स्वाहा इंद्राग्निभ्यां द्यावापृथिवीभ्यां
धन्वंतरये इंद्राय विश्वेभ्यो देवेभ्यः ब्रह्मणे स्वाहा अत्र वैश्वदेवे प्रजापतिर्यदस्य साक्षात्स्मु
रवेनैवोक्तिः। न स्मृतिः। दशाहुतीस्तत्रांते न प्राप्त स्यादिति होमं च तत्रैव कृत्वा पश्चात्पर्यु
क्षणं प्रोक्षणं कर्म एतावदतः कर्मणो देवयज्ञानि संज्ञा एतानतु दिवल्लीनहुत्वा प्राक्संस्था
स्था निरंतरं तु। मुत्क्रांतराल प्राक्संस्थानेव्या इत्यादिभि हरेत्। इहापि जवति स्वाहाकारान
ज्ञिनयनके। अद्भ्यो हत्वा द्वलेः प्रसेगिंद्रायेति बलिं हरेत्। उदगिंद्राद्बलेरिंद्रपुरुषेभ्यो बलिं
हरेदिति। अस्यार्थः॥ एते रेव दशभि मंत्रैः भूमौ प्राक्संस्था निरंतरापरस्परसंलग्नान् बली
न्हरेदिति। अत्राग्नेः क्रियमाणपाः यंते अस्याः श्वलिना याम ध्ये अदक्षरोसत्का अद्भिरेवैभि ६
र्मंत्रैः पंचभिः प्राक्संस्थेन बलीन्कराति। अद्भ्यः स्वाहा ओषधिवनस्पतिभ्यः गृहाय गृहदेवता
भ्यः वास्तुदेवताभ्यः यथादेवयज्ञस्वाहाकारेण होमः। तथैवात्र क्रमोणं न यज्ञापि न वनीय यं।

Indira Gandhi National
Centre for the Arts

एकाङ्गुलिसाध्येपि न्यस्तेस्वाहाकारो नास्ति। नत्रस्वधाकारस्यैवोक्तत्वात्। अथ अङ्गोह्मिता द्वलेः प्र
त्यग्निभागे इंद्रायेति बलिः। तस्मादुत्तरदेशे इंद्रपुरुषेभ्य इति। यमायेत्यंतरालस्य हरेद्दक्षिणतो बलिं
तस्मादुदक्स्थ यमपुरुषेभ्यो बलिं हरेत्। पश्चिमतः प्रत्यग्बलिं कृत्वा वरुणायेति मंत्रतः तस्मादुदक् वरुणपु
रुषेभ्यो बलिं हरेत्। सोमायेत्यंतरालस्य हरेदुत्तरतो बलिं। सौम्याद्वलेरुदक् सोमपुरुषेभ्यो बलिं हरे
दिति। अस्यार्थः॥ अथ सर्वांतरालापेक्षया दक्षिणदेशे यमाय बलिं हरेत्। तस्मादुदग्यमपुरुषेभ्य इ
ति। ततः स्वर्यायेत्यादि मूलवाक्यं तं भूत्वा बलिं संलग्नं पूर्वदेशे वरुणाय बलिं कृत्वा तस्मादुत्तरतो वरुण
पुरुषेभ्य इति। अंतरालस्योत्तरप्रदेशे सोमाय बलिः। तदुत्तरस्य सोमपुरुषेभ्य इति। अत्र नत यत्प्रपु
रुषाद्दक्षिणक्रोद्धस्यादयः पक्षाः शौनकाद्युक्तेना दिशि रुक्ताः। अत्र कारिकायां तु निकारमतमपि ग्रेसपु
रुषात्त्वित्पक्षे प्राकसे स्व बलिपात्रेल्लक्षणे निरूप्यमाणे प्रासंगिके जयंतोक्तं च क्रोक्तिपक्षप्रकार
माह॥ ॥जयंतस्त्वाह वास्तौ तु बलीन्कृत्वा निरंतरान्। मुक्त्वांतरालमिंद्रादिदिग्देवानां बलीन्हरेत्॥ ऐं
द्रादिबलिनः प्राच्यां स्यात्सोरस्य बलिः। अंतरालेबलिं कृत्वा तोष्टमंत्रैरतः परं। स्तोभ्य इति सर्वा
सां बलिपुंजरतो हरेत्। न तयज्ञोयमुदितः प्राचीनावीयतः परामिति॥ ॥अस्यार्थः॥ ॥स्वयोदिमार
भ्य वास्तुदेवतान्त्य इत्येतावत्पर्यंतं दीशानीमारभ्य चक्राकारं निरंतरान् अपरस्परसंलग्नान् पंक्ति
भूतान्सर्वान्संपदेनास्ते व्याकारान् बलीन्कृत्वा बलयाद्बहिः प्राच्यां कमप्यवकाशं त्यक्त्वा इंद्राय ९९
बलिं तस्मात्प्राच्यां तत्पुरुषेभ्यो बलिः एवं दक्षिणभागे वलयाद्बहिः कमप्यवकाशं त्यक्त्वा यमाय बलिः

तस्मादपि प्राच्यां तत्पुरुषेभ्यः तथैवोत्तरदेशे सोमाय बलिः तस्मादपि प्राच्यां तत्पुरुषेभ्य
इति बलयमध्ये अवशिष्टमंत्रैर्होमः तच्चैवं बलयमध्ये ब्रह्मणे स्वाहा ब्रह्मणः प्राग्ब्र
ह्मपुरुषेभ्यः स्वाहा दक्षिणतो दिग्देवेभ्यः पश्चिमतः सर्वेभ्यो भूतेभ्य उत्तरतो
दिवाचारिभ्य इति दिने नक्तं दिवाचारिभ्य इति रात्रौ तदनंतरं पक्षद्वयपरिसान्य इति मंत्रे
ण सर्वासां मांकुलीनां उत्तरतो हरेत्। अयं मनतयज्ञ इति। अतः परं प्राचीनावीतीभूत्वा
स्वधा पितृभ्य इत्युक्त्वा दक्षिणतः पांसून्निर्वपेत्। पितृयज्ञोयमुदितः। स्वधेषां पितृभ्य
इति पदक्षिणतो बलिं हरेत्। अयं पितृयज्ञः॥ ॥नक्तं चैतत्रयं न वे कुर्यात्। स्वर्यायेति पदस्थाने
ने इयं दग्नये पदं। दिवाचारिभ्य इत्यस्य नक्तंचारिभ्य इष्यते। अस्यार्थः॥ ॥एतत्रयं देवादि
यज्ञत्रयं रात्रावपि भवति अत्र यज्ञत्रयस्य रात्रावपि कारणात् एवं वक्तव्यं तानक्तं च नवं
ति। पंचमो ब्रह्मयज्ञस्तु दिवैव न वलि। यदि रात्रौ तदा स्वर्यायेति पदस्थाने अग्नये पदं च
क्तव्यं दिवाचारिभ्य इत्यत्र नक्तंचारिभ्य इति। कुर्वीत तस्मात् कश्चैव पृथक्पाकी नवेदीति

Indira Gandhi National Centre for the Arts

॥अथ प्रस्तावार्थः॥ ॥स्नानकादिर्येदा पृथक् दायविभागं गृहीत्वा पृथक् पाकं कुर्यात् तेना पि वैश्वदे
विकं कर्म कर्त्तव्यमिति॥ ॥भोजनार्थे पाकान्वैश्वदेवकर्मणः प्रवृत्तेः तद्विना न भोक्तव्यं अत
पाकसंस्कारार्थो यदा परगृहे निमंत्रणं उपवासो वा तदा कथं वा पाकः कथमेतस्य संस्कारः। अ
तः पंचयज्ञा इति अथ पाकः कार्यः। पाकार्थं मवेद् पुष्पफलोदकादिभिर्नृपिपर्व यथाकर्त्तव्यं तत्केचि
आपस्तंबोपि मे दातव्यम् काष्ठमपि जुहुयात्। आर्द्रैव मृपि अस्यतत्कुर्यादिति। नवेडस यत
तु अद्भिरेतान्समापयेदिति। अकरणे प्रत्यवायदर्शनात्। एतेन्यः पंचयज्ञेभ्यो द्वेकाग्नि
जुहीयते। मननवल्लस्कृति रस्त प्रासञ्चितं विधीयते। यदाद्य हं त्र्यहं वा दिप्रमादा दकृतेषु तेषु
संजुमनी इति तत्त्वात्रो वारुणीर्भवेत्। द्वदशाहं द्वादशाहं वा नित्यत्तेषु सर्वेनः स्वस्वत्रा वा
इत्याहुः येन तत्तनुमतः स्फुदिति बौधायनोक्तं प्रायश्चित्तं॥ ॥इति वैश्वदेवप्रकरणं॥ ॥होम
ध्यानसंस्कारमाहुर्व्यासः जुहुयात् सर्पिषान्नं तैलक्षारविवर्जितं। दध्यक्तं पयसा कं चा
दभावे उदुनापि वेति। इत्यनुकल्पश्च जुर्दीति मतेदर्वीतः। अलाभे येन केनापि फल
शाकोदकादिभिः पयोदधिघृतैः कुर्याद्वैश्वदेवं यवेणतु। हस्तेनान्नादीन् कुर्याज्जुहु- १००

१००

जलिना जलमिति। यद्ययतेनेनैव होतव्यं तत्तु काष्ठदपनि विशेष्टे। शाकं वा यदि वा पत्रं मूलं वा य
दि वा फलं। संकल्पयेद्यदाहारस्तेनैव जुहुयादपीति। क्षारलवणपरान्नसंसृष्टेनाहविष्य
होमो ग्नौ न कार्यः। किंतु लूम रस्मा गृहाय तना इन रतो पोह्य तस्मिन् जुहुयात्तान नदुत्तमजुनं
चाग्नेर्भवतीति॥ ॥अनग्निकस्य वैश्वदेवविधिरेष माह वृद्धवसिष्ठः। अनग्निकस्तु यो विप्रः
सोन्नं व्याहृतिभिः स्वयं हुत्वा शाकलमंत्रैश्च निष्कं कोकु बलिं हरेदिति। विशिष्टकाक
बलिं हरेदिति विज्ञानरपि। अन्नं व्याहृतिभिर्हुत्वा हुत्वा मंत्रैश्च शाकलैः। प्रजापते हविर्भु
त्वा पूजयेदतिथीं ततं इति। शाकलमंत्रास्तैत्तिरीयारण्यके श्रूयंते। देवकृतस्यैनसोवय
जनमसि स्वाहा। मनुष्यकृतस्यैनसोवयजनमसि स्वाहा। पितृकृतस्यैनसोवयजनमसि
स्वाहा। आत्मकृतस्यैनसोवयजनमसि स्वाहा। अन्यकृतस्यैनसोवयजनमसि स्वाहा।
अस्मत्कृतस्यैनसोवयजनमसि स्वाहा। यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि
स्वाहा। यत्स्वपंतश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा। यद्विद्वांसश्चावि
द्वांसश्चैनश्चकृम तस्यावयजनमसि स्वाहा। एनस एनसोवयजनमसि स्वाहा। यद्देवा

वाच्य ह्रूमजिह्वयागुरु मनसोवा प्रयुती देवहेलनं।अरावायोनो अग्निरुक्थुनायतेतास्मिंत्तदे
नोवसवोनिधेतनस्वाहेति।गौणकर्त्तारा हाह्रिः।पुत्रोभ्रातानथावाऋत्विक्कृतिोव्यश्वशुर
मातुलाः।पत्नी।श्रोत्रियया ज्याश्च दृष्टास्तु बलिकर्मणि।ति।गृहेकर्त्तृतरा नावे प्रवसना
स्वयमेव कर्त्तव्यमित्याह बोधायनः।प्रवाह संगच्छतोयस्य गृहेकर्त्तानं विद्यते।पञ्चानाम
हृतामेषांसपत्नीः सहगच्छतीति॥ ॥इति वैश्वदेवप्रकरणं॥ ॥गृह्यसूत्रेन्तनीयाध्यायो
क्तमनुष्ययज्ञंचकुर्यात्।पिन्तयत्तादनंतरं कार्यं।तत्रस्मृतिरपि।गोदोहकालमाकांक्षे
हत्वान्तलिवे द्विजः।भोजयेदतिथिंवाद्यपान्नमेधायमुदीरितइति॥ ॥सनत्कुमारपद्दे
त्तानमतिथिंभोजयन्नायदिनादृत्तो नालितदानातपूर्वमपिनित्ययज्ञसिध्यर्थं भोजये
दिति॥ ॥अयं मनुष्ययज्ञः।तथैवस्मृतिमाधवनित्य श्राद्धं चकुर्यात्॥ ॥नित्यश्राद्धमदै
वंस्यान्मनुष्यसहदीयत इति।मनुनाप्युक्तं।एकमप्याशयेद्विप्रं पित्रार्थेपांचयज्ञकान १०१
वैवात्राशयेत्कंचिद्वैश्वदेवंप्रतिद्विजां।दद्यादाहरहः श्राद्धमान्नाद्येनोदकेनवापयोमू
लफलाद्येवापितृभ्यः प्रीतिमाहरन्निति।अत्रविश्वदेवन्प्रतिद्विजंनभोजयेत्।ए

एवंपंचमहायज्ञविधानंकुर्यात्।तत्रब्रह्मयज्ञमध्याह्नस्नानोत्तरंसंध्यांविधायब्रह्मय
ज्ञंप्रथमंकृत्वावैश्वदेवादियज्ञचतुष्टयंकुर्यात्।तृतीयाध्यायोक्तमपिप्रकरणांतर्गतमपिसौ
कर्यार्थमिहकारिकाकारेणोच्यते।ग्रामात्प्राच्यामुदीच्यांवायावादिकृस्यादनिंदिता।
आपोवगाह्यचस्नायादुपवीतीवसन्द्विजः।धौतशुक्लांबरःकुर्यात्कर्मार्थगात्वमंततः।
दर्भानबहून्भुत्वोदक्तोप्रागग्रानास्तृणात्यथा।दर्भेषूपविशेत्कर्मण्यत्रप्राङ्मुखएवसन्॥१॥
अस्यार्थः।ग्रामाद्बहिः प्राग्वोदग्वाअनिंदितायांमर्यादितौवायत्रापोबहूदकाश्च प्रशस्ता

Indira Gandhi National
Centre for the Arts

भवंति। तत्रस्नानसामग्रीं गृहीत्वा विधिवत्स्नात्वा। अत्रोपवीत्येन स्नानकर्म सव्येनैव सर्वं
दाविधीयत इति स्नात्वा मध्याह्नसंध्यां विधाय धौतशुक्लांबरधरः कर्म्मांगमाचमनं कु
र्यात्। ततो ब्रह्मयज्ञं करिष्य इति प्रतिज्ञाय शुद्धप्रदेशो बद्धतृणदर्भान् प्रागग्रानास्तीर्य तेषु
दर्भेषु प्राङ्मुख एवोपविश्य अत्र कर्मणीति ब्रह्मयज्ञे पूर्वोक्तमुखत्वमेव नियम्यते। कृत्वो
पस्थं करे सव्ये उत्तानेप्राग्दिगंगुल्यौ। पवित्रे स्थापयेदुक्ते प्रागग्रे दक्षिणेन तु। नीत्वं प्रागंगु
लितेन संदध्याद्दक्षिणं करमिति॥ ॥अस्यार्थः॥ ॥तत्रोपवेशनप्रकार उच्यते। (उपस्थं कृत्वा)
(उपवेशनेन) दक्षिणं पादं वामजंघोपरि मूलदेशे स्थापयित्वा नादृशामुपवेशनं उपस्थश
ब्देनोच्यते। उपस्थं कृत्वा उपवेशनेन संबध्यते। ततः वामे करे उत्ताने प्रागग्रे कृते तस्मिन् पवित्रे
आस्योपवेशनकार्यसाधनेहामप्रकरणे उक्तेऽत्र स्थैः। तद्दपवित्रे दक्षिणेन हस्तेन गृहीत्वा। तस्मे
न्नेव हस्ते प्रागग्रे गृहीत्वा स्थापयित्वा दक्षिणपाणिं दाधोमुखं प्रागंगुलितेन वामेन संदध्यात्। १०२
उत्तानस्य वामस्योपरि नीचं दक्षिणं कुर्यादिति। तथा। तथा न्यूनं पाणियुग्मं हृदसंमितं अक

संमितं वा कृत्वा वक्ष्यमाणं कुर्यादिति॥ ॥ऊर्ध्वं तिर्यगधस्ताद्वा नेत्रेण यदि वा क्षिणीः। संमील्य येन
वा सानुसमाहितमना भवेत्। सस्काराद्यन्यनमं पूर्वमभिसंधाय युक्तितः॥४॥ पूर्वो व्याहृतीस्तिस्रः
समस्ताश्चानुसकृद्वदेत्। पश्चादृचेर्ग्वेदाः सर्वो सावित्री। त्रिर्वदेद्यथा। पूर्वाभिसंधितं यावन्नदधी
त्यसमाहितः। नमो ब्रह्मण इत्येतां त्रिरुक्त्वा प्रणवं वदेत्। प्रणवाद्यनमंतस्यान्ते मध्ये मनस्मरेणतु
। अधीतेमनसा ग्रामे ब्रह्मयज्ञं करोमीत्येति॥ ॥अस्यार्थः॥ ॥ऊर्ध्वं तिर्यगधस्ताद्वा नवि लोकये
त्। एकाग्रमनाः भूत्वा कुर्यादिति। अथ यदि वैतत्पक्षांतरमाह। अथवा नेत्रे समील्य कुर्यान्नायेन
प्रकारेण आत्मसमाहितमना भवेत् तथा कुर्यात्। सस्काद्यन्यतमं पाठविशेषं संक्षिप्तः पूर्व
मभिसंधाय ब्रह्मयज्ञं कुर्यादिति। अर्थात् सस्कादेरध्यासस्तु अपपाठराहित्येन यस्य विशुद्धस्य
न तद्वेव मेवानुसंधेयमिति। तत्र प्रथमंकृत्यमाह। ॐ पूर्वेति। ॐकारपूर्वाः समस्ता व्याहृतीः स
कृद्वदेत्। ॐ भूर्भुवः स्वः इति। ततः ॐकारं विनैव एकैकपादोच्चारणेन गायत्रीं समाप्य ततः अ
र्द्धर्चसमाप्य ततः मध्ये अवसानराहित्येनैव सर्वां तत्तीयं पठेत्। ततः यत्पूर्वमभ्यस्तं सस्कादि
विशेषं सम्यक् पाठसततं सविता ततः पागंते नमो ब्रह्मण इत्येतां ऋचं पठित्वा ॐ मितिप्रणवं

Indira Gandhi National
Centre for the Arts

अयान्।एतत्कर्मआद्यंतयोःप्रणवोपरस्पतत्तथोक्तं।तत्रगायत्र्यादौसूक्तादौवामध्येप्रणवेना
स्तीतिभावः।अयंपाठःमध्यमस्वरेणमध्याह्नसवनेनेत्यर्थः।यदास्त्रीशूद्रजनामध्येग्राममध्ये
वाकेनचित्कारणेनकुर्यात्।तदामनसैवपाठनिर्वाहंकुर्यात्।तत्रमध्यमस्वरनियमोनास्तीत्यर्थः।
ततःपाठानंतरंउदकसमीपमागत्यतर्पणंकुर्यात्।अपांसमीपमागत्यतृप्यंतुदेवदेवताःए
वमेतानितृप्यंत्वित्यंतःप्रतिमंत्रकं।सिंचेत्प्रजापतिस्तृप्यत्वित्ययोदेवतीर्थतः।धातुरूपभिर्यथा
लिंगंमंत्रान्प्रयुज्यतेमंत्रैःब्रातर्विनस्तृप्यत्वित्यादिभिरतःपरंप्रातिमंत्रंनिर्विताननुतर्पये
दृषितीर्थतइति॥ ॥अस्यार्थः॥॥ दासेणप्रतिपादनादेवाइतिपरिभाषयासव्यहस्तेनान्वार
ब्धेनसमग्रतर्पणंप्राप्तं।तत्रगृह्यसंग्रहेविशेषः।अन्वारब्धेनसव्येनदक्षिणेनतुपाणिना।दे
वर्षीन्तर्पयेद्विद्वानुदकांजलिभिःपितॄनिति।केचित्तुएकहस्तेनतर्पणेबहुनिषेधवाक्या
न्याहुः।तत्रतत्तत्कारवानुसारेणव्यवस्था।तेषांपाणिद्वयेनैवतर्पणस्यविहितत्वात्।अस्मच्छा
खायांतुकश्चिद्विशेषआम्नातः।तस्माद्विकल्पोवेतिप्रतीयते।अथवेदेवऋषितर्पणेअंज
लिनाकर्त्तव्यइतीप्रतीयते।गृह्योक्तमंत्रैस्तर्पणं।तच्चएवमेतानितृप्यंतु।एतदेतंतर्पणंकुर्या १०२

दिति।एवमेतानीतिसाक्षान्मंत्रंएवनविधायकइतितत्प्रकारेणव्याख्यातं।एतैर्मंत्रैःप्रतिमंत्रकंसिं
चेत्तर्पयेदिति।तत्रउपलक्षणार्थंप्रथममंत्रंदर्शयति।प्रजापतिस्तृप्यत्विति।देवतर्पणंदेवतीर्थेनां
गुल्यग्रेण।अपःसिंचेदित्यन्वयः।तृप्तिस्तर्पणं।प्रजापतिरित्यारभ्यएकोनत्रिंशद्वाक्येषुतृप्यतु
तृप्यंतांतृप्यंत्विति यथार्थमुक्त्वातर्पयेत्।इतियथालिंगंतथावचनमिति।धातुःप्रजापतेःयथा
लिंगंयथावचनमंत्रांतेषुप्रयुज्यतइत्यर्थः॥ ॥एवंप्राङ्मुखःसन्देवतर्पणंसमाप्य।अनंतरंऋषि
तर्पणंकुर्यात्।ब्रातर्विनइतिइतरंतबहुवचनं।ब्रातर्विनस्तृप्यंतुइत्यादिनिवीतदशमंत्रेनिवीतीभूत्वा
ऋषितीर्थेनःप्रजापतितीर्थेनः।सूत्रोक्तैःप्रतिमंत्रैस्तर्पयेदिति।उदङ्मुखःसन्।एवंऋषितर्पणंस
माप्यापितृतर्पणंकुर्यात्।अथपितृतर्पणप्रारंभेप्राचीनावीत्यर्थः।दानीतर्पयेत्पितृतीर्थेनःसु
मंतिरित्यादिभिर्मंत्रैःप्रतिमंत्रंपूर्ववत्।द्वितीयांतेषुमंत्रेषुतर्पयामिपदंवदेत्॥ ॥अस्यार्थः॥॥
आचार्यान्मुखंवाततत्वाप्सुमंत्वित्यादिसूत्रोक्तैर्मंत्रैःत्रयोविंशतिसंख्याकैःपितृतीर्थेनतर्पयेदिति।
सूत्रकारेणयेनुद्वितीयांतामंत्राःपठिताःतर्पयामीतिब्रूयात्।यथाकहोलंतर्पयामीत्यादि।एवं
सूत्रोक्तंसमाप्यस्वपितॄंश्चतर्पयेत्।सूत्रेपियेचान्येआचार्यास्तेसर्वेतृप्यंत्वितिप्रतिपुरुषंपितॄन्

Indira Gandhi National
Centre for the Arts

स्वधा नमस्तर्पयामि तावगृहाने सपदद्यात्तिनादक्षिणेति। अयंतु ब्रह्मयज्ञोस्यानिसाहानादिदक्षिणा।
कुर्यान्निष्ठन्त्रायानोवा ब्रह्मयज्ञसमं वेदादेवोष्णुविः स्वयंवास्यात्तदानध्याय इष्यते॥ ॥अस्य
घेश॥ ॥एवमुक्तोयं ब्रह्मयज्ञ इत्यवगंतव्यः। अस्य दक्षिणा। निशुभ्यो नैक्षमन्त्रादिकं दीयते तदव
दक्षिणेति। तत्रैवं प्रयोगः॥ समाप्ते तर्पणे अस्य कृतस्य ब्रह्मयज्ञस्य परिपूर्णतासिद्ध्यर्थं किंचिद्दे
सदास्यमानं दक्षिणातेन दातुमुत्सृजेत्। इति संकल्प्योदकं त्यजेत्। तान् संकल्पितमन्त्रं मनुष्यय
ज्ञनिस्याङ्गावसाने दक्षवे दद्यादिति। संकल्पितस्यान्नस्य विनियोगः स्मृत्यंतरे। नो सन्न निनु
विप्रेभ्यो पद्धागान्नं। निवेदयेदिति। अथ अशक्तं प्रति ब्रह्मयज्ञानुकल्पमाह। कुर्यादित्यनेन। तिष्ठन्
ब्रजन्त्रायानो वा ऋग्ध वि सावमात्रं समाप्यत प्येण। दिकुर्यादिति। तस्यापि ब्रह्मयज्ञसाम्य मान्सो ब्र
ह्मयज्ञस्य द्वावनध्यायो। यदास्वरयाशुचिर्वा दे त्वात्मा वाप्यशुचिः। प्रागूर्ध्वं वा न वेद्यायं वैश्वदेवस्य कर्म
णः। ऊर्ध्वमेव नरयज्ञानुसंवेष्टातिथिपूजनं। एतान् पंचमहायज्ञान् कुर्यादहरहः शुचिरिति।
अस्यार्थः॥ ॥अयंतु ब्रह्मयज्ञः वैश्वदेवकर्मणः प्राग्वा न वेत्। मध्याह्नस्नानोत्तरमूर्ध्वं वा न वेत्। १०४
वैश्वदेवतवानवेत्। अत्र स्मृत्यंतरे। सवाचो कूर्पणान्कार्यः। पश्चाद्वा प्रातराहुतेनितानप्येण

मतिथ्यादिपूजनं तस्मात्पूर्वं वा न वेति। अथवा प्रातर्होमानंतरमिति। नयज्ञस्तु ऊर्ध्वमेवात्र
निधिभोजनसाध्य इत्यर्थः। पंचयज्ञानामध्ये अयं मनुष्ययज्ञोतिमो यज्ञ इत्यर्थः। इतरयज्ञस्तु
ष्टयमस्मात्पूर्वमेव। उक्तानेतान् पंचमहायज्ञान् शुचिः सन्नहरहः प्रत्यहं कुर्यात्॥ ॥इति पंच
महायज्ञविधिः॥ ॥वैश्वदेवे आपद्धर्मो स्मृत्यंतरोक्तः। प्रदर्श्यते। पक्वान्नाभावे प्रदानं तंडुला
नोषधीस्तु वा॥ यथा दधि घृतं चैव कंदमूलफलानि च। वैश्वदेवप्रकर्तव्यं जलं वा परंतु वाज
लइति। तदानेस्तैर्द्रव्यैर्मनुष्ययज्ञादिकमपि। असंस्कृतमन्नं न भोजयेदिति वचनात्। कर्तुरसं
भवत्त्री बाल्यादि वा ब्राह्मणद्वारा वा कारयेदिति स्मृत्यर्थसारे॥ ॥अथ संध्यावंदनप्रकारमाह।
अन्यश्चाहरहः कृत्यं संध्योपासनमुच्यते। ग्रामाद्बहिरपां तीर उपवीत्यवसन् द्विजः। आत्मपूता
र्जनादन्यत्स्मृत्युक्तं च करोत्यथ इति। अस्यार्थः॥ ॥प्रतिदिनलक्षणं संध्योपासनलक्षणं कर्म उ
च्यते। उपवीती सन् ग्रामाद्बहिर्जलान्तिकं गत्वा आत्मपरस्मृत्युक्तं मार्जनादिकं कर्म योदानौ तं कृत्वा
गायत्रीजपेत्॥ ॥आर्द्रीकृतामिति आदित्य पश्चिमस्य यत्न तरः। नागरत्नमुरव आसीनः सावि
त्रीं वाग्यतो जपेत्। आतारकोदयादेवं प्रातःकर्मदमिष्यते। आर्द्रोन्नमितनक्षत्रं मंजति क्षयदात

Indira Gandhi National Centre for the Arts

नः। आसत प्राङ्मुखस्तिष्ठञ्जपन्नासूर्यदर्शनादिति॥ ॥अस्यार्थः॥ ॥अर्द्धास्तमिते आदित्ये सति
पश्चिमस्यां उत्तरस्यां वा वायव्यस्यां उदङ्मुखो वा वायव्याभिमुखः सन् उपविश्य मौनी भूत्वा सावित्रीं जपेत्।
तत्रावधिमाह। आ तारकोदयात् नक्षत्रदर्शनपर्यन्तमित्यर्थः। एवमपि संध्यावंदनकर्म प्रातरपि कर्त्त
व्यमिति। समानमेतत्। तत्र विशेष उच्यते। नक्षत्रेषु अर्द्धास्तं गतेषु तादृशकालमारभ्य सूर्यदर्श
नपर्यन्तं प्राङ्मुखस्तिष्ठन्नेव जपेत्। गृह्यसूत्रेपि। एवं प्रातः प्राङ्मुखस्तिष्ठन्नादित्यमंडलदर्श
नादिति। अत्र प्रातर्ग्रहणं वायव्यानिवृत्त्यर्थमिति वृत्तिकारः। सूर्योदयपर्यन्तं जपेदिति॥ ॥इति गृ
ह्यकारिकायां प्रथमोध्यायः॥ ॥७॥ ॥अथोपकर्म उच्यते॥ ॥अध्यायानामुपाकर्म श्रावणे
श्रवणेन तु। तन्मासे हस्तयुक्तायां पंचम्यां वा तदिष्यते॥१॥ अप्रवृत्तोषधय यस्मिन्मासे तु नर्तवं
तिवत्। तदा भाद्रपदे मासे श्रवणेन तु करोतिनदिति॥२॥ ॥अस्यार्थः॥ ॥श्रावणमासे श्रवणनक्ष
त्रे अधीतानां छंदसां सवीर्यत्वार्थं अथवा नूतनमाणवकादीनां वेदाध्ययनप्रारंभाधिकारार्थं
च उपाकर्म कर्त्तव्यमिति। तच्च श्रावणमासे कस्यां तिथौ श्रवणनक्षत्रयुक्तायां तिथौ कर्त्तव्यमिति
। गृह्येन। अथातोध्यायोपाकरणमिति। अयमर्थः॥ ॥अध्ययनमध्यायः तस्य उपाकरणं प्रारं १०५

नो येन कर्म्मणा तद् अध्यायोपाकरणं। अनद् इति हेत्वर्थः। यस्माद् ब्रह्मयज्ञो नित्यः अतोध्यायोपाक
रणं ब्रूम इति। तत्र कालांतरमाह। तन्मास एव हस्तनक्षत्रयुक्तायां पंचम्यां वा तच्च भवति। अवृष्ट्या
अवर्षणेन कृत्वा यदा न ओषधयो न जायंते तदा भाद्रपदमासे तेनैव श्रवणनक्षत्रेण युक्तायां
तिथौ करोति। तथा च गृह्यं॥ ॥ नद्वार्षिकमित्याचक्षते। वर्षासु वर्जासु क्रियत इति वार्षिकं। श्रा
वणभाद्रपदौ मासौ वर्षा ऋतुः। श्रावणे प्रादुर्भावाभावे भाद्रपदेपि श्रवणनक्षत्रयुक्तकाले भवति
। आज्यसंस्कारपर्यंतमुपलेपादि पूर्ववत्। आज्येन दधिसक्तूनां पर्यग्निकरणं भवेत्॥३॥ उत्पव
नमात्रमाज्यं च तेषां त्रिः प्रोक्षणं भवेत्। इध्माग्निधारणोत्तरं स्यादाज्यस्योद्वासनादिकमिति॥४॥ अस्या
र्थः॥ तत्र कर्मांगं। द्वारावस्य आसने उपविश्य प्राणानायम्य तिथ्यादि स्मृत्वा एवं विशिष्टायां तिथौ
अस्माभिरधीतानां छंदसां अयातयामत्व सिद्ध्यर्थं प्रमादिकेनोत्तरस्य यात
यामस्य यज्ञातं वीर्यत्वं तस्य परिहारार्थं तेषां छंदसां सवीर्यत्वार्थं तथा नूतनमाणवकादी
नां वेदाध्ययनाधिकारार्थं च उपाकर्माख्यं कर्म करिष्ये। उपलेपादि आज्यसंस्कारांतं पूर्ववत्कृत्वा।
अत्र होमयोग्यानां दधिमिश्राणां सक्तूनां आज्येन सह पर्यग्निकरणं कृत्वा यदा तु आज्यस्य उत्प
वनमात्रं तदा दधिसक्तूनां प्रोक्षणमिति। आज्योद्वासनादिकं इध्माग्निधारणांतं कृत्वा जुहुयात्।

अन्वारब्धोऽधुना शिष्यैः स्वयमेव न संतिष्ठेत् । कुर्वीताज्यभागान्तमिध्माधानादि पूर्ववत् ॥५॥
इहाज्यभागान्तेऽयं स्तस्तथैवोत्सर्जनेऽपि च । हुत्वाज्यं नवभिर्मंत्रैः सावित्र्याद्यैरतः परमिति ॥ ॥अ
स्यार्थः ॥ ॥ततः कर्ता इध्माधानादि आज्यभागान्तं कृत्वा शिष्यैरन्वारब्धः सन् प्रधानाहुत्यादि कर्म क
रोति यदि शिष्या न नेयुः तदा अन्वारंभणमपि तु न तं लुप्तं तदा स्वयमेव करोति । तथा च गृह्य॥
अध्येषमाणा ध्याप्यैरन्वारब्ध एताभ्यो देवताभ्यो जुहोति । अत्र वृत्तिकारेण व्याख्यातं । अध्याप्यै
रन्वारब्ध इत्येतावतैव सिद्धे अध्येष्यमाण इति वचनं अध्याप्याभावेऽपि । अध्येष्यमाणः स्वयमेव
होमं कुर्यादित्येवमर्थं वर्षासु छंदांस्युपाकृत्याधीयत इति श्रुतेः । अत्राज्यभागान्तं तावदनुक्तः उ
त्सर्जनेऽपि च । आज्यभागान्तं ततरं सावित्र्यादिभिर्नवभिर्मंत्रैः आज्यं जुहोति । अत्रत्वनुध्यंतेषु मंत्र
स्तुछंदोन्यत्र ऋजिन्मस्थस केभ्यं त्राशेयः । अथावदानधर्मेण तान् सक्तून् दधिसंयुतान् । हुत्वाग्नि
मीळ इत्याद्यैर्मंत्रैर्विंशतिभिः क्रमात् । शाकलानां समानी वद्दस्त्वं चां त्याहुतिर्भवेत् । अथ स्वि
ष्टकृतं हुत्वा दधिसक्तुभिरेव तु ॥७॥ ॥अस्यार्थः॥ ॥अथावदानधर्मेण द्व्याज्यमाज्योपस्त
रणादि कृत्वा अग्निमीळ इत्यादिभिरुक्तमंत्रैः दधियुतान् सक्तून् जुहोति । ऋग्वेदस्य पंच शाखा १०६

भेदाः । आश्वलायनी सांख्यायनी शाकला बाष्कला मांडूकाश्चेति । तेषां मध्ये शाकलानां समानी
व इति ऋक्त्वा अंत्याहुतिर्भवति । बाष्कलानां तु तच्छंयो इति ऋत्वांत्याहुतिर्भवति इतरत्सर्वं समा
नं ॥ ॥आश्वलायनशाखानुसारिणां शाकलबाष्कलानामिदमेवाश्वलायनसूत्रं कर्मानुष्ठा
नार्थमुपकरोति । एवं प्रधानहोमं समाप्य दधिसक्तुभिरेव स्विष्टकृद्धोमं समापयेत् । दधिसक्
तून् प्राशयेत् शिष्याः आचम्य ततः परं । परिस्तरणादनंतरं तर्दयति तेंजलीन् ॥१०॥ अन्यन सेव
इत्वा परस्ताग्निः कुर्वीत मार्जनं । पश्चादग्नेरुदग्दर्भेषु पूर्वाग्रेषु पीठेस्य वा । आसिच्यापः शरावादौ
दर्भैस्तत्र निधाय च । प्रागग्रादर्भगर्भांस्तु कुर्युर्ब्रह्मांजलीन् यतः ॥१२॥ ॥अस्यार्थः॥ ॥स्विष्ट
कृद्धोमानंतरं दधिसक्तुन प्राशनं स्वयं कृत्वा शिष्यैश्च कारयित्वा सर्वे त्र्याचमेत् । अत्र सक्तुप्रा
शनानंतरं यज्ञोपवीतहोमं कृत्वा पित्र्यो दत्वा स्वयं च धारयेत् । तथा च कारिकायां वेदारंभण
तः पूर्वं सक्तुप्राशनानंतरं नवयज्ञोपवीतानि दद्याद्धारयेत् ततः । एतद्दानधारणं होमस्योपल
क्षणार्थं । तथा च सत्सूत्रतः यज्ञोपवीतानि नवानि कृत्वा तदुक्तमंत्रेण हुनेत् थ[illegible] । स्वयं तु दवा
त्पित्रादिभ्यः इत्थं दद्यात् स्वयं धार्य इति प्रसिद्धं । तत्फलमुक्तं । तत्र आग्नेये परिस्तरणादनंतरं

Indira Gandhi National
Centre for the Arts

यु पुराणो। उपाकर्मणि विप्रेन्याद्याद्यज्ञोपवीतकं। आयुष्यानु जायते तेन कर्मणा मानवोऽनुवीति। त
तश्चाग्नेर्य परिस्तरण दर्भान्कान् गृहीत्वान्वैस्वस्वांजलीन्तेनैव कुर्वारं न दधति। अंजलिषु मध्ये
दर्भास्थापयंतीत्यर्थः। तत्राचार्यादिकर्मकर्तारः तत्र सर्वेषामंजलिषु केन तिदाय स्वपित्वा तत
सर्वे पितेनैवांजलिस्थोदकेन मार्जनं कुर्वंति। तदुदकं शिरसि सेपयंतीत्यर्थः। अमंत्रकमेवात्र
थ ब्रह्मयज्ञानुत्वाउपाकर्मांगत्वाद्वेदपाठ उच्यते। मार्जनानंतरमग्नेः प्रत्यकुदग्रोपागग्रदर्भेषूप
विश्य अग्ने कतरतः कानि विष्टरावाणिस्थापयित्वा तत्रोदकं प्रक्षिप्य आदित्याब्दात्पात्रमात्रं
गृह्यते। अन्यान्दर्भान्शरावादौ प्रक्षिप्य तेन सर्वे कर्मकर्तारः इदानीं ब्रह्मांजलीन्कुर्युः। कथं
कृतान्॥ ॥प्रागग्रादर्भेषु तेषामंजलीनां गर्भेषु तेन धाक्ताः तथा तेनांजलीन्कृत्वा गायत्रीज
पेयुः। व्याहृतिजपं कुर्युः सावित्रीब्रह्मयज्ञवत्रात्रिरभ्यसेयुरोंकारव्याहृती। श्चात्र कर्मणि॥
॥१३॥ अग्निमीळे इदं सूक्तमनुवाकमथापि वा। प्रारभेरन् ऋचं वापि त्वध्याप्यान्वाच्य यद्गु
:। प्रायश्चित्तादिसकलं होमं तोषं समापयेत्॥१४॥ अनध्यायान् स्मृतौ सिद्धान् परिहृत्य स
धीयते। यत्कृपूर्वमधीते सो प्रारभेश्च वेहनीति॥१५॥ ॥अस्यार्थः॥ ॥ततः सव्याहृतिं सावि ५०७

त्रीं उद्धृत्य जपंति ब्रह्मयज्ञवदिति। यथा ॐकारपूर्वकं व्याहृतित्रयं समुच्चितं पठित्वा ॐकारर
हितां गायत्रीं पादक्रमेण तथैव पठित्वा ततोऽर्धर्चादिक्रमेण पठित्वा ततः सर्वां च पठित्वा अव
सानरहितेन पठेदिति। ब्रह्मयज्ञे तदपसयात्र उपाकर्मणि किंचिद्विशेषमाह। त्रिरभ्यसेयु
रिति। अत्र गायत्र्याः प्रथमावृत्तौ ॐकारपूर्वकं व्याहृतिसमुच्चयं पठित्वा तथैव द्वितीयस्याम
प्यावृत्तौ तृतीयावृत्तावपि ॐकारपूर्वं पठेत्। पश्चादर्चेत्राः सर्वो मिति ब्रह्मयज्ञेन समानं। ब्रह्मय
ज्ञे तु गायत्र्याः प्रथमावृत्तावेव ॐकारपूर्वकव्याहृतियोगः। द्वितीयतृतीयावृत्त्योः ॐपूर्वव्याहृ
तियोगो नास्ति। इत्ययं भेदो वगंतव्यः। त्रोन कस्य। जपित्वा सकृदा पूर्वाः समस्ता व्याहृतीर्युक्ताः
प्रणवाद्यास्व सावित्रीं सकृदुच्चारयेत्तदिति। अनंतरमग्निमीळे इती दं सूक्तं सर्वे प्रारभेरन्।
अनुवाकपर्यंतं वा। ऋचं वा सर्वेऽपि पठेयुः। यत्नतनमाणवकाः अध्याप्याः तांश्च वाचयेदिति
। ततो गुरुरयाश्चित्यादिनि मंत्रे होमं तोषं समापयेदिति। अत आरभ्य स्मृत्युक्ताननध्याया
न् वर्जयित्वा वेदाध्ययनं कर्तव्यमिति। यो माणवकादिः प्रथममेव वेदग्रहणं विकीर्षति।
स तु शुभे मुहूर्ते प्रारंभं कुर्यादिति। समावर्तोऽप्यधीयानो मधुमांसादि वर्जयेत्। तत्तु स्नातोप

Indira Gandhi National
Centre for the Arts

॥ विद्याग्रहणा
गमनं समावर्त्तनस्य मन्त्वेतो अनन्तरमस्य षण्मासान्नियमेनत्वधीयते। अस्यार्थः॥ ॥ विद्याग्रहण
गमनं समावर्त्तनस्य मन्वतो अनन्तरमस्य षण्मासान्नियमेन त्वधीयते। अस्यार्थः॥
त्यागे वन्नपतिसमाप्तायां विद्यायां किंचिदध्ययनं कृत्वा यस्कश्चत्समाप्तिं कृत्वा नार्योपरिग्रहं
कुर्यात्। नारक्तो ऽप्यधीयानः ब्रह्मचारिवद्वर्जयेत्। तस्मान्नामेवस्त्रियमनुगच्छति। अनुसर
ति। इत्येवंरूपं वेदग्रहणपर्यन्तं तेनापि कर्त्तव्यमिति। अनन्तरमस्य षण्मासपर्यन्तं। उपाकर्मेण
आरभ्य वेदेन वाप्यसेयुरिति। उत्सर्जनानन्तरं षण्मासपर्यन्तमध्ययननिषेधस्मरणात्। स्मृति।
नामस्यां त्वहस्तेनः। नवडुपाकृतिः पूर्णमास्यां पूर्वाह्णे वनु। ब्राह्मणान्नोजयेत् नत्रपितृनुद्दि
त्यपदेवताः। व्यासः। विष्टरं सप्तभिर्दर्भैर्द्वादशांगुलदैर्घिकं। चतुरंगुलमग्रं स्यात् ग्रंथिमेकं तु
लं तृणा। प्रदक्षिणाग्रमं कृत्वा। ऋषीनावाह्य पूजयेत्। अकरणप्रत्यवायमाह कात्यायनः। उत्स
र्जनस्य वेदानामुपकरणकर्मवा। अकृत्वा वेदजप्येन फलं नाप्नोति मानवः इति। इत्युपाकर्मविधिः।
अथोत्सर्जनविधिर्वेदानामुपकारणकर्मणः। अकृत्वा वेदजप्येन फल॥ ॥ अथोत्सर्जनं माघ्यापौ
अथोत्सर्जनविधिर्वेदानामुपकारणकर्म। अकृत्वा वेदजप्येन फल॥ अस्यार्थः॥ ॥ अथपा
र्णमास्यां विधीयते॥१५॥ ॥ ग्रामाद्बहिर्वि विक्तस्य उपलेपादिपूर्ववत्॥ अस्यार्थः॥ ॥ अथपा १०८
र्णमास्यां विधीयते॥१५॥ ॥ ग्रामाद्बहिर्विविक्तस्य उपलेपादि पूर्ववत्। येन कर्मणा तत्त
यानां वेदानामध्ययनमध्यायः तेषामुत्सर्जनं। उत्सर्जनं नाम अनध्ययनं। येन कर्मणा तत्त
यानां वेदानामध्ययनमध्यायः तेषामुत्सर्जनं उत्सर्जनं नाम अनध्ययनं

थोक्तं। एतस्मिन् कर्मणि कृते सति षण्मासपर्यन्तमध्ययननिषेधविधानात्। त्वोत्सर्जनं माघ
संबंधिन्या पौर्णमास्यां भवति। ग्रामाद्बहिः शुचिप्रदेशं गत्वा पूर्ववडुपाकर्मवडुपलेपादि कुर्या
त्। अस्यापि कर्मणः उपाकर्मणा सह तुल्यतां दर्शयन्नु प्रयोगमाह। गृह्यपंक्ष समीपे ग्नो निधाय
उपमघि श्रयेत। संस्कारं सनुत्ववान्त्र त्वां नि कर्मणि त्वात्र। अस्यार्थः। गृह्यएव निध्यादिन
रमग्निसमीपे अप्येकत्तर नागां संस्कृत्य आज्याधिश्रयणं कृत्वा उपाकर्मवच्च रूणा सहाश्रा
उपस्यपर्यग्निकरणं कुर्यात्। उत्सर्जनेऽपि कर्मण्यपि सकुवदन्नं संस्कार्यं। अत्र भगवान्॥
पौर्णमासी तु या माघी तस्यामुत्सर्जनं भवेत्। तत्र ग्रामाद्बहिर्भूत्वा शुचौ देशे मनोरमे। विविक्ते
स्थंडिलं कृत्वा तत्रोल्लेखनपूर्वकं। पुरस्तात्तं निधायाज्यं संस्कारान् यथाविधि। पश्चाद्दत्त्वं ग
हे पक्षं पृथक् कृत्वान्य भाजनान् तत्र लग्नावधिश्रित्य सत् नस्तु मणि धार्येवा प्रत्यगग्रे निधायाज्य
भाजनस्य समीपतः। ततः परिधानादि तंत्रं त्वोसमापयेत्। कृत्वा पाकर्मवदिहाप्याज्य
भागाविवस्मरनुजयं तत्थ्वानतो माघ्यां पौर्णमास्यां ग्रामाद्बहिर्विविक्ते देशाग्न्युपसमाधानं
कृत्वा गृहसिद्धमोदनकल्मिं श्रीसात्रे गृहीत्वाग्निसमीपे निधायाज्याधिश्रयणादिकरा

Indira Gandhi National
Centre for the Arts

तिइहाव्याज्यनागोऽहुत्वेनि। नवाज्याहुतिपर्यंनमुपाकरणवद्भवेत्॥१८॥ जुहोतिगृह्यसिद्धान्नमु
पाकरणवत्ततः। अन्नेनस्विष्टकृद्धोमोनस्ततः प्राशनमार्जने॥१९॥ वेदाद्यारंभणंकृत्वा शिष्टंकर्म
समारभेत् इति। ॥ अस्यार्थः॥ ॥सावित्र्यादिनवमंत्रैरुपाकर्मवदाज्याहुतीर्हुत्वा अनंतरंगृ
हासिद्धान्नमग्निर्मील इत्यादिभिः। कितितिमंत्रैरुपाकरणवज्जुहोति। पश्चादन्नेनास्विष्टकृद्धोमं
कुर्यात्। अत्रप्राशनमार्जनेनभवतः। अनंतरमग्नेःप्रसागिवेनागेप्रागग्रेदर्भेषुपाविन्नपनुथे
वदर्भजलयः उक्तप्रकारेणउपाकर्मवदेववेदाद्यारंभणंकृत्वा शिष्टंकर्म अयाश्चेत्यादिभि
र्मंत्रैर्होमशेषंसमापयेदिति। अत्रभगवान्। सावित्र्यादितुवत्सप्तविधायाज्याहुतीर्नेवात
र्मंत्रैर्होमशेषंसमापयेदिति। इत्येतानि रूपाकर्मविहिनाः। भिर्यथाकर्म। जयंतस्त्व
नोग्नि जुहुयादग्निरग्निर्मील्किपुरोहितं। इत्येतानि रूपाकर्मविहिना। भिर्यथाकर्म। जयंतस्त्व
नोग्नि जुहुयादग्निरग्निर्मीलादिभिरुपाकरणप्रतीकेनगृहीतानिभिर्वि
। सावित्र्याद्याजुहोति। ततोवदान्नवर्मणाग्निर्मीलादिभिरुपाकरणप्रतीकेनगृहीताभिर्वि
ह्यातिभिः ऋग्भिरन्नंजुहोति। हुत्वेनिक्ववनादत्राप्यस्मिन्त्रवप्रदेशो स्विष्टकृतंहुत्वा परेणगत्वावे
दाद्यारंभमेवकरोतिप्राशनमार्जनेस्वनकरोति। ततः पूर्णपात्रंनयनादि शिष्टंकर्मसमाप्य १०२
नि। अथतीरमपांगत्वास्नात्वाचम्ययथाविधि॥२०॥ सावि –नि= आद्यानवाग्न्याद्यादेवता

स्तर्पयत्सथेति॥ ॥अस्यार्थः॥ ॥तिनयनाद्यवशिष्टकर्मसमापनानंतरंअपांसमीपेगत्वा
विधिवत्स्नात्वाचम्यप्राणानायम्यउत्सर्जनांगभूतंविहितंतर्पणंकरिष्ये इति प्रतिज्ञायनाए
वहोमदेवताःसावित्र्याघारवत्अग्निर्मील इत्याद्याश्चतर्प्ययेत्तत्रसौकर्यार्थंस्वयमेवप्रयोगं
दर्शयति। सावित्रींतर्प्पयाम्यग्निंतर्प्पयामी। तितर्प्पयेत्॥२१॥ जयंतस्त्वग्निर्मीलादिमंत्रैस्तर्प
णमब्रवीत्॥२२॥ ॥अस्यार्थः॥ ॥सावित्रींतर्प्पयाम्यग्निंतर्प्पयामीतित्यादिष्वंदासीत्सनाव
त्ययंतेद्वितीयांतंपदंकृत्वाअस्ययज्ञांगंतर्पणंकार्यं। अत्रतरप्राभिर्दानर्चनादिरूप्यर्चनंकुर्यात्
। शिष्टाचारात्कुंडपाषाणादाकलेषुआवाहनाद्युपचारैःसंपूज्यसावित्र्यादितर्पणंकुर्या
त्। ततः यमायधर्मराजायमृत्यवेचांतकायचवैवस्वतायकालायनीलायपरमेष्ठिनेऔ
दुंबरायदध्नायसर्वभूतक्षयायचचित्रायचित्रगुप्तायवैनमः। एभिर्मंत्रैः प्रत्येकं
यमंतर्पयामी। सनेनप्रकारेणतर्प्पयेत्। ततोवरुणसूक्तानिजापित्वाऋषीन्विसर्जयेत्। तोन
कोपितर्पयित्वाथपित्रादीन्पितृनपितर्प्पयेत्। स्वयंवकुर्याच्छिष्यांश्चकारयेत्तर्पणंविदं
। इत्युर्जनंनामेदंकर्माचार्यसमीरितमिति। जयंतस्त्व। अपांतीरंगत्वाप्रह्वुखआसीनोऽग्निमी

Indira Gandhi National
Centre for the Arts

लादिनिर्द्दिगन्तेउदकमाचिम्यामिच्यन्तर्पयित्वाप्राजापत्यायांस्तर्पयेति। अनन्तरंषण्मासान्
वेदांगानित्यधीयतोशुक्लेवेदमधीयीतकृष्णेगानीनिकेवल॥२३॥कर्मद्वयमिदंकेचिल्लौकिके
गेनोपवर्त्तेत। अस्यार्थः। उत्सर्जनानंतरंषण्मासपर्यंतंवेदाध्ययनंनकार्यमिति। उत्सृष्टेषुवेदेषु
अध्ययननिषेधस्मरणात्। अनन्तरंव्याकरणादिषुवेदांगेष्वेवषण्मासान्नियदिति। अ
थवाजउधियामनुग्रहार्थंपक्षांतरमाह। शुक्लपक्षेवेदाभ्यासःकृष्णपक्षेअंगाभ्यासः। एवंष
ण्मासपर्यंतंउत्सर्जनानंतरंपवेत्। उपाकरणानंतरंषण्मासपर्यंतंसाक्षाद्वेदाभ्यासःकृष्णप
क्षेअंगाभ्यासः। एवंषण्मासपर्यंतंउत्स) कूर्मपुराणेपि। छंदांस्यूर्ध्वंनरहस्यंवशुक्लपक्षेषुवैद्वि
जः। वेदांगानिपुराणानिकृष्णपक्षेषुमानवइति। मनुरपि। अतःपरंतुछंदांसिशुक्लेषुनियतः
पठेत्। वेदांगानिरहस्यंवकृष्णपक्षेपिसंपठेत्। एतत्कर्मद्वयंलौकिकेऔपासनेवाग्नौकार्य
मितिकेचिन्मन्यंते। जयंतस्तु। एतद्दकर्मणी। अध्यायोत्सर्जनप्रारंभौकेचिल्लौकिकेग्नौकुर्व
न्ति। केचिदुक्तेविकल्पः। उक्तकालालाभेअनुकल्पकालमाहस्म। तिसारसमुच्चयकारः। उत्स ११०
र्जनंपौषमाघउपाकर्मदिनेपिचेति॥ ॥इत्युत्सर्जनकर्म॥ ॥अथश्रवणाकर्मसर्पबली। उच्य

ते। उच्यतेश्रवणाकर्मसर्प्पबल्याख्यकर्मच। कुर्वीतश्रावणेमासेपौर्णमास्यामिदंद्वयं॥२४॥पूर
यित्वात्रकलशंनवंयावकसक्तुभिः। निधायतंववेदिकायांदर्वींचैकंकृतीमपि॥२५॥प्रास्यांदिशिशुचि
देशंबल्यर्थंपरिकल्पयच। यवधानाविनज्येकंनागमन्यज्यंसर्पिषा॥२६॥ ॥अस्यार्थः॥ ॥श्रवणा
कर्मसर्पबलिकर्मचकथ्यते। तदिदंकर्मद्वयंश्रावणमासिपूर्णिमायांभवति। तत्रउपाकर्मवत्तन
क्षत्रनियमः। पूर्णिमानियमएव। तत्रेतिकर्त्तव्यतामाह। नवंअव्रणंमनोहरंकलशंसंपाद्यतंयाव
कसक्तुभिःपरिपूर्यलोकप्रसिद्धेनवेरज्जूनिर्मितत्रिकेस्थापितंकलशंनिधायविकंकतवृक्षोद्भ
वांदर्वीमपितत्रैवनिधायतत्ठेकंकुत्राचिदुन्नतप्रदेशेस्थापयेत्। पूर्वदिग्भागेबल्यर्थंशु
द्धप्रदेशंस्वकारयित्वात्रोणकान्तप्रस्थपरिमितानांयवानांभर्जनंलौकिकारयेत्। भ्रष्टाएव
यवाधानाइत्युच्यंते। तासामंत्राद्वयंकृत्वातयोरेकतमागंलौकिकेनाज्येनाक्तंकृत्वास्थापयेत्।
अपरंतथैवपात्रांतरेस्थापयेत्। इदमत्रगह्यं। श्रावण्यांपौर्णमास्यांश्रवणाकर्मोक्तसक्तुनां
नवंकलशंपूरयित्वादर्वींचबलिहरणीनवंत्रिक्येनिदधात्। सत्तधानाःकृत्वासर्पिषाधाने
कीति। अर्धेनाबाधानपुंसकावीनिवैय्याकरणाः। वेदेतुदृशपतेतस्याअर्द्धोत्यस्वर्द्धाः। द्रोणको
पि। श्रावण्यांपौर्णमास्यांतुश्रवणाकर्मसंज्ञितंकर्मकृत्वापुनःसर्पबलिंतस्यांसमाचरेत्॥

Indira Gandhi National
Centre for the Arts

व्रीहीणां वा यवानां वा ये स्युः खण्डा न वर्जिताः। तंडुलाद्यैः समुत्पाद्य सक्तून्कृतैः कृतं नवं। पूरयि
त्वाथ दर्वीं च बलिप्रक्षेपसाधनीं वैकंकतीं स्रुगाकारां निर्माय तन्मयमप्यथ। नवे त्रिक्ये निधा
येन क्लिन्नं विनिवेदयेत्। धानाश्च खंडिताकारा संपाद्याः प्रस्तुमानिकाः। तासामर्धं पृथ
क्कृत्य लौकिकेनैव सर्पिषा। अक्तं कृत्वा विधानेन धानास्युः। संभारानेवमाहृत्य खात्वा वस्तमिने
सतीति। जयंतः। यस्मिन्नहनि श्रवणाकर्म तस्मिन्नेवाहनि सर्पबलिरपि अनस्तदहन्येवा खंडि
तैर्यवैर्व्रीहिभिर्वा सक्तून्कारयित्वा तैः सक्तुभिर्नवं कलशं पूरयित्वा नवे त्रिक्ये स्थापयित्वा दर्वी
च बलिहरणीं तत्रैव स्थापयति। दर्वी वैकंकतीं स्रुगाकृतिः। एतेरेव धानाः कृत्वा तासामर्धमसंस्कृते
नाज्येनाभ्यज्य। तेन द्वयोः पात्रयोः कृत्वाहन्येव दध्याति। आदित्ये स्तमिते कुर्याद्धवाधानादि पूर्ववत्।
हविर्द्वयस्य तूष्णीं स्यान्निर्वापप्रोक्षणे इह॥२७॥ पूर्ववद्धवधानादि स्यादिति ज्यच तंडुलान् तान
त्रैकेन पुरोडाशमन्येन श्रपयेच्चरुं॥२८॥ एकस्मिंस्तु पुरोडाशं कपाले श्रपयेदिहाज्येन सह धा
नानां पर्यग्निकरणं नवेत्॥२९॥ आज्यस्य केवलस्योक्ता नासां त्रिः प्रोक्षणं नवेत्। अस्यार्थः॥ ॥
अस्तमिते रवौ औपासने तंडुलाश्च चरिपि कर्मांगं द्विराचम्य पवित्रे धृत्वा देशकालौ निर्दिश्य १५१

पूर्ववद्धवधानं कृत्वा चरोः पुरोडाशस्य च निर्वापप्रोक्षणे स्मिन्कर्मणि तूष्णीमेव कृत्वा व्रीही
णां पूर्ववदवघातादि कारयित्वा तंडुलान्विभज्य च। तत्रैकेनांशेन चरुं श्रपयेत्। अन्येनांशेन
एकस्मिन्कपाले पुरोडाशं श्रपयेत्। पुरोडाशश्रपणप्रकारस्तु ग्रंथांतरे दृष्टः। तद्येवां पूर्वं
पुरोडाशार्थं तंडुलान्प्रक्षिप्य पृथक्कृत्य स्वयं किंचिद्विशिष्टीकृत्य कृत्वा जिने प्रकृत्य पत्न्यादा
स्यावा चूर्णं कारयित्वा ततश्च वर्षे मग्नौ दक्षिणभागे स्थालीं निधाय ततो अग्नेः पश्चात्परिस्ता
रणस्य च मध्ये उपवेषसंज्ञकं पलाशकाष्ठं ततो वांगारौ पृथक्कृत्य तयोरेकं वायव्यदेशे निरस्य पश्च
द्वा वा रोप्य अंगारं दक्षिणमवस्थाप्य तस्मिन्कपालमुपधाय तत्रान्यमंगारं निक्षिप्य पात्रांतरेणापि
पृषेकार्थे अपः प्रणाय्य प्रक्षालितनाना वमग्नौ यथा शुष्कं प्रणाप्य तत्पात्रं स्वाग्रे निधाय यावत्क्षी
नमवस्थाप्य तत्र पवित्रे निधाय तावन्नियम्य तूष्णीं चतुर्वारं स्रुगोप्य तूष्णीं त्रिरुत्पूय पवित्रं प्रोक्षण्यां
निधाय पूर्णपात्रादकं स्रुवेण पिष्टं निनीय पू- र्वं प्रतप्तं गारद्भिः पिष्टं परिप्लाव्य मिश्रीकृत्य पिंडीकृ
त्य पूर्वमुपहितकपालादंगारं तृणेनापोह्य चरुस्थाल्यां तंडुलान् प्य पुरोडाशं कपाले निधाय अ
ङ्गुराफमात्रं कूर्माकृतिमद्भिः स्पृष्टा लसाज्यादीन्निरुत्वा रिहवींषि त्रिः पर्यग्नि कृत्वा पुरोडाशा

Indira Gandhi National
Centre for the Arts

मुल्मुकैः ज्वलितप्पदर्भैः प्रज्वाल्य तैरेव स्रुक्स्रुवं श्रपयित्वा उपदि तस्मिन्नासह्यंगारान्निक्षिप्य वत्स्नं
विसृज्य हस्तं प्रक्षाल्य स्रुवा पपात्रं प्रक्षाल्य तेनानन्त आज्योद्वासनं कृत्वा आसादयेत् स्रुक्स्रु
वसंमार्जनं कृत्वा पुरोडाशो परिस्थितस्मादिन्तणेनापोह्य चरुपुरोडाशावभिघारयेत् एतत्
सर्वमापस्तं बौधायनकर्मणि मंत्रविहाय तंत्रमात्रं कर्तव्यं। मंत्राणां श्रौतविषयत्वात्। इत
आरभ्य कारिकार्थः। आज्यनेति आज्यनस हविर्धानापुरोडाशानां त्रिःपर्यग्निकरणमिति
ग्रंथांतरे अत्र तु आज्यस्य धानानां च पर्यग्निकरणं भवतीत्यर्थः तत्र आज्यस्य केवलमु
त्पवनं तदानां धानादीनां त्रिःप्रोक्षणं भवेत्। अग्रनगवान्॥ ॥सायमौपासनं हुत्वा
तत्रान्वाधानपूर्वकं। पूर्णपात्रनिधानांतं तं त्रं कृत्वा पुरस्तान्निर्वापकाले हविषः पुरोडाशा
स्य चोनयोः। व्रीहीन्निरूप्य पयोधा निधाय प्रोक्षणं तथा। अवहन्य पृथक्कृत तंडुलान्यथा
वत्। प्रज्वाल्यैकतंत्रतः सार्धं चरोः श्रपणमाचरेत्। पार्श्वे न्यत्र पुरोडाशं श्रपे देककपालके।
पुरोडाशार्थमन्यस्मिन्कृत्वा निर्वपणं पृथक् तानस्थरुपुरोडाशोपचेनान्वयथापुरा। ज ११२
यतः। ततोस्तमितआदित्ये औपासनं हुत्वा अन्वाधानादिपूर्णपात्रनिधानांतं कृत्वा हवि

षो निर्वपणकाले पुरोडाशस्यापि निर्वापप्रोक्षणे कृत्वा ऽवहन्य तंडुलान्पृथक्कृत्वा एके
नानागेन चरुं श्रपयित्वा एकेन पुरोडाशं यथा श्रप्यतेन्तस्मिन्नेव काले श्रपयति। केचित्तु
रोडाशस्य पृथग्वा निर्वापं कुर्वंति। चरुमासादयेत् तद्वत् पुरोडाशं ततः परं॥३०॥ बर्हिष्या
ज्यं तरेत् कृत्स्नं पुरोडाशं निमज्जयेत्। प्रकाशपृष्ठमथवा पुरोडाशं निमज्जयेत्॥३१॥ ॥
अस्यार्थः॥ ॥पक्वयोश्चरुपुरोडाशयोर्मध्ये पूर्वं चरुमुद्वास्य बर्हिषि आसादयेत्। अनं
तरं पुरोडाशं मुद्वास्य एकस्मिन्पात्रे निधाय अनंतरघृतमादाय पुरोडाशस्थितपात्रं पूर
येत्। यथा तस्मिन्नाज्ये कृत्स्नं समस्तं पुरोडाशं निमज्जयेत्। अथवा दृश्यमानपृष्ठं पु
रोडाशं निमज्जयेत्। यथा पृष्ठदर्शनं योग्यं भवति तावदाज्यपूरयेत्। अथ तुगवानाम
करुनयोः। पूर्वं हविरुद्वास्य बर्हिषि स्तीर्णेग्नेः पार्श्वे मन्यस्य पुरोडाशमतः परं उद्वास्य
पात्रे कस्मिंश्चिद्दत्त धीयततः परं यथा दृश्ये कपात्रस्थो मग्नो वा यथा तेन वेत्। पूरयेत् पु
रोडाशं तथैव घृतं धारयेति। जयंतः। उद्वासनकाले पूर्वं हविरुद्वास्य निधाय बर्हिषि नि
दधीत। ततः पुरोडाशधानासंस्कारः पूर्वमुक्तः। अथाज्येन पुरोडाशं निमग्नं कृत्वा निष्प

Indira Gandhi National
Centre for the Arts

कात्रापृष्टं वा। कृताज्यभागपर्यंतमिध्माधानादि पूर्ववत्। जुहुयात्। पूर्ववच्चाथर्वर्यो हुतिचतुष्ट
यं।।३२।। अग्नेनायादिभिः पूर्वस्वाहाकारं प्रागंततः। उपस्तीर्योपस्तीर्य सव्येन दक्षिणाप्रोक्षिते
करे।।३३।। सव्येनैककपालं नमोप्यु हस्तमखंडितं। उपविष्टान्तु सव्येन कुर्याद्विरभिघार
णं।।३४।। अच्युतायेति मंत्रेण दक्षिणेन जुहोत्यथ यस्मिन्नाज्ये निमग्नो यस्तु वेणैव जुहो
ति तत्।।३५।। उपर्येककपालस्य मानोऽग्नदनित्यच्चात्र योपकारणादन्यः करोति गृहे
णांजलौ।।३६।। सतेन जुहुयादक्ता धानाः शंनो भवन्त्विति। याः खु धानात्र नभ्यक्ताः पुत्रादि
भ्यो ददातिनाः।।३७।। अथस्विष्टकृतं हुत्वा चतुर्धानेकदेवतः। परिषेचनपर्यंतहोमशेषं
समापयेदिति।।३८।। ।।अस्यार्थः।। ।।पूर्ववदिध्माधानादिआज्यभागांतं कृत्वात्र नंतरं
चर्वाहुतिचतुष्टयं अग्नेनय सुपथाराये अस्मानित्यादिभिश्चतुर्भिर्मंत्रैः प्रागंते
स्वाहाकारेण जुहुयात्। पूर्ववदित्यवदानधर्मेण। चरुहोमानंतरं यजमानः प्रोक्षितं
प्रक्षालितं च स्वदक्षिणकरस्थं सव्येन करेणोपस्तीर्य तस्मिन्नेककपालमखंडितं स
पूर्णं हस्तं पुरोडाशं सव्येन स्थाप्य पश्चात्पुरोडाशस्योपरि सव्येन करेण द्विवारमभिघा ११२

रणं कुर्यात्। अनंतरमच्युताय भौमाय स्वाहेति मंत्रेण तं पुरोडाशं दक्षिणपाणिना जुहो
ति। यस्मिन्नाज्ये पुरोडाशः निमग्नः स्थितः न तदाज्यस्रुवेणैव गृहीत्वा पुरोडाशस्योपरि मा
नोऽग्नेवसृजो अघायेत्यनया ऋचा जुहुयात्। आज्यहोमानंतरमन्यः कोपि वैदिकः गृही
णो यजमानस्यांजलिमुपस्तीर्य तदंजलौ पूर्वमेवाक्ता धानाः द्विरवदाय द्विरुपस्तरणानि।
अनंतरं यजमानः स्वेनांजलिना घृताक्ता धानाः शन्नो भवन्त्विसनेन मंत्रेण जुहुयात्। पात्रांत
रे पूर्वं स्थापितास्तास्त्वनभ्यक्ता धानाः पुत्रपौत्रादिभ्यो ददाति। अनंतरं स्वरा धो नानां वैकदेवता
नां गृहीत्वा द्विरभिघार्य स्विष्टकृतं हुत्वा परिषेचनांतं होमशेषं समापयेत्। अत्र भगवानाह
इध्माधानादिकं चाज्यभागहोमावसानकं। अवनिष्टं पुरस्तंत्रं हुत्वा थाहविषस्तु चि। अवदायो
वदायाग्नेनयसाज्यं चतुरत्वं। क्रमात्स्थस्त्वमुत्का [illegible] डुत्वा सव्येन पाणिना पाणिना। विधाय
दक्षिणपाणौ [illegible] हस्तस्य धारणे। उक्तो अच्युताय भौमाय स्वाहेति जुहुयात्ततः। अस्यस [illegible] हुतले
ननात्र द्विरवदानता। यस्मिन्नाज्ये पुरोडाशः प्रसिद्धः प्राकृतेनापि च। किं चित्स्रुवेण वदाय पु
रोडाशस्य चोपरि मानोऽग्नेवसृजे। अघायेत्यापि जुहुयाद्धुत्वा। आदायांजलिना धाना घृता

Indira Gandhi National
Centre for the Arts

तानि हितः पुरा। त्वान्त्रो नवतित्यनेन मंत्रेण जुहुयात्ततः। परस्तस्यात्मकः पाण्योर्विनियोगं द धास
तः। आज्योपस्तरणाद्यन्यः कश्चित्कुर्यादितीप्यतां। अनंतरास्त्वित्वरा धानाः पुत्रादिभ्यो दित्वा नत
। स्विष्टकृद्धोममारभ्याप रितंत्रं समापयेत्। जयंतः। इद्माधानाद्याज्यभागांतं कृत्वा नदानध
र्मणाग्ने नयेत्त्वितनस्पीनिर्ऋं स्नि प्रत्यव्वं जुहोति। अथ सव्येन हस्तेन स्रुवेणाज्यं गृहीत्वा दक्षिण
पाणावादिस्यनि। न तस्तेनैव पुरोडाशं निधायाभिघारयति। अस्यस वेदुन्तता द्विरवदानमर्थ
त्युक्तं। ततोस्त्सुना पत्नो मा यस्वाहेति। यस्मिन्नाज्यपुरोडाशाः संस्थितः तस्य कदत्तानः स्रुवेणाज्यं
गृहीत्वा मानो अग्ने वस्तजो अधायेत्यनेन पुरोडाशस्योपरि जुहोति। ततः कृत्वो अंजलिं कृत्वा
आस्त्रो उपरस्तरणाभिघारण प्रत्यभिघारणमन्यः करोति। त्वं न्नान्नवंतु वाजिनो हूवंषित्स्तनया
यास्तु धानास्ताञ्जलिना जुहोति। अनंतरास्ताः पुत्रादिभ्यो ददाति धानाचरुन्यां स्विष्टकृ
दर्थमवदाय जुहोति। होमशेषं समापयति॥ ॥इति श्रवणाकर्म॥ ॥अथ सर्पबलिः॥ ॥
श्रवणाकर्मणा दिनं सर्पबल्या न्वयमुच्यते। अथ प्रपूरयेद्दर्वीं सक्तुभिः कलशास्थितैः॥३थागृ
हात्रागुपनिष्क्रम्य शुचौ देशो द्भिः कल्पिते। प्राक्स्याभिः प्रक्षिपेत्सक्तून्सर्पदेवेति मंत्रतः॥४०॥ ११४

नांतरा बलिमात्मानं च्यवेयादिह कश्चनाव्यवायस्य निषेधायमुक्त्रा परिदानतः इति॥४१॥ अ
स्यार्थः॥ ॥एकस्मिन्नेव दिने श्रवणाकर्मसर्पबल्योः क्रियमाणत्वमिति कृत्वा पूर्वं श्रवणाकर्म
निरूप्येदानीं सर्पबलिनामकं कर्म निरूप्यते। तदेव कथयति। पूर्वमेव कस्मिंश्चित्क्षुधपदे त्रो
न्नतनर गुनिर्मिताशाक्पोपरिस्थापितकलशास्थितैः सक्तुभिः तत्रैव निहितां वैकंकतीं दर्वीं मा
पूर्यता गृहीत्वा गृहाद्बाह्यनुरवानिष्क्रम्य प्राच्यां दिशीत्यर्थः। पूर्वं दिवेव कल्पित शुद्धस्थलेजल
मासिंच्य सर्पदेवजनेभ्यः स्वाहेति सक्तून्प्रक्षिपेत्। सर्पेभ्यो बलिं दद्यादित्यर्थः। आत्मनो बले
श्च मध्ये केनाप्यत्र व्यवधानं न कार्यं। परिदान पर्यंतं ध्रुवामुं ते परिददामीत्यंतावसर्यं तव्यवधा
नस्य निषेधउक्तः। यस्सर्पो इति मंत्रेण नमस्कुर्यात्कृतांजलिः। बलिं प्रदक्षिणं कृत्वा पश्चाद
स्योपविशेत्॥४२॥ सर्पोसीत्यादिकं मंत्रं दशाम्यं तं सकृद्वदेत्। ध्रुवामुं तेपरिददाम्येतमुक्त्वा
निवेदयेत्॥४३॥ ज्येष्ठानुक्रमतः पुत्रान्पत्नीं दुहितॄंस्ततः। ततः पत्नीं ध्रुवामुनइत्याद्यावदीते
त्तनु॥४४॥ पुत्रादेर्नामवक्तव्यं द्वितीयांतममुंपदे। ध्रुवमानपरीत्यादिनात्मानं परिधापयेदिति।
॥४५॥ अस्यार्थः॥ ॥बलिदानानंतरं ये सर्पाः पार्थिवा ये अंतरिक्ष्या ये दिव्या ये दिशास्तेभ्य

Indira Gandhi National
Centre for the Arts

इमं बलिं माहार्षं ते न्यद्य इमं बलिमुपाकरोमीत्यनेन मंत्रेण यजमानः कृतांजलिः सन् सर्पानुद्दि
श्य नमस्कुर्यात्। ततो बलिं प्रदक्षिणीकृत्य अस्य बलेः पश्चादुपविशेत्। सर्पोसि सर्प तां सर्पा
णामाधिपतिरस्यन्नेन मनुष्यांस्त्रायसे पूपेन सर्पान् यज्ञेन देवांस्त्वयि मा सन्तं त्वयि सन्तः सर्पा मा
हिंसिषुर्ध्रुव अमुं देवदत्तं पुत्रं ते परिददामीति मंत्रस्याराधनज पिता ज्येष्ठानुक्रमतः ज्येष्ठा
नुपूर्वं पुत्रादीन् निवेदयन् दद्यादित्यर्थः। ततः ध्रुवसावित्रीनेअपन्नामविवाहितां दुहितरं प
रिददामीति निवेदयेत्। ततो ध्रुवस्य त्वती मूमुं ते पत्नीं परिददामीति पत्नीं निवेदयेत्। द्विती
यान् ममुमित्यस्मिन्पदे पुत्रादीनां नामवक्तव्यं। आत्मानमपि ध्रुवमां ते परिददामीति पश्चान्नि
वेदयेत्। अन्यः कुर्वीत वेदाहं गृहीणो नाम ममापदे। सर्पदेवादिमंत्रेण सायं प्रातर्बलिं हरेत्।
॥४६॥ नमस्कारादि कुर्वीत यावत्प्रत्यवरोहणात्। सायंप्रातश्च यावंतः कालास्तु तत्र द्विनार्थि
॥४७॥ तावन्तो बलीश्चोपहरेत्तदहरेव तु अस्यार्थः कार्यव्यासंगादिकेन विकारणेन =द=
अन्यः कर्ताचेत् मामिति पदस्थाने गृहीणो यजमानस्य नामद्वितीयांतं निर्दिशेत्। आप्रत्यव
रोहणात्। प्रत्यवरोहणं मार्गशीर्षस्य पौर्णिमायां चतुर्दश्यां वा भवति। तावत्पर्यंतं प्रत्यहं सा ११५

यं प्रातः सर्पदेवजनेभ्यः स्वाहेति मंत्रेण बलिं दद्यात्। नमस्कारबलिप्रदक्षिणप्रत्यङ्निवेशनमंत्रज
पपरिदानोत्तरं सर्वं करोति। जयन्तश्च नकयोर्मते प्रत्यहं मार्गे तावत्पर्यंतं बलिप्रक्षेपणमात्रमेव कुर्या
त्। नमस्कारादयो निवर्तन्ते। अथवा तद्दिनात् श्रावणीप्रतिपदमारभ्य मार्गशीर्षस्य पौर्णिमापर्यंतं चतु
र्दशीपर्यंतं वा तन्मध्यवर्तीन्यहानि ह्रासवृद्धिभ्यां परिगणय्य तेषु दिवसेषु यावंतः सायंप्रातःकाला
तावंतो बलीस्तदहरेव उपहरेद् दद्यादित्यर्थः। तदा नमस्कारप्रदक्षिणादीनि तंत्रन्यायानुनिवर्तन्ते।
अत्र भगवान्। ततः सर्पबलिं कर्तुं न वेत्तोऽस्पनिवेत्तोऽस्पनिवेदितः। दर्वीमादाय संप्रयेस कृनिःक
लत्राख्यैतैः। सर्पेभ्यो बलिमाधाय पयसर्पा इति पूर्वकं उपाकरोमी संतत्व मंत्रमुक्त्वा नमस्तनः। विधा
य सर्पानुद्दिश्य प्रदक्षिणमथो बलिं। परीत्य पश्चिमे तस्मादुपविश्य महीतलां मंत्रं हिंसिषुरिसंत
सर्पासीत्येवमादिकं। जपित्वाथ ध्रुवे त्वेवं संबुध्यानदनंतरं। ज्येष्ठानुपूर्व्या पत्न्यादीन् सर्वांस्तु परिदा
पतु। अथात्मनोपि सर्वान् परिदाने समाचरेत्। आत्मनः परिदाने तु ध्रुवमां तं इतीरयेत्। ननु पित्रो
रात्मनश्च रत्नत्र रुद्ध्व नात्तथा। स्वयंकर्तृकमेतच्च कर्मणो ह्येदमथेतः। अन्यकर्तृकपक्षेपि योधि
कार्यत्र कर्मणि। तस्येव परिदानं स्यात्तदर्थं तेन कर्मणः। बलिप्रक्षेपमारभ्य प्रागंतादस्य कर्मणः।

Indira Gandhi National
Centre for the Arts

मार्गशीर्षस्य मासस्य पौर्णमास्यामथापि वा। तस्य शुक्ल
कर्त्तुं हेलेश्च मध्ये तु नगच्छेद्यत्र तु संचितः। मार्गशीर्षस्य मासस्य पौर्णमास्यामथापि वा। तस्य शुक्लपक्ष चतुर्दश्यां नाम्ना प्रत्यवरोहणं। करिष्यमाणं यत्कर्म ततः प्राग्विन उत्तरं। कुर्वीत प्रत्यहो रात्रे सायं चतुर्दश्यां नाम्ना प्रत्यवरोहणं। करिष्यमाण यत्कर्म ततः प्रागिनउत्तरं। कुर्वीत प्रत्यहो रात्रं सायं = रिर्मबलिं तेनेव मंत्रेण तयाद व्यो विशेषेस्तु सक्तुभिः। अत्रोपवेशनं प्रत्यग्भूले मंत्रजप संख्या स्तथा। नमस्कारश्च सर्पेभ्य इति सर्वत्रि वर्त्तते। यद्वा तत्रैव समयेनान्तर्यानेष्यतो बलीन्। संख्या योपहरैदेव आचार्यः केचिदूचिरे इति। जपं ततः। अथाहन्येव सप्त बलिहरणार्थप्रात्याद्दिशि स्तथा। अथनो द्रमवकाशं कल्पयति। अथास्मिन्काले न वेशकलशो सक्तून् गृहीत्वा ते दर्वी पूरयति। अथना गृहीत्वा प्राङ्मुखो निष्क्रम्य पूर्वे संकल्पिते देशे पाने नीयुतस्मिन्प्रदेशे सर्पजनेभ्यः स्वाहेति सक्तूनावपति। अनंतरं ये सर्पाः पार्थिवा इत्येतेन प्रणाममकरोति। अथ तं बलिं प्रदक्षिणं कृत्वा प अपमे देशे उपविश्य सर्पोसी सत्तं मंत्रं जपति। अथ पुत्रादिज्येष्ठानुक्रमेण परिददाति ध्रुवदेवदत्तं परिददामिति। ध्रुव यज्ञदत्तं ते परिददामि। ध्रुव विष्णुमित्रं परिददामीति। तत अप्रत्तदुहितॄणां परि दानं भवति। ततः पत्नीमपि। एवं सर्वे परिदायात्मानं मां ते परिददामि। अन्यएव कर्त्ता चेत्तदा ध्रु वमां ते परिददामी सत्र मामित्यत्र गृहिणा नाम निर्दिशति। आनएनस्मात्कर्मणो बलिं आत्मा ११६

नंत्वां नराकोपि न व्यवायमेति। अथ प्रत्यवरोहणस्य द्वयोः कालयोरेककार्यमवधार्योहरहस्ता यंप्रातरा प्रत्यवरोहणाद्बलिं हरंति। सर्पदेवजनेभ्यः स्वाहेति नमस्कारपरिदानान्यत्र करोति। अथ वा कालज्ञानविदां सकाशात् प्रत्यवरोहणार्थोक्तानां द्वीपरिमाणं ज्ञात्वा यावंत्यहानि ताव ती आहुतीस्तदहरेव जुहोति। इति सर्पबलिकर्म॥ ॥अथाश्वयुजीकर्म॥ ॥कुर्वीताश्वयुजीक र्मतदिदानीमथोच्यते॥४८॥ स्यादाश्वयुजमासस्य पौर्णमास्यां तु कर्मतान्। निवेशनमलंकुर्यात्कु ड्यानां लेपनं भवेत्॥४९॥ उपर्यांच्छादयेत्तेषां स्तंभान्मि करोत्स्व च। सर्वे गृह्या विशेषण स्नातः स्रक्कांबरास्तथा॥५०॥ औपासने कृते प्रातरन्वाधानादिपूर्ववदिति॥ ॥अस्यार्थः॥ ॥इदानीं मया आश्वयुजी कर्म उच्यते। नवधान्यादिसामग्री पृषातकं च संपाद्य आश्विन्यां पौर्णमास्यां तु कर्म कुर्यादिति। भगवानपि। या पौर्णमास्याश्वयुजी युक्तनक्षत्रयोगतः। तस्यामाश्वयुजीकर्म त्येवमन्वर्थं संज्ञयेति। निवेशनं मंदिरं संमार्जनमिति चित्रतोरणादिभिः रंगवल्लिकाभिश्चात्र लंकुर्यात्। उपरि यच्छुटितं स्फुटितं स्खलितं च तत्सर्वं कार्यमिति। अंगणादिप्रदेशे नीचाद्य स्थलं समं कुर्यात्। गृह्याः गृहनिष्ठा मनुष्याः सर्वेपि विशेषेण स्नाता। तैलोद्वर्तनादिभिः

Indira Gandhi National Centre for the Arts

त्यर्थः। तथाश्शुक्लांबरधारणमपि कुर्वंति। अनेनप्रकारेण सर्वं विधाय प्रातरौपासने हुते सति पू
र्ववदन्वाधानादि पूर्णपात्रनिधानांतं कृत्वा प्रधानदेवतापशुपतिः। शौनकोपि। यत्कर्म प्रार्थितं त
स्य प्रयोगोत्र निबद्ध्यते। पूर्वे द्युरुपलेपाद्येरलंकृत्य निवर्तनं। प्रत्नानकाले यः स्नात्वा शुक्लांबरध
रो भवेत्। प्रातरौपासनं हुत्वा संति पूर्ववदन्वाधानादि पूर्णपात्रनिधानांतं कृत्वात्र प्रधानदेवतापशु
पतिः। शौनकोपि। यत्कर्म प्रार्थितं तस्य प्रयोगोत्र निबद्ध्यते। पूर्वे द्युरुपलेपाद्येरलंकृत्य निवर्त
ने स्मिन्नग्न्योः पुरस्तनं। अन्वाधानादिकं तत्र प्रणीतासादना वधीति। जयंतः। अथाश्वयुज्यां पौर्ण
मास्यामाश्वयुजी कर्म करोति तत्र पूर्वमेव प्रत्यवरोहणोक्तेन विधिनागृहस्यालंकारं करोति
। अथास्यां पौर्णमास्यां पुत्रादयः स्वयंच विशेषणस्नानं कुर्वंति। शुद्धवस्त्राश्च भवंति। ततः प्रात
रौपासनं हुत्वा अन्वाधानादि पूर्णपात्रनिधानांतं कृत्वेति। उक्ता पशुपति पदं चतुर्थ्यंतं वदेत्
॥५१॥ त्वाजुष्टं निर्वपामीति निर्वपेत्प्रोक्षणं तथा ॥५२॥ प्रोक्षामीति विशेषण प्रोक्षणेन्यत्स
मं भवेत्। स्वरूप श्रपणपर्यंतमवघातादि पूर्ववत् ॥५३॥ कुर्यात्पृषातकं नाम हविरन्यत्तदुच्यते।
पयसाज्ये निषिक्ते तु तत्सयस्यात्पृषातकमिति ॥५४॥ अस्यार्थः। पशुपति पदं चतुर्थ्यंतं पशु ११७

पतयेति। उक्त्वा तौ पशुपतये त्वा जुष्टं निर्वपामीति मुष्टिचतुष्टयं निर्वपेत्। तथैव प्रोक्षणमपि कुर्या
त्। प्रोक्षणे प्रोक्षामीत्येतावानेव विशेषः। अन्यत्सर्वं समानमेव भवेत्। चरुश्रपणादिकं पूर्वव
दवहननादि कुर्यात्। पृषातकं नाम अन्यद्धविस्तदप्युच्यते। एकस्मिन्भाजने होमार्थं गव्यं दुग्धं
प्रक्षिप्य तस्मिन्दुग्धे आज्यं निक्षिप्य सति तदा तत्पयः पृषातकं भवति। तदिदं द्रव्यं पृषातकाख्यं प्र
सेतव्यं। अत्र पयो द्रव्यस्याधिकरणतां दधतो द्धनापेक्षया आधिक्यप्रतीयते। अर्थो दाज्यस्या
ल्पत्वमिति। अस्यापि च सहाज्येन पर्यग्निकरणं भवेत्। इध्माभिधारणं तस्मादाज्यस्योद्वासनादि
कं ॥५५॥ आज्यस्य केवलाहृतोनस्य त्रिः प्रोक्षणं भवेत्। हुताज्य भागपर्यंतमन्वारब्धः स्रुतादि
भिः ॥५६॥ ॥अस्यार्थः॥ ॥ तत्पृषातकपात्रमग्निसमीपस्थापयित्वा ततः पर्यग्निकरणवेलायां
पृषातकस्य चरोश्च आज्येन सह पर्यग्निकरणं भवति। आज्यस्य केवलमुत्सवनपक्षे तस्य पृषात
कस्य त्रिः प्रोक्षणं भवति। आज्यस्योद्वासनादि इध्माभिघारणांतं कर्म विधाय यजमानः स्रुतादि
भिरन्वारब्ध इध्माद्याधानादि आज्यभागांतं कुर्यात्। अत्र भगवान्। कृत्वा च पशुपत्यर्थं चरुमु
क्तप्रकारतः। प्राक्प्रोक्षितं तत्र माज्यसंस्कारपूर्वकं। आज्यभागांतमाचार्य इति। जयंतः। पशुपत

Indira Gandhi National
Centre for the Arts

ये त्वा जुष्टं निर्वपामीति अनेन निर्वापप्रोक्षणे करोति। पयसि घृतमिश्रीयनेनयोः पृषानकमिति
संज्ञा भवति। अस्य संस्कारः पूर्वमुक्तः होमकाले पुत्रादयो गृहिणमन्वारब्धे। पशुपतये शिवा
यत्रां करायादिना मंत्रः। पृषानकाय स्वाहेति मंत्रेण जुहुयाच्चरुं॥५७॥ अथोपस्तरणाद्यन्यः
करोति गृहिणोंजलिं द्रववत्त्वतः स्रुवेणैव पृषानकमवद्यति॥५८॥ जुहोत्यंजलिना चैतदूनं मे
पूर्यतामिति। हविर्द्वयैकदेशात्स्विष्टकृत्स्यात्समापयेदिति॥५९॥ अस्यार्थः॥ ॥ततो दर्व्या
मुपस्तरणादि कृत्वा अवदानधर्मेण चरुमवदाय पशुपतये शिवाय यत्रां कराय पृषानकाय स्वाहे
ति हुत्वा। ततः पृषानकद्रव्येण होमं करोति। तस्य कारमाह। अनंतरं गृहीणो यजमानस्यांजला
वुपस्तरणाद्यन्यः करोति। द्रवद्रव्यत्वात्स्रुवेणैव पृषानकमंजलौ अवद्यति एतत्पृषानकम
जलिना जुहोति। ऊनं मे पूर्यतां पूर्णं मे मा उपनिषत्पृषानकाय स्वाहेति मंत्रेण। अनंतरं चरुपृषा
नकयोरेकदेशं गृहीत्वा स्विष्टकृतं हुत्वा होमशेषं समापयेत्। अत्र भगवान्। अवदाय च रुन
तः मंत्रमुक्त्वा पशुपतय इत्यादि जुहुयात्। पुनः पुरः कृत्स्नं जुहुयुः शुचिर्वा स्वसद्दत्यपि। हो ११८
मस्य बहुकर्तृत्व अन्ये पुत्रादयोपि च। स्नात्वा शुक्लांबरधराः भूत्वा प्रयतमानसाः। अन्वा

रभेरन्कर्त्तारमासीनं स्वातर्दक्षिणे। ऊनं मे पूर्यतां पूर्णो मि रूपकमसंयुतं। पृषानकाय स्वाहेति प
र्यंतं मंत्रमादितः। उदीर्यांजलिना पश्चाज्जुहुयाच्च पृषानकं। अंजलौ पाणियुग्मस्य विनियोगा
दि हस्तिच। शानादोमतदन्यस्मात्कर्त्तोपस्तरणादिके। क्षीरेण यत्घृतं मिश्रं तत्पृषानकमुच्यते
। ततो स्विष्टकृदाद्यूर्ध्वं तंत्रं परिसमापयेदिति। अयं ततः। पशुपतये अनेन हुत्वा पृषानकमंजलि
ना जुहोति। अस्योपस्तरणाद्यन्यः करोति। पृषानकं स्रुवेणावद्यति ततऊनं मे पूर्यतामिति अ
नेन मंत्रेणांजलिना जुहोति ततः स्विष्टकृदादि होमशेषं समापयति। इत्याश्वयुजी कर्म॥ ॥अ
थाग्रयणकर्म॥ ॥तस्याग्रयणं नाम पर्वणि स्यात्तदुच्यते। पूर्णपात्रनिधानांतमन्वाधानादि पूर्व
वत्॥६०॥ निर्वापप्रोक्षणे तूष्णीं भवेतामत्र कर्मणि। कृत्वाज्यभागपर्यंतमवदानादि पूर्ववत्
॥६१॥ ॥अस्यार्थः॥ ॥तत्काले पूर्णिमायाममावास्यायां वा आग्रयणं नाम कर्म भवेत्। तत्कर्म
दानीमुच्यते। पूर्ववदाश्वयुजीकर्मवत्स्थानतौपासनान्वाधानादि पूर्णपात्रनिधानांतं कृत्वा प्रधा
नाहुतं जुहुयात्। अत्र भगवान्। अनाहिताग्निरप्यग्निं विहृत्योपासनं ततः। स्थालीपाकप्रका
रेणत्वरूपकावदाय च। तैरेव त्रिभिर्मंत्रैर्हुत्वा स्विष्टकृदादिकं। कृत्वोपरितनं तंत्रमथान्नंहुत

शोषितां वैश्वदेवावशिष्टं स्वपात्रे निक्षिप्य कुत्रचित्। तन्मात्र मन्त्र सहितं सव्ये पाणौ निधाय स्वात
त्रप्रजापते हाऽस्य दं मंत्र मुच्चार्य पाणिना दक्षिणेनाभिमन्त्रयाथ नद्रान्नश्रे पत्र्यादिकं। उच्चार्य मं
त्रं प्ररत्तान माच्यम्पाद्दिरतं द्विनः। अमोसि प्राणतदृतं ब्रवीमि सेवमादिकं। मंत्रमुच्चार्य हस्तेन ना
भिदेवंतापरामन्त्रोदित्यादि। निस्त्रश्चर्वाहुती हुत्वा सजूर्दित्यादिभिस्त्रिभिः। स्विष्टकृत्स्याच्चरोरेक
देशं सव्ये निधाय स्व॥६१॥ प्रजापतेति मंत्रेण दक्षिणेनाभिमन्त्रयनमिति॥ ॥अस्यार्थः॥ ॥सजू
रित्यादिभिर्मंत्रैस्तिस्त्रश्चर्वाहुतीर्जुहुयात्। दर्भ्युपस्तरणादि कृत्वाऽवदानधर्मेणादाय ॐ स
जूरृतुभिः सजूर्विधाभिः सजूरिंद्राग्निभ्यां स्वाहेति हुत्वा तथैव पुनरादाय द्वितीयाहुत्वा वि
श्वेभ्यो देवेभ्यः स्वाहेति। पुनस्तथैवादाय द्यावापृथिवीभ्यां स्वाहेति॥ अथ स्विष्टकृद्धोमः॥ ॥
सहकरणपक्षेतु। तत्र दर्व्यामाज्योपस्तरणं कृत्वा पात्रस्थ चरोस्तदेशावैदवदायद्वत्तावस्थ
षाकस्तु स्रुवेणावदाय दर्वीस्थं द्विरभिघारयति। अत्र स्विष्टकृद्विषये पात्रस्थानामभिघारणं
नेत्रिपूर्वमेवोक्तं। स्विष्टकृद्धोमं कृत्वा अनंतरं होमशेषाः चरोः सकाशात् एकदेशं किंचित्सा ११९
ताजया गृह्य गृहीत्वा तद्धोमहस्ते स्थापयित्वा ततः ॐ प्रजापतये त्वा गृह्णाम्यपराछे। निमहीं श्रिये

मह्यं यशसे महं मन्नाद्याय इति मंत्रेण दक्षिणपाणिना तद्धोमपाणिस्थितिमन्नमभिमन्त्रय
संस्पृश्यपनक्षयेदिति। जद्रानं द्वितीयं प्राश्नात्याचमेत्राभिमाभ्रमनः॥६३॥ आलजूतू प विष्टरस्तु
तत्र वामोसि मंत्रतः। पत्नीतु मध्ये हविः शेषं प्राश्नात् समंत्रकं॥६४॥ परिषेचनपर्यतं होमशेषं
समापयेत्। इदमाग्रयणं कुर्यात्रेनाग्नेस्त्वाहितानलइति॥६५॥ ॥अस्यार्थः॥ ॥अभिमंत्रीना
नंतरं दक्षिणहस्ते गृहीत्वा ॐ भद्रान्नः श्रेयः समनैष्ट देवास्त्वया वसेन समशीमहि त्वा। स नो
मयोभूः पितवाविशहृत्वान्नोनवृद्धिपदेशंवनुष्पदइति। मंत्रेण तदन्नेन क्षयेदिति। अथोन्द्रहो
मदेवौ। किंस्वित्सत्काननक्षणं कार्यमिति। ततः पाणीप्रक्षाल्य हिरास्त्वम्यतत्तस्वासनेउपविश्य ॐ
अमोसि प्राणतदृतं ब्रवीम्यमासि सर्वानसिप्रविष्टः। स मे जरां रोगमयनुद्य शरीराद् मामा
धिमामृथा मदं इ। इति मंत्रेण आसनो नाभिदेशं स्पृशेदिति। अनंतरं पत्न्या चरोर्मध्यप्रदे
शोकदेशं दद्यात्। साहविशेषमंत्रकं प्राश्नाति। ततः परिषेचनपर्यंतं पूर्वप्रकारेण समापयेदि
ति। यदाश्वयुजी कर्मसह तंत्रेण तत् क्रियते तदा नवान्नेनैव कार्यं। प्राधान्यं तु आग्रयणवि
भागेनैव भवति। यदि पर्वांतरे आग्रयणं क्रियते तदाश्वयुज्यां नवान्नेन होमविधानेन तावं

Indira Gandhi National
Centre for the Arts

रपकत्वं नास्ति। आहिताग्निरत्रेताग्निः। आहितानलेवैतानिके आग्रयणं कर्म कुर्यात्। आश्वयु
जीकर्म आहिताग्नेरपि औपासनाग्नावेव भवति। अनाहिताग्निस्त्वाग्रयणं कर्म शालाग्नौ करो
ति। शालाग्निस्त्वौपासनाग्निः। तथा च गृह्ये। आहिताग्नेराग्रयणस्थालीपाकोऽनाहिताग्नेरपि
शालाग्नौ। इदमाग्रयणं यदा वर्षस्य तृप्तिः तदा भवति। शारदि नवनीसर्थः। तथा च वचनं। शारदि
व्रीहिभिर्यजेतेति। तत्रापि पर्वणि भवति। वसंते यवाग्रयणमस्ति। श्यामाकाग्रयणं द्वयोरपि भवति। व
संते यवैरेव भवति। नियमाग्रयणमुच्यते जयंतः। अनाहिताग्निरपि स्थालीपाकधर्मेण पूर्वोक्तैर्मं
त्रैर्होमं समाप्य प्राशनं करोति। हुतावशिष्टादेकस्मिन्पात्रे गृहीत्वा सव्यपाणौ करोति। ततो दक्षिण
न पाणिना प्रजापतये त्वेत्यनेनाभिमर्शनं कृत्वा भद्रान्न इत्यनेन प्राशनं तत्र वासीनो नाभिमा
लंभेनामोसीत्यनेन पत्नी उत्तवान्न अश्चदेवं प्राश्नाति॥ ॥इत्याग्रयणकर्म॥ ॥अथ प्रत्यवरोहणं।
एवमाग्रयणं प्रोक्तं वक्ष्ये प्रत्यवरोहणं। मार्गशीर्षस्य मासस्य पौर्णमास्यां तदिष्यते॥६६॥ पूर्वेद्यु
नो भवेत्तद्दत्वं हुतानि वेदानं। नास्वसराग्निमित्तं कुर्यादन्वाधानादि पूर्ववत्॥६७॥ निर्वापप्रोक्षणे
तूष्णीं पयसि श्रपयेच्चरुमिति॥ ॥अस्यार्थः॥ ॥पूर्वोक्तप्रकारेणाग्रयणमुक्त्वा प्रत्यवरो १२०

हणं वक्ष्यामिति प्रतिजानीते। तत्र कालमाहान्न मार्गशीर्षपौर्णमास्यां भवति। तच्च गृहालं
करणादिकं पूर्वेद्युरिति चतुर्दश्यां कुर्यात्॥ अथवा पौर्णमास्यां तद्दा आश्वयुजीकर्मवत्। एत
च्च गृहालंकरणादि दिवैव भवति। सूर्ये अस्तागते सति औपासनं हुत्वा सुचिरपि कर्मा गर्दि
तान्न्यासने उपविश्य प्राणानायम्य तिथ्यादि स्मृत्वा वर्णाते प्रत्यवरोहणाख्यं कर्म करिष्ये तदंगम
न्वाधानं च करिष्य इति संकल्प्यान्वाधानादि पूर्ववत्कृत्वा। निर्वापप्रोक्षणे तूष्णीमेव अत्र नि
र्वपणमष्टमुष्टिभिर्भवति। अवघातादिकं प्रक्षालनांतं कृत्वा दुग्धे चरुं श्रपयेत्। अत्र भ
गवान् मार्गशीर्षस्य मासस्य पौर्णमास्यामथापि वा। तस्य पश्चु कृ चतुर्दश्यां नाम प्रत्यवरो
हणं। शास्त्रांतरेषु हेमंतशब्दोपपदमुच्यते। वर्षासु वारिभिः छिन्नस्य वेश्मनोपलेपनादिभिः कु
र्यात्पुनर्नवाकारं पूर्वमेवावधानतः। मंदंतरेण कुड्यादेर्वारि मिश्रणं शुद्धये। जिह्मानां रोपणा
र्थं वपनाम्यनयावलेपनं। छिद्रापिधानं तन्मज्जनार्णेस्तरणमुच्यते। निम्नस्योन्नमनं यत्स्यात्तदु
पस्तरणमतं। एवमेतेनैवी हुत्वा निवासलेपनादिभिः। कटादेः शायनार्थस्याप्यहन्यदविशोध
नं। हुत्वाय याहेमकैस्तेनं हुत्वौपासनानलं। विहृत्य हुत्वायरस्थालीपाकधर्मेण पायसं श्रपयि

Indira Gandhi National
Centre for the Arts

त्वं च रामिति जपं तथा। अथ यथोक्तकाले प्रत्यवरोहणनामकर्म करोति। तत्र पूर्वमेव लेप
नादिभिर्गृहं पुनर्नवं करोति। अहन्येव कटकंबलादि स्वयमेव गृहीत्वा स्यद्दृश्य शुद्धिप्रकार
•योक्तेन विधिना यथास्वं स्वं करोति। पूर्वमेव प्रारब्धमन्वारब्धाभित आदिश्योपासनं हुत्वा
स्थालीपाकधर्मेण पयसि चरुं श्रपयति। कृत्वाज्यभागपर्यंतमन्वारब्धः स्रुवादिभिः॥६८॥
अपश्वेतेति मंत्राभ्यां जुहुयात्पायसं हुतौ। जपेदजय मित्यादिमीक्षमाणो हविर्भुजं॥६९॥
उक्त्वा त्रिवोन इत्यादि हेमंतेति पदं स्मरेदिति। अस्यार्थः॥ ॥ततः आज्यभागांतं कृत्वा स्रुवा
दिभिरन्वारब्धः पायसं जुहुयात्। तच्च न दर्वी माज्योपस्तरणमवदानादि कृत्वा। अपश्वेत
पदाजहि पूर्वेण चापरेण च। सप्त च वारुणीरिमाः सर्वाश्च राजबांधवीः स्वाहेति प्रथमाहुतिं
हुत्वा अग्निं विलोकयन् अजयंत्रः प्राजापत्यन्योन्यत्यादि इति मंत्रं जपेत्। ततः त्रिवोनः सुमना
भवेति मंत्रमुक्त्वा मनसा हेमंतो संबुध्यंतं पदं स्मरेत्। हेमंतत्राब्दं संबुध्यंतं ध्यायेत्। अत्र भग
वान्। होमसमये समुपस्थितेन। अन्वारब्धस्तु पुत्रादैरपश्वेतपदाजहीत्याभ्यां तु द्वितीयार्थी १२९
भ्यां क्रमाज्जुहुयात् यथाक्रमं। अथाजयं नद इत्यादि मंत्रं पश्यन् हुतानां जपेत्। ततस्तु हेमंतत्राब्दस्य

ममन्वा क्षयं। संबुध्यंतस्य कृत्वा च त्रिवोनः सुमना भवा इत्येतस्यापि मंत्रस्य मनसा जपमाचरेदि
ति। जयंतः। अथ होमः कृत्वादिभिरन्वारब्धः अपश्वेतपदाजहीत्येताभ्यां हुत्वा अजयंत्रः प्रा
जापत्येन्योन्यत्यादिरग्निमीक्षमाणो जपति। त्रिवो नः सुमना भवेत्येनं मंत्रं ब्रूते हेमंतशब्दं मन
सा ध्यायति। स्वस्तरं स्वयमास्तीर्य पश्चादग्नेस्ततः परं॥७०॥ तत्रोपविशतिस्योनः पृथिवीति जप
ऋचं। एतत्प्रभृतिपर्यंतं जपेत्पुरुषस्तनवोच्च॥७१॥ ज्ञातीनं तत्र सामात्यः प्राक्शिरा उदगाननः।
गृहीणोनंतरं योयोज्यायांस्तु इच्छयां तत्र॥७२॥ यथावकाशमथवा दारतेत इहदेवने इति।
अस्यार्थः॥ ॥हेमंतस्मरणानंतरं अग्नेः पश्चिमभागे स्वयमेव शायनयोग्यं स्वस्तरमास्ती
र्य तस्मिन् स्वस्तरे उपविशन् स्योना पृथिवीति ऋक्त्वं जपेत्। कृताध्ययनाः पुत्रादयो येन। स्मिन्ना
सिला इमाइमामवत्र्त्वंजपति। जपस्य सर्वेषां समत्वं हुत्वा। अथ जपानंतरं सामात्यः कलत्रादि
सहितः प्राक्शिरा उदगाननः सन् शायी तच्छायनं कुर्यादिति। तत्र शायनप्रकारमाह। तस्मि
न्स्वस्तरे पूर्वं यजमानः शायी। तत्पश्चात्सर्वे अमात्या ज्येष्ठादिक्रमेण यजमानमेव च्छेरन्।
अथवा अवकाशानुसारेण ते सर्वे तु इच्छेरन्। अत्र भगवान् पश्चिमे अग्नेः पलालाधेरथास्
तायनो विनं। चाप्यंतो न न मास्तीर्य तत्र नासितायथासुखं। जपे इत्थमथ स्योना पृथिवीत्ये

Indira Gandhi National
Centre for the Arts

वमादिकं। जपित्वा तत्र नार्यो निःपुत्रैश्वशुरसुसंगताः। तायी नोदङ्मुखः प्राक्शिरा दक्षिणपार्श्व
र्श्वेतः। यथावकाशमितरपौत्राद्यास्तत्र शेरते। अनुज्येष्ठं तायीरंश्च गृहीणं नेतरसुताः।
गृहीणानंतरं ज्येष्ठः संविशेत्तस्य वानुजः। तदनुपरइत्येवं क्रमेणान्येपि तारनतो। येमंत्रा
न्मांत्रिंतु योग्यास्त्रीबालादिविवर्जिताः। तायानो सावनः स्योना पृथिवीत्यादिकामृचं। ज
पित्वेति जयंतः। अथास्तरायनं तत्रैवानीय सम्यक्स्वयमेवास्तृणाति। ततोस्मिन्तायने
उपविश्य स्योना पृथिवि नवेत्यनेन मंत्रं जपित्वा प्राक्शिरा उदङ्मुखस्तत्रैव संविशंति। अ
मात्यः सह तेन्वय यथावकाशं संविशंति। अथ तायायो ज्येष्ठः। असावसावनंतरोनुवर्तित। उ
त्थाया र्छेम नो देवाः प्राङ्मुखास्त्रिर्जपत्यथा।७३। तत्त्वोरया प्रथमं पादं जपेयुर्दक्षिणामु
खाः। प्रत्यङ्मुखा द्वितीयं तनुं नीयम दगमनाः।।७४।। तत्रोक्तस्विष्टकृद्वर्जं होममंत्रशेषं समा
पयेदिति। अस्यार्थः।। ।।तायनल्लक्षणमंगस्पर्शं कृत्वा निद्रामकृत्वैव सर्व उत्थाय अनो
देवा इत्यृचं प्राङ्मुखाः संतः त्रिवारं पठंति। अनंतरमस्या एव ऋचः प्रथमं पादं दक्षिणमु १२२
खाः सकृज्जपित्वा तथैवास्या एव ऋचः द्वितीयपादं पश्चिममुखाः सकृज्जपित्वा त

थैव तृतीयं पादं उत्तरमुखाः सकृज्जपंति। जपानंतरमस्मिन्कर्मणि स्विष्टकृद्धोमानारन्नि त
रमान्स्विष्टकृद्वर्जं होममंत्रशेषं समापयेदिति। अ॰ त्र भगवान्। उत्थाय तामनादासि ता प्रा
ङ्मुखाः सहा अतो देवा ऋचं त्वा द्यां त्रिर्जपित्वा क्रमादितः। पश्चाद्दिशो दक्षिणाद्यास्तिस्रः प्रति
दिशं प्रतीक्ष्य वय यथाक्रमं। जपेयुरेतामार्धर्चैः सकृत्सकृदखंडितं। अथोपरिष्टात्तत्रं च स्विष्ट
कृद्धोमवर्जितं। विधायरात्रिशेषं तु संविशायुर्यथापुरमिति। जयंतः। अथास्मा प्रयना
दुत्थाय नो देवा अवंतुन इत्यृचं प्राङ्मुखस्त्रिर्जपंति। अस्या एव ऋचः त्रयः पादास्तिस्रो
दिशो यथाक्रमं अवलोकयंतो जपंति। अतो देवा अवंतुन इति दक्षिणामुखाः जपंति। यतो वि
ष्णुर्विचक्रम इति प्रत्यङ्मुखा जपंति। पृथिव्याः सप्तधामभिरिति उदङ्मुखा जपंति। अथ
स्विष्टकृद्वर्जं होममंत्रशेषं समापयंति ततो निर्गत्य यथा पूर्वं विचरंते। यथा ताप्यं त्रायित्वा न संग
नावुदितेरवौ।७५। जपेयुः सौर्यसूक्तानि तद्दस्त्ययनानि च। उदुत्यं चित्रं देवानामुद
गादिति।७६। नमो मित्रस्य सूक्तं च सूर्यो न इति चापरं। उक्तानि सौर्यसूक्तानि वक्ष्ये स्वस्त्य
यनानि वा।७७। आ नो भद्रा तथा स्वस्ति नो मिमीता परा वतेति इति।। ।।अस्यार्थः।। ।।ततः हो

Indira Gandhi National
Centre for the Arts

मानंतरं प्रयेच्छया निद्रां त्यक्त्वा ब्राह्मे मुहूर्ते चोत्थाय यथार्हं शौचस्नानादिनित्यकर्म विधाय
श्रौपासनं कृत्वा रवावुदिते सति उक्तानि सौर्यसूक्तानि स्वस्त्ययनानि जपेत्। तत्र चक्र
मुमाद्यानि उद्यं जातवेदसं मिति ऋचयोर्द्वाचत्वारिंशत्सूक्ते अग्निमंत्रस्तु कत्युष्टय विद्यानवे आप्रान
प्यानिर्वीति। ततः चित्रं देवानामिति षड्ऋचं कृत्स्नं सूक्तं ततो नमो मित्रस्य वरुणस्य चक्षसे इत्ये
तद्दशर्चं सूक्तं। सूर्यो नो दिवस्पात्विति त्रिपंचर्चं एतानि सूर्यसूक्तानि उक्तानि। अथ स्वस्त्य
यनानि वक्ष्याम्यहं। आ नो भद्रा इति दशर्चं सूक्तं। स्वस्ति नो मिमीतामिति पंचर्चं। परावतो यो दिवि
षंतं आप्या मतिं त्रयोदशर्चं। एवं सौर्याणि स्वस्त्ययनानि च जपित्वा ब्राह्मणान्भोजनं कुर्यात्।
अत्र भगवान्। अथापरेद्युरुदिते सूर्ये पितॄन्गताः सौर्याः सूर्यो न इत्याद्यास्तथा स्वस्त्ययनान्य
पि। तथा स्वस्ति न इत्यादि जपेद्युरवधानइति। जयंतः। अथापरेद्युरेकरसंगत उदिते आदित्ये सौ
र्याणि स्वस्त्ययनानि च जपति। तत्र सौर्याणि सूर्यो नो दिवस्पात्विति त्रिसूक्तं उदुत्यं जातवेदस १२७
मिति सूक्तं चित्रं देवानामिति सूक्तं नमो मित्रस्येति सूक्तं। स्वस्त्ययनानि आ नो भद्रा इति सू

क्तं स्वस्ति नो मिमीतामिति सूक्तं परावत इति सूक्तं। संस्कृतेन गृहान्नेन ब्राह्मणान् भोजयेदथ॥
॥७८॥ ॐ स्वस्ति भवंतो ब्रुवंत्विति ॐ स्वस्तीति वदंति। अस्यार्थः॥ गृहसिद्धमन्नं ब्राह्मण भोजना
र्थं कारयित्वा तदन्नं वैश्वदेवादि संस्कारेण संस्कृत्य अन्नं तु कृतस्य प्रत्यवरोहणाख्यस्य कर्मणो वै
संपूर्णता सिद्धिर्नया कर्मप्रादेवनाशी यद्ब्राह्मण भोजनं करिष्ये इति संकल्प्य ब्राह्मणानां
पादप्रक्षालनं कारयित्वा आसने उपवेश्य गंधादिभिः संपूज्य भोजनयोग्यानि पात्राणि
तत्र स्थापयित्वा तेषु मिष्टान्नं परिवेष्य सोदकमुदकं गृहीत्वा अनेनान्नदानेन प्रत्यवरोहणकर्म
देवताः प्रीयतामिति संकल्प्य उदकं सजेत्। ततो भुक्तवत्सु द्विजेषु सकलत्राणामस्माकं अ
स्मदर्थं ॐ स्वस्तीति भवंतो ब्रुवंत्विति निगद्य प्रांजलिः कृत्वा सति तेषु स्वस्ति रूपप्रति स्वनं ब्रूयुः अ
त्र भगवान्॥ ॥अथान्नं गुणवत्कृत्वा स्वादु व्यंजनसंयुतं। ब्राह्मणान्भोजयित्वा तैः कृतपुण्या
हवाचयेदिति। जयंतः। अथ गृहपक्वान्नं संस्कृत्य ब्राह्मणान्भोजयित्वा स्वस्त्ययनं वाचयीत। अ
थ कर्तुः स्वस्त्ययनं ब्रूत इत्युक्त्वा स्वस्त्ययनमिति वदंति॥ ॥इति प्रत्यवरोहणाख्यं कर्म॥ ॥अथ
पिंडपितृयज्ञः॥ ॥एकाग्निरपि कुर्वीत पितृयज्ञमसावस्यायां॥ ७९॥ अथ दर्शोपरात्रे तु प्रज्वाल्यौ

Indira Gandhi National
Centre for the Arts

पासनं ततः। प्रागदक्षिणाग्रैकैर्दर्भैः परिस्तीर्य हविर्भुजं॥८०॥ कर्मसाधनमत्रेष्टं सर्वं प्रागदक्षिणं
मुखं। दर्भैर्नास्तीर्य वेदाग्न्यां वायव्यां वा हविर्भुजः॥८१॥ स्थाल्याद्येकैकमासाद्य स्थालीं शूर्पं च
गृह्य वेति। अस्यार्थः। आहिताग्निः पिंडपितृयज्ञं करोति। एकाग्निरपि करोति। स पिंडपितृ
यज्ञ उच्यते। तस्य विधिमाह॥ ॥अनंतरं दर्शे अमावास्यायां अपराह्णादिकाले औपासनाग्निं
प्रज्वाल्य प्रागदक्षिणाग्रैकैः आग्नेय्याग्रकैर्दर्भैरग्निं परिस्तीर्य (हविर्भुजं) अत्रास्मिन्कर्मणि कर्म
साधनं अर्थप्राप्तं सर्वमाग्नेयीमुखमिति परिभाषते। अग्नेर्वायव्यदेशे दैशान्यदेशे वा आ
ग्नेय्याग्रकान्दर्भानास्तीर्य तेषु स्थाल्यादीनि साधयेदिति। स्थाल्यादीनि कमंडलु पर्यंतानि
उत्तानान्येव एकैकमासादयेदिति द्वंद्वं जोनीति भावः। पात्रासादनानंतरं स्थालीं शूर्पं च गृहीत्वा
व्रीहिपूर्णां स्थालीं कुर्यात्। व्रीहिमच्छकटं वक्ष्ये दक्षिणस्यामवस्थितं॥८२॥ आरुह्य व्रीहिभि
स्थालीं पूर्णां शूर्पं निमृज्य च। शकटारोहणं चैव भवेदक्षिणभागतः॥८३॥ शूर्पस्थानं शकटे
प्रास्य स्थालीं जिनउलूखलौ। वस्त्रस्थाल्यां स्थितानां व्रीहीन् अवहन्यात्ततः परमिति॥८४॥ अ
स्यार्थः॥ ॥अग्नेर्दक्षिणविभागे स्थापितं व्रीहिपूर्णं शाकटं दक्षिणभागत आरुह्य अर्थादेव १२४

शाकटे शूर्पं स्थापयित्वा तस्मिन् शूर्पे स्थालीं संस्थाप्य व्रीहिभिः पूर्णां कृत्वा अधिकान् स्थाली
मुखस्थितान् व्रीहीन् शूर्पे निमृज्य प्रक्षिप्य शूर्पस्थान् व्रीहीन् पुनः शाकटे प्रक्षिप्य कृष्णाजि
न उलूखले स्थापिते सति अर्थादवरुह्य स्थालीगतान् व्रीहीन् तस्मिन्नुलूखले प्रक्षिप्य अनंत
रं तान् व्रीहीन् पत्नी अवहन्यात्। सकृत्फलीकृतान् सकृत्प्रक्षाल्य तंडुलान् श्रपयित्वा लु
केनीतायेरूपे सानलं दिवं॥८४॥ अतिप्रणीतं एषाग्निं तं परिस्तीर्य पूर्ववत्। अथ वोगस्माग्निलि
खेत्स्पृश्य नलेखमपहता इति। अन्नु स्यनामवस्तीर्य सकृदाच्छिन्न बर्हिर्भवति। अस्यार्थः। कंड
नानंतरं शूर्पेण सकृत्फलीकृत्य सकृद्देवप्रक्षाल्य पाकार्थमौपासनाग्नौ स्थापयेत्। अथाग्नेः स
काशाद् उल्मुकं गृहीत्वा येरूपाणीत्यादिमंत्रेणाग्नेराग्नेयीविभागे स्थापयेत्। एषोऽग्निरतिप्रणी
त इत्युच्यते। अस्याप्युपासनाग्निवदाग्नेय्याग्रकैर्दर्भैः परिस्तरणं कृत्वा अस्मादतिप्रणीताद्द
क्षिणभागे अपहता असुरा रक्षांसि वेदिषद इति स्पृष्ट्वा नलेखामुल्लिखेदिति। स्पृष्ट्वा स्यात्संलेखनं कुशमू
लेनेति द्रष्टव्यं। उल्लेखने विशेषउक्तो हेमाद्रौ ब्रह्मांडपुराणे सव्यान्तराभ्यां पाणिभ्यां कुर्यादुल्लेखनं
द्विजः प्रघर्षणं ततः कुर्यात् श्राद्धकर्मण्यतंद्रितः। स्मृत्यंतरे तत्राप्युल्लिखेत्स्पृश्य नकुर्वीत पिमहि।

द्विज इति। ततस्तोरेखां तूष्णीमभ्युक्ष्य सकृदाच्छिन्न बर्हिषात्रवस्तीर्यं आस्तरणं कृत्वेत्यर्थः। अत्र स
कृदाच्छिन्न कुशाभावे काशादिभिर्वा कार्यं। तथा चाह वेद्य धर्मांतरा। पितृ निर्वपणं कार्यं कुशाभावे त्रिव
र्णैः। काशैर्मुराज दूर्वा युप वित्रेपरमेस्म तत इति। तस्यां रेखायां तूष्णीमभ्युक्ष्य यामाग्रेष्वाग्रं बर्हिरास्त
णीयात्। अनुसृतं विलीनाज्यं ध्रुवायां स्त्रियते ध्रुना॥८६॥ उत्पूतेन नवनीतं वासाद्य दक्षिणतो ध्रुवां। अ
भिघार्य चरुं स्रुवेणोदगुद्वास्य पश्चिमे॥८७॥ आसाद्य सर्वां जनादीनि दक्षिणस्यां हवि र्भुजः। प्राचीना
वीत्यथ दर्भी माधाय धमहविर्भुजीति॥८८॥ ॥अस्यार्थः॥ ॥अधुनात्र स्मिन्काले ध्रुवायामुक्तमाज्य
प्रक्षिप्य अग्ने र्दक्षिणतो ध्रुवामासादयेत्। अथ श्रतं स्थालीपाकं ध्रुवा पात्रस्थितेनाज्येन चरु
मभिघार्योदगुद्वास्याग्नेः पश्चिमतो ध्रुवामासादयेत्। ततः अग्नेर्दक्षिणतः अंजनादीनं
नवनीतं पूर्वस्तृणं निस्थापयेत्। उत्तरस्तोपयोगार्थं। अथो देनावस्थयेत् तरान्वे नवापिंडपितृयज्ञा
गं कर्म कृत्वा प्राचीनावीती भूत्वा अभिघारण विनैव अमंत्रकमिध्ममग्नौ जुहोति। इध्मस्थ पितृक
र्मणि उदुंबरवृक्षस्य पत्रास्यनेन रत्नावयाज्ञिकाः पालाशादीनामिध्ममंगी कुर्वंति। अत्रेध्म बंधनं
नास्ति। बर्हिर्बंधनमपि नास्ति। अत एवात्र रज्जुकरणं स्तुनरां लुप्तमेव। अथावदानधर्मेण गृहीत्वा १२५

मेक्षणेन तु। चर्वाज्ञ निद्व यं कृत्वा सोमाय निदयेन तु॥८९॥ स्वाहाकारेण होमश्चेदुपवीतीभवेदिह।
मेक्षणानु प्रहरणं मंत्रयोर्ब्यत्ययात्तथा॥९०॥ प्रास्याग्नौ मेक्षणं चापो निनयेदित्तरेण तु इति। अस्या
र्थः। अथ इध्म होमानंतरं अग्नौ जुहोति। अवदानधर्मेणोपस्तरण पूर्वकं। तथैव मेक्षणं वाम हस्ते
न गृहीत्वा दक्षिण हस्तस्थितेन स्रुवेणाज्यमादाय तस्मिन्मेक्षणे उपस्तृणाति अनेनैव मेक्षणेनैव स्थाली
पाकमध्यादि द्विवारं गृहीत्वा पुनर्वाममेक्षणं संस्थाप्य पात्रस्थ पात्रस्थमभिघार्य मेक्षण स्रुवा
निधार्य पुनर्मेक्षणं दक्षिण गृहीत्वा ॐ सोमाय पितृमते स्वधा नम इति द्वाब्द योरखाने इति कृत्वा। पुनस्त
थैव मेक्षणे उपस्तरणादि कृत्वा। ॐ अग्नये कव्यवाहनाय स्वधा नम इति द्वितीयामाहुतिं जुहुयात्।
अत्र स्वाहाकारेण होमपक्षे यज्ञोपवीती भूत्वा मंत्रयोर्व्यत्ययं कृत्वा जुहुयादिति। तच्चैवं। ॐ अग्नये
कव्यवाहनाय स्वाहा। सोमाय पितृमते स्वाहा। एवं पक्ष द्वयं रत्रोक्तं स्पष्टी कृतं। स्वाहाकारपक्षे
सव्येन होमः स्वधानमः शब्दयोः स्थाने स्वाहा पत्राब्दो विधीयते। इदमत्र गृह्यं स्वाहाकारेण वाग्नि
पूर्वं यज्ञोपवीती। मेक्षणप्रहरणं तमुपवीत्यैवभवति। तथा मंत्रव्यत्ययः। सव्यापसव्ययोरनुपार
पिपसव्ये रग्नौ मेक्षणप्रहरणमुपवीत्यैव। अग्नौ मेक्षणं प्रास्यानि। क्षिप्य रेखायां पितृ तीर्थेन अ

पनिनयेत्। शौनकः। ततो वरान् धर्मणा गृहीत्वा मेक्षणं चरुं सोमायेत्यादिमंत्रेण नमो न नोद्धृतिं पु
रः एकां कृत्वाग्नये कव्यवाहनाय स्वुपक्रमं मंत्रेण नमो नमुच्चार्य द्वितीयामाहुतिं ततः। आवरेत्मेक्ष
णेन चरुं यदि वा मंत्रयोर्द्वयोः। इमं स्वाहा न मुक्त्वा क्रमेण जुहुयाच्चरुं। स्वाहाकारेण होमं तु भुवे
द्यज्ञोपवीतवान्। तत्र प्रागग्नयं कृत्वा पश्चात्सोमाह्वयतां। अग्नौ यज्ञोपवीत्येव प्रक्षिपेन्मेक्षणं
नदीति। लेखायां पिंडदेशेषु शुंधतामिति तु त्रिभिः॥११॥ तत्र पिंडत्रयं दद्यात्प्राचीनेन पाणिना।
पित्रादिभिस्त्रिभ्य एतत्ते विलोपस्वेति मंत्रतः॥१२॥ त्वेनामानि जानीयात् ततेत्यादि वदेत्क्रमादिति
॥ अस्यार्थः॥ स्फ्येन कुशेन वा उल्लिखितायां लेखायां पिंडदेशेषु त्रिषु पितृतीर्थतः। शुंधतामित्या
दि त्रिभिर्मंत्रैः। शुंधंतां पितरः शुंधंतां पितामहाः शुंधंतां प्रपितामहा इति अपः प्रक्षिपेत्। अग्नौ
निनयनानंतरं बर्हिराच्छिन्न रेखायां पिंडत्रयं दद्यात्। प्राचीनेन पाणिना उत्तानपाणिना स
र्यः। कस्यः पिंडदानं मित्सपक्षायां पित्रादिभ्यस्त्रिभ्य इति विधीयते। तेन केन मंत्रेण स्यादत ॐ
एतत्ते राम [illegible] इति मंत्रेण यस्य नाम [illegible] तस्मै दद्यादिति। अत्र भग
वान् [illegible] तेन पिंडत्रयं कृत्वा पितृभ्यो निर्वपेत्क्रमात्। तत्र १२८

तत्र प्रथममासित्वा पूर्ववद्दक्षिणाभिमुखः। स्फ्येनोल्लिखितलेखायामादिमध्यांतदेशतः। शुं
धंतां पितर इत्येवं मंत्रत्रयमनुक्रमात्। आचार्यैश्चार्यसलिलं किंचिन्नुक्षिप्य विनिक्षिप्यानंतरं
स्तुतेषु पित्रादेः पिंडान् दद्याद्यथाक्रममिति। स्वाहांते नोक्तमंत्रेण पिंडोज्जीवाय दे
यतां॥१३॥ निहतान्तत्र पितर इति तानुमंत्र्य तु। अपसव्येन मा [illegible] उदक्प्राणान्नियम्य
वा॥१४॥ आमा वृत्यानुमंत्र्य अमीमदन्तेत्यादिमंत्रतः। [illegible] निनयेत्पूर्ववज्जल
मिति॥१५॥ अस्यार्थः॥ ॥ पितामह प्रपितामहयोर्मध्ये यो जीवति तदुद्देशेन उक्तमंत्रेण स्वा
हांते अग्नौ जुहोति। एवं पिंडत्रयं दत्वा अत्र पितर इति मंत्रेण गत्वा [illegible] अपसव्ये
न मासत्य उदङ्मुखो भूत्वा उपवीती आचम्य आदावंते तथा वायौ विप्राणां पादशौचने
विकिरे पिंडदाने च षड् आचमनं स्मृतमिति। पिंडदानानंतरमाचमनं कृत्वा उपवीति
ना कार्यं। अत आचम्य यथाशक्ति प्राणान्निरुध्य अयं तु मंत्रः अनुच्छ्वासेनैव पवित्रवान्
वति। उक्तं च कल्पलतायां। यावदेवाभ्यरेन्मंत्रं तावत्प्राणान्निरोधयेदिति। मंत्रमध्ये श्वा
सोत्सर्गो न कार्य इत्यर्थः। मनुः। आचम्योदक्परावृत्य त्रिरायम्य शनैः शनैरिति। पुनस्त

Indira Gandhi National
Centre for the Arts

येव पार्श्वे अन्यावृत्य पिंडस्तं मुखो भूत्वा पुनः पितरो अमीमदंतेति मंत्रेणानुमंत्रयेदिति। त
तः पिंडपात्रस्थं चरुं वा अवघ्राय। तन्निरूप तस्मिन्पात्रे हस्तं प्रक्षाल्य पूर्ववद्देव शुंधंतामि
ति त्रिभिर्मंत्रैः। त्रिषु पिंडेषु जलं पितृतीर्थेन सिंचेत्। तथा च शौनकः। तथैषा मंत्रा पितर इत्या
द्येनानुमंत्रणं। मंत्रेण कुर्यात् पिंडानां त्रयाणां ततः सकृत्। ततः सव्येन पार्श्वेन पार्श्वेनावृत्य
कृत्योदङ्मुखो भवेत्। नियम्य वा ऽसमाप्ति वा कंचित्कालं यथाबलं। ततस्तेनैव पार्श्वेन पर्यावृत्य
पुनः पितृन्। अमीमदंतेत्याद्येन मंत्रेणाप्यनुमंत्रयेत्। पिंडांश्चोष्णवरीः किंचिदादाय घ्रायते
यजेत्। प्रक्षाल्य हस्तं शुंधंतामित्याद्यैरेव पूर्ववत्। मंत्रैः पिंडेषु पानीयं निषेचयेत्पितृतीर्थतः।
अत्र व्याघ्रस्मृतो विशेषः। अद्भिः प्रक्षाल्य तास्त्यं प्रति पिंडं तु पूर्ववत्। कृत्वावनेजनं कुर्यात्पिंड
पात्रमधोमुखमिति। अस्यार्थः॥ ॥पिंडपात्रं प्रक्षालयित्वा तत्रस्थेनोदकेन अत्रामिश्रणतेरवमं
त्रैः पितृतीर्थेन सेवनं कृत्वा तत्पात्रं दक्षिणाग्रेऽधोमुखं स्तत्कारवां नरविषयमिति केचिदाहुः
।तथा त्रिगुणोपसंहारन्यायेन अस्मत्कारिकापि एतत् ग्रहीतुं शक्यं भवति। गुणोपसंहारो नाम यत्र
स्वशाखोक्तकर्मसिद्धिर्भवति। अनुवचनात् शास्त्रांतरोक्तः कश्चन गुणोऽभिरायो भवति। सोऽयं गुणो १२७
पसंहार इति। अन्यैश्च श्वेति नामादि मंत्रान्यां तेलमंजनं। दद्यात् हृत्वा मथेन दद्यादिति पिंडेषु

तः परं॥ ८८॥ नमो वः इत्यपस्थाय मनोन्वेति त्र्येनवा परेतनपितरे इति मंत्रेण पिंडान्प्रवाहयेत्
॥ ८७॥ औपासनांतिकं गत्वा जपदग्नेतमिस्त्वं यदंतरिक्षमिसेनांनस्थ एवं जपेदृचं॥ ८८॥ गार्ह
पत्य इत्यस्य तिलोपन्यायो विदुरिति॥ अस्यार्थः। ततउदकसेचनानंतरं पित्रादीनां संबुद्ध्यंतेः सगोत्रैना
मोच्चार्य अन्यदृश्वइ = विदा = ति मंत्रेण प्रतिपिंडं तैलं दत्वा तथैव पित्रादीनां नामोच्चार्य अंरख तिमंत्र
णा प्रति पिंडं मंजनं दद्यात्। तास्मृतं नरोरि। गृहीत्वा दर्भे पिंजूलं त्रिभिः कुर्याद्यथाविधि। अपसव्यं पितृ
भ्यस्तु दद्यादुत्तममंजनं मू॥ तैलं कृष्णतिलेभ्यश्च यत्नेन परिरक्षितं। तैलमंत्रेण दातव्यं पिंडस्यां
जनं हि तदिति। अत्रांजनस्य प्राथम्यमापस्तंबादिविषयं। अस्मत्कारवायां कारिकायामत्रैव।
अन्यं श्वास्वेतिनामादिमंत्रान्यां तेलमंजनमिति अत्रैवोक्तत्वात्। अभ्यंजनं प्रथमं भवति। तत
जनमिति। अभ्यंजनानंतरं पिंडेषु एतद्वस्तमिति मंत्रेण दद्यात्। यत्तु ब्रह्मपुराणे दद्यात् क्रमेण वा
सांसिक्थं तवस्त्रस्य वा दशामिति। तत्कारवां तरवि ॰ ॰ षयं। अस्मत्सूत्रे तु आचार्यः प्राक्
वोक्तणादशादानस्येव विहितत्वात्। उक्तं च। दशा मूर्णास्तु कां वा पंचाशद्वर्षेतायां तु धं स्वलो
मदातव्यमिति। दशा व्याख्याना। तुर्णास्तुका इति मध्ये। लोमनिर्मितस्तु त्रेक देशो। स्वलो

मनिप्रसिद्धोपरानारः।पंचाशाद्दर्भिको परस्तु दद्यात्लोमस्थकं सुभं।तदवनेपं प्रदेयं स्यादिधिसंप
र्णता कृतइति।सर्वेऽन्यमंत्रेणवदुष्टव्यं।अत्रगमृतं नरागंधपुष्पनैवेद्यानैरुपचारैः पिंडान
र्चयदिसाऊः।उक्तंच संग्रहे।दत्वा दत्वा यथपिंडेषु गंधपुष्पोस्तनार्चयेत्।धूपदीपैश्च नैवेद्यैः
विधिसंपूर्णता कृतामितिाननः नमोवः पितरइत्यादि कैर्मंत्रैः पिंडानांसमुखं स्थित्वा मनान्वीति
त्वाउपस्थानं कुर्यात्।ततः परेतनेत्यादिमंत्रेण तान् पिंडान् प्रवाहयेच्चालयेदित्यर्थः।पिंडचाल
नानंतरमाधासनाग्नेः समीपगत्वा तत्रैव वाक्यं मंत्रद्वयं जपेदिति।आनेतु दक्षिणाग्निविहिते
पिंडपितृयज्ञे गार्हपत्यस्याविद्यमानत्वात् यथा पाठमेव मंत्रोगृह्याग्नौअजनु गार्हपत्यस्याग्ने
रनावृत गार्हपत्यपदे विनेवसएवमंत्रः पठितव्यो भवति।न्याय विदोमीमांसाशास्त्रकुशला
इत्यर्थः।अत्रभगवान्।पिंडं कृते कृते सूत्रं च दद्यादर्जनेणत त्रु।पित्रादिनामान्यत्रादोसैत्धत्तान्य
तःपरां अन्यं स्वेतिवदन्तते लं दद्याद्दर्भे रनुक्रमात्।यथा महादेवश्चामे जन्यं स्वेति तथा जनं।अ
स्वेति वदन्दद्यात्पूर्वेणपितृनीर्थतः।एतद्वः पितरोवासइत्याद्यं मंत्रमीरयन्।दद्यात्पिंडेषु व
स्त्रांतेस्तत्र छेदमथापि वा।ऊर्णा सूत्रे कत्राकलं दर्भेणपितृतीर्थेतः।दानायदिपिंडानां पंचानां १२८

दूर्वेनाधिकः।नदान्ती पण्क्वोष्ठरस्थलामवामेथनावपेत्।अथैनानुपतिष्ठेतपितॄन् पिंडनिवा
सिनः।मंत्रैर्नमोवइत्याद्यैर्मनोन्वाहिमृचेनच।उद्वासयेदथपितॄन् पिंडस्थान्सकलानपि उच्चा
पनेस्ना घर्चयाम्यादिनिमनुवृज्य अग्नेतमद्याम्यामित्याभ्यां दक्षिणाग्निमनुव्रजेत्।वीरमेद
त्तमंत्रेणपिंडमादायमध्यमं॥९९॥पिंडं तं प्राशयेत्पत्नी माधत्तेत्यादि मंत्रतः।अप्सु वाग्निप्रणीते
वाथवितरेत्प्रक्षिपेद्द्वय॥१००॥अथहमादिनानावनेवयज्ञायुधानितु।द्वेद्वेएवास्पृजेनानिमि
छेसाधनेणनल्लिनि॥१०१॥ ॥अस्यार्थः॥ ॥ततोवीरंमेदत्तपितरइतिमंत्रेणमध्यमंपिंडंग
हीत्वाआधत्तेत्यादिमंत्रेणपत्नीप्राशयेदिति।एवंमध्यमपिंडविनियोगानंतरं प्रथमतृतीयावि
तरौतु अप्सुप्रक्षिपेत्।अथअग्निप्रणीतेऽग्नौ वाक्षिपेत्।अत्रपिंडपितृयज्ञे आसादिता
नांस्थाल्यादीनां द्वादशानां मध्ये बर्हिरिध्ममेक्षणेषु प्रतिपत्तिंगतेषु।विनियोगंगतेषु अवशि
ष्टानांनवसंख्यानांतेषामस्मिन्कालेउद्वासनं द्वयोर्द्वयोर्भवति।द्वयोर्द्वयोरुद्वासनेऽवशि
ष्टंविषमंकृत्वातृणंगृहीत्वानादृग्लक्षणंयुग्मतंसाधयित्वातदप्युद्वासयेदिति शौनकः।वी
रमेदत्तपितरइतिमंत्रंततोजपेत्।आधत्तपितरोगर्भमित्यामृचमुदीर्यतु।प्राशयेन्मध्यमंपिंडं

Indira Gandhi National
Centre for the Arts

पत्नीपुत्रप्रसूतयाप्रक्षिपेदित्तरावप्युप्रणीतेवोल्मुकेनले। यस्यवास्त्यन्नाविद्वेषः सप्राश्नीया
दुभाविभौ। अविकिल्स्यमहानोगग्रस्तोवानसयेदिमोरोगात्सुक्तिर्मनिर्दोनयनवेदन्यतराग
तिः। उपयुक्तावशिष्टानिपात्र। जिद्दं द्दमुद्धरेत्। द्दहानिरिक्तमेकंचेत् तत्क्षणेनसहोत्सृजेदिति
। इतिपिंडपितृयज्ञः। अथपार्वणश्राद्धविधिः। सर्वेषांश्राद्धानेदानीं दर्शश्राद्ध प्रकृतिकत्वा
दादौ तत्प्रकारो निरूप्यते। दर्शश्राद्धप्रकृतिकत्वं तु। श्राद्धं पार्वणवत्कुर्यादित्यनिहितत्वाद्द
र्शश्राद्धस्य पार्वणासंज्ञाकथमित्यपेक्षायां तत्रानांतपाकृतिरच्यते। दर्शश्राद्धंतुयत्प्रोक्तं पार्व
णंतेत्प्रकीर्तितमिति॥ ॥अथकारिका॥ ॥कुर्वीतपार्वणश्राद्धंदर्शेनदनिधीयते। कामयोगे
नवान्यस्यांतिथावित्यपरेब्रुवन्॥१०२॥ ॥अस्यार्थः॥ ॥अस्यपार्वणश्राद्धस्य सर्वश्राद्धानांप्र
कृतिरूपत्वात्तस्य स्वरूपं निगद्यते। तस्यकालमाह। दर्शेअमायांतदनिधीयते। पर्वणितवे
पार्वणमिति। तथाप्येकस्मिन्नेवपर्वणिअमायांचवतितोत्तयोः। कुतः अत्रैवपिंडपितृयज्ञ
स्य विधानाद्दर्शनात्। अमावास्यायामपराह्णे पिंडपितृयज्ञइतितत्रोनकापि। श्राद्धस्यपा
र्वणस्यायंप्रयोगः समुदीर्यते। तत्रानाहितवह्नीनांपार्वणंपूर्वमुच्यते। पर्वणिक्रियमाण १२९

त्वाच्छ्राद्धं पार्वणमुच्यते। प्रतिपत्संचदर्शयोर्यः संधिः पर्वेति कथ्यते। तत्संबंधात्संचदर्शी तत्स्मा
पर्वेतिकथ्यते। सामान्येऽपिचपर्वत्वे पंचदश्यौर्द्वयोरपि। या त्वेतयोरमावास्याश्राद्धकालोय
मित्यतइति। प्रकृतेतु अपरे कामनाविशेषादपितिथ्यंतरेऽपिपार्वणमाहुः। किंच। अघ्ये
त्रयसाध्यं त्रिपिंडसाध्यं त्रेपुरुषादेवोनक्रियमाणं रुद्धानत्पार्वणमिति। अतिघोषतत्रा
स्त्रविद्भिः। अथनिमंत्रणास्ययोग्यब्राह्मणकथनपूर्वकंनिमंत्रणप्रकारमाह। ब्राह्मणान्वेद
संपन्नान् दांतानूर्त्तानान् लोलुपान्। अक्रोधनानरोगांश्च पारंपर्यकुलनिस्पृहान्॥१०३॥ वि
हितानामनुष्ठातॄन् निषिद्धानांचवर्जकान्। एवंविधद्विजानांवेसत्वेकेनगुणेनवा॥१०४
युक्तानिमंत्रयीतार्दान् असद्गुणविवर्जितानिति। अस्यार्थः॥ ॥एवंविधान्ब्राह्मणान्नि
मंत्रयीतनिमंत्रयेदित्यर्थः। छांदसोयंप्रयोगः अन्यथा लिङ् परस्मैपदे निमंत्रयेदिति
स्यात्। उक्तलक्षणद्विजानावश्राद्धेनकार्यमितिनतर्कनीयं। एकेनवामहतागुणेनविशि
ष्टान्ब्राह्मणान्निमंत्रयेदित्याह। अविद्यमानेपिगुणातिशयेअसद्गुणराहित्यमन्वेषणी
यं। असद्गुणत्वंनामपंक्तिदुरावेधुर्यकारित्वं तद्विरहत्वमवश्यंसंपादनीयं। सुत्विनिमं

Indira Gandhi National
Centre for the Arts

त्र्यं देवे द्वौ त्रीन् वा विप्रान् पितृकर्मणि ॥१०४॥ देवे पित्र्ये च दैकैकं सपिंडीकरणं विना। सायमो
पासनं कृत्वा सायं तु क्षणवनो द्विजान् ॥१०५॥ उपगम्य स्वयं शिष्यः सुतो वा प्रश्रयान्वितः श्राद्धे
न विना तत्र न वह्निर्दीप्यतां क्षणः॥१०६॥ एवमामंत्र्य नियतो मनोवाक्कायकर्मभिः। नोत्कुर्वीत
यि तुष्येव ब्रह्मचर्यं मनः परमिति॥१०७॥ ॥अस्यार्थः॥ ॥शुचिः सन् कर्ता विश्वे देवस्थाने त्र्य
ल्पवयस्कौ द्वौ निमंत्रयेत्। पितृकर्मणि गुणाधिकान् त्रीन् निमंत्रयेत्। अथवा देवे एकं त्र्याण
म पि पित्रादीनां स्थाने प्रत्येकं एकैकं देवानां सपिंडीकरणं तु एकैकपक्षो नैव युज्यत इति।
सायंकाले संध्योपासनपूर्वकं औपासनं कृत्वा कर्मांगं द्विरात्मप्राणानायम्य तिथ्यादि
स्मृत्वा आग्नेयीमुखः प्राचीनावीती अस्मत्पित्रादीनां श्राद्धं श्वः करिष्यामीति संकल्प्याथ वि
निमंत्रणार्थं गच्छेत्। यदि दर्शश्राद्धमायाति तत्र निमंत्रणसंकल्पसमये अस्मत्पित्रादीनां
तथा मातामहादीनां च पार्वणश्राद्धं पिंडपितृयज्ञसहितं श्वो दर्शे करिष्ये। सायं तु क्षणवनो द्वि
जान्। क्षणदानानंतरं भोजननिषेधात्। उक्तपूर्वाह्ने च निमंत्रयतीति नियम्य तानेषां निवास
स्थानमुपगम्य निमंत्रयेदिति। तदेवाहात्रेयः प्रथमेह्नि निवासस्थानं श्रोत्रियादीन्निमंत्रयेत् १२०

कथयेत्तु न दैवे षां नियोगं पैतृदैविकमिति। प्राधान्येन कर्तुरेवायं विधिः। अथवा केनचिद्दनुरोधे
न स्वस्य नावकाशः तदा निमंत्रणार्थं प्रतुष्प नयपरः शिष्यः शिष्यः प्रेषणीयः। अथवा विनयान्वि
तः पुत्रो वा प्रेषणीयो भवति। तत्र स्मृतिपुराणोक्तनिमंत्रणप्रकार उच्यते। ब्राह्मणस्य दक्षिणं जा
न्वालभ्य त्वया मे श्राद्धं तत्र भवद्भिः क्षणः प्रसादः क्रियतामिति निमंत्रयेत्। एवमुक्त्वा स्वयं वा
वा मनसा कर्मणा नियंत्रितः सन् निमंत्रयेत्। पुराणेपि। दक्षिणं जानुमालभ्य त्वं मया त्र निमं
त्रित इति। निमंत्रणस्मृतिपुराणोक्ता अन्यापि विशेषा लिख्यंते। निमंत्रणे दिक्कुनियमः स
व्येन प्राङ्मुखो देवानुदङ्मुखो निमंत्रयेत्। आग्नेयीदिङ्मुखः पित्र्यान् प्राचीनावीती कुर्याद्
इति बृहस्पतिः। उपवीती त्वनुगम्य दैवतीर्थे द्विजानमान्। अपसव्येन पित्र्ये च स्वयं वि
प्राथवा सुतः। पूर्वेद्युः निमंत्रणसमये केनचिदनुरोधेन निमंत्रणकालातिक्रमे अपरेद्यु
रपि कर्तव्यं तथाप्यस्मृत्यंतरे। पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते। निमंत्रयेत त्र्यवरान् स
म्यग्विप्रान्यथोदितानिति। तत्र ब्राह्मणसंख्या माहाचार्यैः। द्वौ दैवे पितृकार्ये त्रीन् एकैकमुभ

Indira Gandhi National
Centre for the Arts

यत्रवेति। उद्ववरिष्ठोपि श्राद्धद्वयं करिष्यंस्तु दत्तावाप्यतुरोपि वात्रीनुवानिमंत्रयेद्विप्रान् एकं वा
ब्रह्मवादिनमिति। तदनेकब्राह्मणाभावविषयं। बृहस्पतिः। यद्येकं भोजयेच्छ्राद्धे छंदोगं तत्र भो
जयेत्। ऋचो यजूंषि सामानि त्रितयं तत्र विद्यते। सायणीय। ऋचानुनल्पनुपिनापजुषानुमर्ह
पिनुः पिनामहः साम्ना छंदोगोभ्यधिकस्ततइति। पात्रविषये अनुकल्पमाहात्रायेः। स पिता
सात्राणामलाभेतु पात्रभूतान्स्वबांधवान्। कृतोपकारिणश्चापि श्राद्धे पूजितुमर्हति। मातुल
भागिनेयश्चजामातास्वस्त्रियस्तथा। सुहृच्चश्वशुरः स्यातः संबंधी ज्ञातिरेवच। नियतादोष
निर्मुक्ता गुणैश्चान्यैः समन्विताः। अनुकल्पवर्जनीयास्युः बांधवाश्चोपकारिणइति। निमंत्रण
समये कर्त्तात्वेवं वदेत्। नवद्भिः श्राद्धकार्येन संपाद्यं च प्रसीदथ। अभ्यर्थ्येनियतान्विप्रान्कर्त्ता
त्वेवपुनः पुनः। सर्वायससविनिर्मुक्तैः कामक्रोधविवर्जितैः। भवितव्यं भवद्भिर्नः श्वोनतेश्रा
द्धकर्मणि। एवं निमंत्र्य नियमान् श्रावयेत्पैतृकान्बुधः। अक्रोधनैः शौचपरैः सततं ब्र
ह्मचारिभिः भवितव्यं भवद्भिश्च मया च श्राद्धकर्मणि। अतः परं कारिकार्थः। भोक्तुं भोजयितु १३१

एवं निमंत्रितानां ब्राह्मणानां श्राद्धकर्त्तुश्च निमंत्रणानंतरं ब्रह्मचर्यं विहितं। तथा च मनु
ः। निमंत्रितो द्विजः पित्र्ये नियतात्मा भवेत्सदा। न च छंदांस्यधीयीत यस्य श्राद्धं च तद्दिने। त
तः कर्त्ता विप्राश्चोक्तान्नियमान्पालयेरात्रिं नीत्वा अपरेद्युः स गवे स्नात्वा स्वयं च कृतमध्याह्नि
कक्रियः सत्कर्म कुर्यात्। स्वयं तदेव कथयति। कृते आधानपर्यंतं पिंडपितृयज्ञं निमंत्रितान् ध्यायन्
मुमेने पितर इति नात्युपवेशयेत्॥१०८॥ अर्चयित्वोपविष्टो नु दैवे स्मृत्युक्तमार्गेन इति। अस्या
र्थः॥ ॥ अत्र एकाग्निविषये पिंडपितृयज्ञस्य दर्शश्राद्धस्य च तयोः सहैवानुष्ठानात्सकः प्रयो
गइह कारिकायां निगद्यते। तथा सति श्राद्धकाले प्राप्ते ब्राह्मणान्समीपस्थान्कृत्वा इध्महो
मांतं पिंडपितृयज्ञं पूर्वोक्तप्रकारेण करोति। अत्र संकल्पस्त्वेवं करोति। पूर्वं तिथिश्रवणं
तं कृत्वा पिंडपितृयज्ञसाहित्येन प्रतिज्ञातं दर्शश्राद्धं करिष्य इति प्रतिज्ञाय इध्महोमांतं क
रोति। अनंतरं प्राचीनावीती श्राद्धारंभं कुर्यात्। तत्र स्मृत्यंतरोक्तं किंचिल्लिख्यते। तत्र बृ
हन्नारदः। निमंत्रितेषु विप्रेषु मौलिनेषु द्विजोत्तमः। प्रायश्चित्तविशुद्धात्मा तेभ्योऽनुज्ञां स
मादरेत्। दद्याद्ब्रह्मदंडार्थं हिरण्यं कुशमेव वा। श्राद्धार्थं समुपन्नानां विप्रान्भूयो ग्रहण

Indira Gandhi National
Centre for the Arts

न्।तदुक्तमापस्तंबधर्मे।पूर्वेद्युर्निवेदनमपरेद्युर्द्वितीयंतृतीयमामंत्रणंविप्रायोत।ब्राह्म
णानुज्ञानंतरंयजमानकर्त्तव्यंप्रदर्शयेन।तथात्वस्मृत्यर्थसारे।निधिवारादिकंस्मृत्वासंक
ल्पंचयथाविधि।प्राचीनावीतिनाकार्यंसर्वंसंकल्पनादिकं।तस्पूर्वंबंधकंब्रूयात्नामगो
त्रतिला।न्वितोवस्त्रादिरूपतांवापिरवपितॄणामनुक्रमादिति।निमंत्रितान्स्नातानस्नातपक्षे
वानाचांतान्उपवेशयेत्।निमंत्रितानित्यनेनअपरेद्युर्निमंत्रणद्वयस्यसूचितंस्नातानावितिब
स्नानंकर्तुंनिवेदितंतैलं।द्वर्त्तनोदकनिष्पन्नंज्ञातव्यं।इतरथास्नातानितस्यपदस्यवैय्य
र्थ्यंप्रसज्येत।कुतः।सर्वेषांब्राह्मणानांप्रातर्माध्याह्निकस्नानद्वयमंतरेणभोजनाधिकारएव
नास्ती।निमंत्रितपूर्वकंश्राद्धदिनेब्राह्मणानांतुअवश्यंयजमानेनतैलोद्वर्त्तनादिनास्नानंकार
यितव्यं।तथाचदेवलः।तैलमुद्वर्त्तनंस्नानंपानीयंचपृथग्विधं।पात्रैरौदुंबरैर्दद्याद्वैश्व
देविकमित्तिमात्कृउयः।तथाऽऽहुःषण्मुहूर्त्तेषुगतेषुतथतान्द्विजान्।प्रेसकंप्रेषयेत्प्रेष्यान्
प्रदायामलोदकमिति।एतदामलककल्कप्रदानंप्रतिषिद्धतैलासुतिथिषुद्रष्टव्यं।स्वगृह्
व्याहूयअलंकारपूर्वकंस्नानंकारयितव्यमित्यर्थःसंग्रहे।श्राद्धकालसमाहूतानलंकु १३२

र्वीतान्द्विजान्।तमश्रुकर्मनीरस्नानसधूपांजनभोजनैरिति।तथैवात्रस्नातपक्षेवानित्य
त्रथ्याप्रसर्पणजनितदोषनिराकरणार्थंपादप्रक्षालनंसत्तकार्यमेवतथापिकुत्रासन
तिलचर्विनद्वारप्रदेशात्स्वितेस्मृत्युक्तप्रकारेणगोमयनिर्मितमंडलेअवटेवाकुशास
नतिलपुष्पोदकैःयथासंनवदेसमंत्रंयजमानहस्तब्राह्मणपादप्रक्षालनमभिहितं।शूद्रपा
दत्वेअत्रनियमेनपश्चात्त्वंकार्यमित्यर्थः।तत्रमंडलकरणप्रकारस्थानप्रकारमाहतुः।सं
मार्जनापलिप्तभूषुद्वारिकुर्वीतमंडलं।उदक्त्रचतुरस्रंस्याद्दक्षिणंदक्षिणाप्लवं।उत्तरेस्म
तसंयुक्तान्पूर्वाग्रान्विन्यसेत्कुशान्।दक्षिणेदक्षिणाग्रांस्तुसतिलान्विन्यसेद्द्विजः।मं
डलप्रमाणमाहसंग्रहे।प्रादेशमात्रंदेवानांमंडलंचतुरस्रकं।वितस्तिमात्रंपित्र्येतुमंड
लंवर्तुलंभवेत्।यज्ञोपवीतीदेवार्थेपित्रर्थेचापसव्यतः।अंतरंतुप्रकुर्वीततयोर्मध्येषडं
गुलमिति।अत्रद्वंद्वंपूर्वनिमंत्रितक्रमेणपादप्रक्षालनंकार्यं।तत्रान्वयः।स्मृतिब्रह्मनिरु
कपाः।पादंत्वेवतथैवार्घ्यंदेवत्राद्योप्रयोजयेत्।शान्नोदेवीतिमंत्रेणपादंत्वेवप्रदापयेत्।
निमंत्रितक्रमेणवश्राद्धविधानंसमन्वयेत्।पादप्रक्षालनादौश्चेति।तत्रकर्त्तुर्दिङ्नियमः।

Indira Gandhi National
Centre for the Arts

सायनीय।दिवावायदिवारात्रौनकुर्यात्प्राङ्मुखःशुचिः।प्रत्यङ्मुखस्तु कुर्वीत विप्रपादावनेज
नमिति।एतत्सित्वब्राह्मण विषयं॥ ॥अन्यथा व्यासवचनेन विरोधः।तथाच वचनं।विप्रा
णां क्षालयेत्पादान् देवत्वेपुरोमुखः।पितॄणांक्षालयेत्पादान् तथा प्रत्यङ्मुखः शुचिः।नचै
वात्र आचांतानित्य त्रापि आञ्चगानुप आच मनं तु कर्मांगतया बहुवारं संभवति।तथाप्यत्रक
र्तृनिवेदितोदकेन यत्कृतमाचमनं तदत्राभ्युनेतं।तथाच संग्रहे दिङ्नियमकथनपूर्वकमाच
मनमाह।मंडलस्योत्तरे भागे विप्रस्याचमनक्रिया।आचमनं सपि वभागंतु धीरं दक्षिणतः पुनः
दत्व मनंबारद्वयं कर्तव्यमिति।द्विराचमंतित विप्रतित विप्रा इति।किंच तेन भोजनार्थं श्राद्धां
गं वा द्विराचामेयुरिति हेमाद्रिकारः।यजमान प्रक्षालितपादान् एवं विधानेनानुपवेशयेदिति
तत्रोपवेशनप्रकारमाह।द्वौदैवादिति।दैवविप्रौ देवस्थाने प्राङ्मुखौ पितृस्थाने उदङ्मु
खान्त्रीन् विप्रान् एनममपितर इति प्रायेणुपवेशयेत्।नाना समागतानां द्विजउपवेशने स
सनेष्विति शेषः।चंदिकायां।दत्ते पाणिद्विराचम्य लघुवा सजितेन्द्रियः।परिश्रितेषु चोदगा
गोमयेनोपलेपिते।दक्षिणाप्रवणे सम्यगाचांतान् प्रयतान् शुचीन्।आसनेषूपसर्वेषु वि १३३

विक्तेषूपवेशयेदिति।अत्र मत्स्यार्थवायं।देवार्थे न प्रकाराणोक्त इति कृत्वा स्पृष्ट्वैको मार्गेण
कार्ये इति स्वयमेव कारिकाकार आह।अन्ये पितोपवि ष्टा विति।विश्वेदेवस्थाने उपविष्टे
विप्रो स्पृष्ट्वैक प्रकारेणार्थ्यं पित्र्यर्थेन कुर्यादिति।अथ स्पृष्ट्वैकार्थेन प्रकार माह कात्यायनो।
कात्यायनः।सव्येन वासनं धृत्वा दक्षिणं दक्षिणं करं।ॐ नमो वस्त्वस्ति त्वा आसनेषूपवेशये
त्। समाप्य मिति वेत्वा दक्षिणेनास्तु संस्पृशेत्।अस्यतामिति तानात् ब्रूयादासनं संस्पृशन्।
न पिस्पृशेत्तरापृथक् पृथक् वासनेषु तिलान् तेलेन दीपकाः।अविच्छिन्नास्तथादयास्तेनुरक्षा
र्थे द्विजैः।स्कंदपुराणे पि।नत्राप्याः प्रतिद्विजं दीपाः स्वनसत्रजवर्त्तयः।अन्येन माहिषणापि
आज्येन कृततेजसा।अथ संकल्पमाह वायवीये।प्राणसंयमनं कृत्वापि तत् पंजरमास्तेर्णाति
ष्वन् तिलान् कुशानावत् प्रक्षिपन्मंत्रमुच्चरन् आसनायं मंत्रः।अग्निष्वात्ता बर्हिषदः आज्यपा
सोमपास्तथा।रक्षंतु सर्वे देवानस्य यमरक्षा।संग्रहेपि।अग्निष्वात्ताइमं मंत्रं पठ
न् पूर्वादिषु क्रमात्।सिद्धार्थकान्तिलान् दर्भो विकिरन्नाद्र्र्नमिषु पिंत पंजरमित्याद्दरे
व विकिरणं हियत्।संग्रहे।उत्तोहस्तौ समौ कृत्वा जानुनोरंतरे स्थितौ।नमस्कारांजलिः

Indira Gandhi National
Centre for the Arts

पृष्ठेदुपविष्टान् द्विजोत्तमान्। श्राद्धं करिष्य इत्येवमनुज्ञातस्ततः परम्। विधानं च पुरः कुर्याद्यथा
गृह्यमनुक्रमात्। संग्रहे। इदं करिष्य इत्युक्त्वा तिलानपहता दिना। विकिरेज्जलसंयुक्तान् द्वा
रदेशोपसव्यवत्। तत्रायं मन्त्रः। ॐ अपहता असुरा रक्षांसि पिशाचा ये क्षयन्ति पृथिवीमनु।
अन्यत्रेतो गच्छन्तु यत्रैषां गतं मनः इति मन्त्रं पठन् द्वारदेशादिसर्वत्र तिलान् विकिरेदिति। स्मृत्यर्थ
सारे। अपहता इति सर्वतः तिलान् विकीर्य दीरनामित्यस्याप्रोक्षेत्। श्राद्धभूमिमिति शेषः।
पराशरः। नमो देवेभ्य इति मन्त्रेण गायत्र्या च प्रयत्नतः। प्रोक्षयेत्तेन सर्वं श्राद्धद्रव्यादिशुद्ध
या अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचि
रिति। श्राद्धभूमौ गयां ध्यात्वा ध्यात्वा देवं गदाधरम्। पितॄंश्च विप्रपूजनं मारभेत्। तत्रैव नाः देवानां कुशजा
दर्भाः प्रदातव्याः पृथक् पृथक्। धर्मोऽसि इत्यनेन मन्त्रेण गृह्णीयुः सुक्तेनाक्रमेण। तत्र मन्त्रः। धु
र्मोऽसि विराजा प्रतिष्ठितः इत्यनेन यजुषा वैश्वदेविकब्राह्मणा एवं गृह्णीयुः। विश्वे देवास इत्यनेन
नारायणः। उदङ्मुखोपविष्टो वा उपवीती समाहितः। निपात्य दक्षिणजानु विपरीतं तु पैतृके १३८
तत्र क्रममाह याज्ञवल्क्यः। पाणिप्रक्षालनं दत्त्वा विष्टरार्थं कुशानपि। प्रथमतः विप्रहस्ते उ

दकं दत्त्वा आसनार्थं कुशानपि दद्यादित्यर्थः। संग्रहे। ऋजून् दर्भान् समादाय सजलान् स
यवांश्च तान्। उदगग्राणि भूमिनि दद्याद्दक्षिणपार्श्वतः। तो देवविप्रेउदगग्रेषु तेषु कुशेषु
उपविशतानिति जयन्तः। ततः वरणविधानमुक्तं मीमांसकेन। दर्भान् आदाय हस्तान् पाणिं गृहीत्वा
दक्षिणकरे। देवक्षणः क्रियतामिति सांगुष्ठं करं ततः। गृहीत्वा प्रेषमुक्त्वा तु क्षणं कृत्वा ततो द्वि
जाः। ॐ तथेति प्रतिब्रूयुः प्राप्नोतु भवानिति। कर्त्ता ब्रूयात्ततो विप्राः प्राप्नुवानीति वै वदन्
पराशरः। यवहस्तस्ततो देवान् विज्ञाप्यावाहनं प्रति। ततः सव्यं करं न्यस्य विप्रदक्षिणजा
नुनि। देवानावाहयिष्यामि इति वाक्यमुदीरयेत्। गोभिलः। ॐकारं प्रथमं कृत्वा प्रश्नवाक्यं
ततोऽनुवदिति। याज्ञवल्क्यः। आवाहयेदनुज्ञातो विश्वेदेवास इत्यृचा। गौतमः। सयवं पुष्प
मादाय चरणादि शिरोन्तकम्। अर्चनं तेषु सर्वेषु कुर्यादिति वचोदकं तथेति। अनेन प्रकारेणैव सं
तं पाणावारभ्य पादान्तं दक्षिणां गात्रमूर्द्धनि। देवानामर्चनं सव्यं ह्यपि तु पुरस्तात्
मिति। अस्यायमर्थः। पाददेशाद्दक्षिणाज्जानुनि सव्यजानुनि दक्षिणांसे सव्यांसे शिरसि च
क्रमेण यवपुष्पैः स्वयं पश्चात्। अथ विप्रेष्वधिष्ठितान् विश्वान् ध्यात्वा उपस्थानं कुर्यात्। स्मृतिच

Indira Gandhi National
Centre for the Arts

द्विकायां॥ आग्रणे प्रागतान् ध्यात्वा विश्वान् देवानन्तनरं। विश्वेदेवाः शृणुतेमं हवं त्विमयापरः।
अथार्घ्यपात्र विधिः। अष्टांगुलं नवेत्पात्रं पितॄणां रजतं शुभं। दशांगुलं तु देवानां सौवर्णं वा
स्रुवादिनां अलाभे यथासंभवं यज्ञियवृक्षसंजानि पलाशपत्रपुटादीनि वा अर्घपात्राणि नवं
नीनि संग्रहकारः। त्रिमलपः। राजतानि प्रशस्तानि पित्र्ये हेमानि दैविके। अपि वा नार्घपात्राणि
पित्र्ये दैवे च कर्मणीति। तत्र आसादनप्रकारः स्मृत्यन्तरे। अथ दर्भो नामास्तीर्य प्रागग्रान् समवा
नुविन्यस्थापयेदर्घ्यपात्रे द्वे नु सुक्तेन तत्र कुशान् परि। द्वे द्वे पवित्रे विधिवत् तृपात्रयो रुपरि क्षिपन्।
तूष्णीं प्राङ्मुखं न स पात्रं कुर्याद्द्वे विले वनाः परयेत्सात्र युग्मं तु पवित्रं तन्हि तं च तत्। स्नुवि
चानि मतेपि। द्वे द्वे पवित्रे देवानां पात्रे कृत्वा पयः क्षिपेत्। तत्र पवित्रकरणमाह प्रयोग याज्ञवल्क्य
ः। पवित्रकारये द्वे द्वे पवित्रस्थे निमंत्रतः। अग्रं न कुशाच्छिन्ने कोना प्रादेशमात्रमेतदिति कुशा
च्छिन्नं कुशा मंत्र धौतं पवित्रस्थ इति मंत्रेणाङ्गुष्ठांगुलिपर्वणोः छित्वा पात्रयोर्निक्षिपेत्। प
यः क्षेपणमंत्रमाह याज्ञवल्क्यः। शन्नो देव्या पयः क्षिप्त्वा यवासीति यवान्नतथेति। स यद्वा १७५
गंधपुष्पाणि तूष्णीं तु प्रक्षिपेत्सात्रयास्ततः। स्मृत्यर्थसारे। गंधपुष्पाणि। क्षेप्यास्वाहा धो

इति निवेद्य अर्घपात्रस्थितं पवित्रं विप्रहस्ते दद्यात्। आचार्यः प्रागग्रं दक्षिणे पाणौ कु
र्वे संस्थाप्य वार्वयदिति। नारायणः। दत्वा हस्ते पवित्रं तु कृत्वा पूजां च पादतः। आस्यं यवे
पुष्पैरनुमरत्न को तं वपूर्वं वत्॥ ॥ततो घदानं॥ ॥ब्रह्मपुराणे॥ ॥ततः सव्यवामहस्तेन गृहीत्वा
मसान् क्रमात्। तूनोयं दक्षिणे कृत्वा देवतीर्थेन दापयेत्। या दिव्या इति मंत्रेण हस्ते त्वर्घ्यं विनि
क्षिपेत्। केचिदर्घ्यपात्रेणैव देयमिति वदन्ति तं निमूलत्वादुपेक्षणीयं। अपि च निषेधश्रवणात्।
अतएव न तत्। अर्घ्यो पिंडप्रदानं च रत्नरूपसव्यं तथैव चा। गंधपुष्पादिकं सर्वं पात्रेष्वेव न दाप
येदिति। एवमर्घ्यदानानंतरं गंधपुष्पधूपदीपाच्छादनादि निर्देवविप्रपूजनं कृत्वा कृतांज
लिः सन् आसनादुपस्थारः सर्वे संपूर्णा नं वातिनिनो प्रकल्प्य आर्त्वेन विधेः स्वार्थेन मरुद्
व्यनातिरिक्तं सर्वं विधिवदस्तु। यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं संपूर्णतां
यातु सद्यो वंदे तमच्युतं। इत्युक्त्वा युष्मदनुज्ञया पित्राद्यर्चनं करिष्य इति संकल्प्य पित्रादी
यमुपवेश्य आग्नेय्यां मुखः पितृकर्म कुर्यात्। न्यायपदेशः कथिताः पिंडयज्ञे जीवमृतान् प्रति।
॥१०६॥ श्राद्धस्विदिनव्यास्तोपसादत्याह तन्निकृत्। प्राचीनावीत्यथो दद्यात् पितृकर्म(णि)यनु(।)

(ये पक्षाः कथिताः पिंडयज्ञे जीवमृतानां प्रति) प्रदक्षिणमिति॥११॥ अस्यार्थः॥ ॥जीवमृता
नां पिंडनिर्वपणमधिकृत्य ये पक्षा उक्तास्ते श्राद्धेपि ज्ञेया इति वृत्तिकारः। तत्र मतेन्यः पिंडदाने
॥जीवत्पः प्रत्यक्षेणैव तद्धस्ते पिंडं दत्वा तेन सक्षणं कुर्युरिति। अथ जीवाद्व्रीनस्त्वाहांतमेत्र्रण
अग्नौ होमं इतिवाइत्यादिपक्षाः पिंडपितृयज्ञोक्ताः इह श्राद्धेपि प्रत्येतव्या इति। अर्थापत्र थ्रत्रा
ह्मणपूजा विधीयते। तत्र प्रथमं विप्राणां हस्ते प्राचीनावीती उदकं दद्यादिति। सर्वं पितृक
र्म अप्रादक्षिण्येन भवति। तथैव सर्वं कर्म आग्नेयीमुखः कुर्यादिति वृत्तिकारः। दर्भान्द्वि
गुणभुग्नांस्तान् दत्वैवमासनेषु तु। अपो दत्वाथ दर्भेषु पात्राण्यासादयेत्ततः इति॥११॥
अस्यार्थः॥ ॥ततः हस्तउदकदानानंतरं द्विगुणभुग्नान् दर्भान् तेषां आसनेषु वामभागे दद्या
ति। तेपि ब्राह्मणाः दक्षिणाग्रेषु दर्भेषु पविशंतीति। तेज यं [illegible] नियम [illegible] आसन
यासनं दद्याद्धोमवा द [illegible] पि वा पितृकर्मणि वामे च दैवकर्मणि दक्षिणे। आसनानंतरमपि
पुनर्विप्रहस्ते उदकं दत्वा आग्नेयीं संस्थाप्य दर्भानास्तीर्य अर्घ्यपात्राण्यासादयेदित्यर्थः। अत्र ११६
स्मच्छाखीयानां पितृब्राह्मणसमीपे उपविश्य आग्नेयीमुखः पितृकर्म कुर्यात्। शाखांतरेतु

दक्षिणामुखेन पितृकर्म भवति। तत्र पितृकर्मणि क्रमविधायकं श्रोत्रसूत्रं। अपः प्रदाय दर्भान्
द्विगुणभुग्नान् आसने प्रदायेति। यदुक्तं कारिकायां तदस्मत्सूत्रे वक्तंत इति प्रदर्शितं। व्या
सोपि कुशानास्तु पंचसम्यान् [illegible] तिलान् द्विगुणीकृतान् आस्थाह [illegible] पितॄणां तु वामभागे
प्रकल्पयेत्। संग्रह। आसनानंतरं दद्या दद्यो इत्येवं न परमिति। अनंतरं दक्षिणाग्निविधानं
स्म[illegible]नंतरं। दर्भानादाय हस्ताभ्यां गृहीत्वा दक्षिणकरेण अस्मिन्श्राद्धे क्षणः कार्यमेनंमे त्रामिति
[illegible] गृहीत्वांगुष्ठमनं [illegible] पित्र्यविप्रान्निमंत्र्यवा पित्र्यायेन [illegible] केवलमंगुष्ठग्रहणमेवादे
विकेगुनिरंगुष्ठकरग्रहणं विलक्षणं तु न तत्रैवाक्तं। ततः क्षणाच्छिद्रनेश्रानप्रतिवचनं च
पूर्ववद्भवति। अत्र श्राद्धे देवपितृवरणे दक्षिणसव्यजानुनिपाता नियमेन कार्येइति। तथा
च कर्मप्रदीपः। दक्षिणं पातयेज्जानुं देवान्परिचरन्सदा। पातयेदितरं जानु पितॄन्परिचर
न्नपि। अनंतरमावाहनं स्मृत्यंतरात् अपसव्यं ततः कृत्वा तिलानादाय मंत्रतः। पितॄनावाहयामी
त्युक्ते द्विजानुद्द्युत्खानु। आवाहयेदनुज्ञातः उशंतस्त्वेत्यूचा पितॄन्। नमो वः पितर इषइत्या
दिमंत्रेण तिलपुष्पाणि शिरसि स्वांसदक्षिणासं सव्यजानुनि दक्षिणजानुनि सव्यपदेद

Indira Gandhi National
Centre for the Arts

क्षिणपादस्वप्रत्येकमारोपयेत्। तथाच प्रचेताः। वीरः प्रचनिपादांतेनमोवदनिपैत्रकमिति। ततः
संग्रहे। ब्राह्मणोष्टागतानुच्चालापितृत्सम्पकृसमाहितः। जपेदायंतुनइतेसमुत्थायकृ
तांजलिः। इमंमंत्रं तिष्ठन्नजपेत्। अथार्घ्यविधिः॥ ॥तैजसरूममयेपात्रे मृन्मयेनार्हितः कु
र्यात्। एकदम्येषुवाग्नेयदिक्संस्थेषुततःपरं॥१२॥ निक्षिप्यापानुमंत्र्यचोनाम्नादवीरनि
श्चयान्‌अनुमंत्रःसहकार्यः तिलोसीसावपत्निलान्। आचान्तःप्रतिपात्रंस्यान्मंत्रवयं(न्)
(वति। तैजसंरजतनिष्पन्नापिपित्र्यर्थं अरमममयंकाश्मीरादिदेशजन्यस्फटिका) स्यादस्तानं
च्यते। गंधपुष्पाणितेनेषुपात्रेषुप्रक्षिपेदर्घ्यनि॥१३॥ ॥अस्यार्थः॥ तैजसादिमयंपित्रादी
नां पात्रत्रयंभवति। तैजसंरजतनिष्पन्नपित्र्यर्थंअश्ममयंकाश्मीरादिदेशजन्यस्फटि
कादिमयंपितामहार्थंमृन्मयंगंगादितीर्थोद्भवमृत्तिकाघटितंप्रपितामहार्थं। आग्नेय
दिग्भागस्थ आग्नेयदिगग्रपात्रत्रयं। आदौपितृपात्रंतदग्रेपितामहपात्रंतदग्रेप्रपितामह
पात्रं। संग्रहात्तैजसंप्रथमंपात्रं द्वितीयंचाश्मजंभवेत्। तृतीयंमृन्मयंप्रोक्तमेकद्रव्याणि १३१
नानिवेति। पक्षद्वयमुक्तं। इदमत्रगह्यं तैजसाश्ममयमृन्मयेषुत्रिषुपात्रेष्वेकद्रव्येषु

वेति। तत्रमृन्मयंपात्रंकुलालचक्रनिष्पन्नंनैवग्राह्यं। तथाचस्मृत्यंतरे। कुलालचक्रनिष्पन्न
मासुरंमृन्मयंभवेत्। तदेवहस्तघटितंपित्र्यकर्मणियोजयेत्। आसुरेणतुपात्रेणपित्रर्घ्यंनैव
कारयेत्। पात्रपरिमाणमपितत्रैव। अष्टांगुलंभवेत्पात्रंपितॄणांरजतंशुभं। द्वात्रिंशांगुलंतुदेवानां
सौवर्णंपञ्चवादिनः। एवमुक्तलक्षणपात्रत्रयेतष्णीमेवउदकंप्रक्षिप्यपात्रत्रयेसकृदेवशंनोदेवी
देवीरभिष्टयइत्यादिमंत्रेण अनुमंत्र्य अनुमंत्रणंनामपात्रत्रयाणामपिसकृदेवनिरीक्षणंत्रा
क्पतान्। अनुमंत्रणानंतरं तिलोसीत्यादिमंत्रेणप्रतिपात्रंमंत्रावृत्त्यातिलांश्चप्रक्षिपेत्। पितृपिता
महप्रपितामहपात्रयोः पितृनाव्दृस्यानुहोनकर्तव्यइति। तष्णीमेवगंधपुष्पादिकंपात्रेषुनि
क्षिप्यनिवेदयेत्। स्वधार्घ्यइत्ययोस्तनाउपवीतीनिवेदयेत्। अन्याआपःप्रदानव्याविप्रपाणि
ष्वतःपरं॥१४॥ अर्घ्यंसदोषमादायदक्षिणेनतुपाणिनासव्यहस्तगृहीतेनतिनयेत्पितृती
र्थतः॥१५॥ त्रिर्जैः पितरइदंतेअर्घ्यमितिपाणिष्वनुक्रमात्। दत्वादत्वानिनीनारत्नायादित्याश्वी
नुमंत्र्यतु॥१६॥ पितृपात्रेप्रसिच्यार्घ्यशेषंपात्रद्वयस्थितं। अनतिपुत्रकामस्तेसुखमेकीश्ननेजे
ले॥१७॥ त्रिविलंपितृपात्रंरपादासमाप्तेर्नवालयेत्। उत्तानंवात्तनीयनपिहितंतत्रचाल

Indira Gandhi National
Centre for the Arts

येदिति॥११८॥ ॥अस्यार्थः॥ ॥एतावत्पर्यंतमपसव्येन कृत्वा इदानीमुपवीती भूत्वा स्वधार्घोदकमिति मंत्र
पात्रात् अर्घ्यस्थाः आपो निवेदयेदिति। निवेदनं नाम दानयोग्यकरणं। न तु दानं। दानस्य उत्तरत्र वि
धानदर्शनात्। अधुनोपवीती त्वादिति हेतुनिर्देशाद् इतः आरभ्य आ गंधमाल्यादिदानाद्य
त्तोपवीतिना कार्यमिति निगूढो विदः। इतरस्य सव्यपाणे रंगुष्ठांतरेणार्घ्यं प्रयच्छेत्। उपवीत
त्वाद्देनोः। पित्र्येनाव प्राचीनावीतिना भाव्यमप्यवापूर्वीती तस्मादिसर्थः। येन पाणिना कर्मक
रोति दक्षिणेन वा सव्येन वा तस्मिन्नंसे यज्ञोपवीतं निधाय तत्प्राचीनावीती। अत्रोपवीतित्वात् प्राची
नावीतीतरांसि धार्यः सव्यपाणेः पितृतीर्थेन दानव्याप्ते सर्थः। अथवा सव्यपाणेः तिष्ठेत् गर्हित
त्वात् दक्षिणं पाणिनागृहीत्वा दक्षिणेनैव पाणिना उपवीती एवार्घ्यं प्रयच्छेत् इति नारायणकृ
तागृह्यव्याख्या लिखिता॥ ॥अतः परमापो निवेदनानंतरं विप्रपाणिषु हस्ते ५ सु अर्घ्यं पथ्र्ये मन्यज
लं दत्वा सव्योपगृहीतेन दक्षिणेन पाणिना सत्रेषमर्घमादाय पितृतीर्थेन। विप्रपाणिषु निन
येत्। पितरिदं ते अर्घ्यं पितामहेदं ते अर्घ्यं प्रपितामहेदं ते अर्घ्यमिति अर्घ्यं दत्वा विप्रहस्तां १२८
जलिना आपः पतनावसर एव या दिव्या इति मंत्रेणानुमंत्रयेत्। शौनकः। या दिव्या आप

इत्यादि मंत्रमुच्चार्य पैतृकं। आपो अनुमंत्रयीतास्य पाणेः प्रभुवती महीमिति। पाणेः सकाशान्म
हीं प्रभुवतीः पतः अनुमंत्रयेदिति। त्वचन्मिप्रारंभं तु विप्रहस्तास्थितं तादृशमुदकं गलत्स
दंतरालस्थितं या दिव्या इति मंत्रेण अनुमंत्रयेदित्यर्थः। अत्र केचित्तु विप्रहस्तगलितमुदकं
भूमौ पात्रांतरे कुर्वंति। तत्सारवांतरविषयमवगंतव्यमिति। अथ पात्रद्वयस्थितमर्घ्यशेषं प्रथ
मपात्रे प्रक्षिप्य तेनोदकेन कौञ्हनैः। पुत्रकामः स्वमुखं सिंचेदिति। प्रथमं पितृपात्रं न्युब्जबिलं कु
र्यादिति। अधोमुखं कुर्यात्। अथवा ऊर्ध्वबिलं कृत्वा तृतीयेन प्रपितामहपात्रेण छादयेदिति
आश्राद्धसमाप्तिपर्यंतं न मनसा पात्रं चालयेदिति। स्थानांतरं नैव नयेत्। अत्र पात्रस्य न्युब्जबिलत्वा
नमकाद्दिष्टविषयमिति केचित्। पार्वणादौ तु उत्तानं प्रथमं पात्रं तृतीयपात्रेणाच्छादितं कर्त
व्यमित्ययमेव पक्षः साधीयान्। अत्र स्थापनदेशस्तु पित्र्याणां वामभाग इति कात्यायनादयः।
अपरे आश्वलायनादयः पिंडार्थमास्तृतेषु बर्हिषि तत्समीपकुशेषु दक्षिणाग्रेषु स्थापयेत्
ब्राह्मणानामग्रत उत्तरतः न भूमौ स्थापयेदिति। श्राद्धरत्नाकरे त्वयं। पितृपात्रं पिधायाथ न्युब्जमुत्त
रतो न्यसेत्। पितृन् परस्थानमसीति निधाय यार्चयेद्द्विजान्। तथाप्यत्र श्राद्धेनुमेरुः तरदेशो

Indira Gandhi National
Centre for the Arts

स्थापयेत् । पितॄणां स्थानमसीति मंत्रेण दक्षिणाग्रेषु दर्भेषु तत्प्रथमपात्रं स्थापयेदिति संग्रहे ।
प्राचीनावीती सव्यदानीं गंधमाल्यं सधूपकं । दीपं वस्त्रं यथाशक्ति ब्राह्मणेभ्यो ददात्पयेति ॥१९
अस्यार्थः ॥ ॥ अर्घ्यनिवेदनादारभ्य एतावत्पर्यंतं उपवीती भूत्वा कर्म कृतं इदानीं गंधादिदानार्थं
प्राचीनावीती भवेदिति गंधादिदाने अस्मच्छाखायामाचार्येण मंत्रा नोक्ताः । तथाप्यविरुद्धम
न्यतो ग्राह्यमिति न्यायात्स्मृत्यंतरादपि स्वीकर्तुं युक्ताः । तत्र गंधदाने मार्कंडेयः । चंदनागरुक
र्पूरकुंकुमानि प्रदापयेत् । अश्वमेधमवाप्नोति विप्राणामनुलेपनात् । एवं सुगंधपुष्पस्य दीप
दानस्य तथैव चेति । सति विभवे प्रतिब्राह्मणं दीपदानमिति पूर्वमेवोक्तं । तथा वस्त्रदानमपि
। कौशेयं क्षौमकार्पासं दुकूलमहतं तथा । श्राद्धेष्वेतानि यो दद्यात्कामानाप्नोति पुष्कलानि
ति । कोशप्रभवं कौशेयं क्षुमा अतसी तत्प्रभवं क्षौमं दुकूलं पट्टोलकं । अहतं अप्रक्षालितं शु
क्लं वसनं । अहतं यंत्रनिर्मुक्तं शुक्लं वासः प्रशस्यते । शस्तं तन्मंगले कार्ये नावल्कलं न सर्वदे
ति । वायवीयपुराणे । वासो हि सर्वदैवत्यं सर्वदेवैरभिष्टुतं । तस्याभावे क्रिया न स्याद्यज्ञदाना १२९
दिकाः क्वचित् । तस्माद्वस्त्राणि देयानि श्राद्धकाले विशेषतः । तद्वचैतान वा भाति यज्ञदानतपा

दिभ्वेति । अत्र पादरक्षादानमपि प्रशस्ततरं । श्राद्धे भूपानहौ दद्यात् ब्राह्मणेभ्यः समाहितः । दि
व्यं बलं ततश्चक्षुर्वा दानं भवेत्तथेति । तथात्र श्राद्धकाले यज्ञोपवीतदानमचत्यं बहुफल
प्रदं । उपवीतं तु यो दद्यात् श्राद्धकाले तु धर्मवित् । पावनं सर्वविप्राणां ब्रह्मदानस्य तत्फलमिति ।
वस्त्राभावे यज्ञोपवीतदानं कार्यमवश्यं । तथा च हेमाद्रौ ब्राह्मे । यज्ञोपवीतदानं च वस्त्रा
भावे विधानत इति । उपानद्विषये प्रति अवणमात्रं समर्पणं तु पश्चादेवेति । एतद्वस्त्रादिदा
नं सति सामर्थ्ये ज्ञाद्यपरिहारेण वक्तव्यं । पिपार्वणानंतरमाचमनं कार्यं । यतः श्राद्धेषु रुठ
लव्याचमनं श्रूयते । तथा हि । आरादावंते थार्वायां विप्रपादप्रक्षालने । विप्रपादप्रशोधने । वि
किरपिंडदाने च षडुराचमनं स्मृतमिति । आदौ विप्रपादप्रक्षालनात्पूर्वं तथा प्रक्षालनानंतर
रमाचमनं स्मृतमिति । आदौ विप्रपादप्रक्षालनात्पूर्वं तथा प्रक्षालनानंतरमाचमनं स्वा
यामध्ये समाप्तौ अनुव्रजनानंतरमाचमनं । एतावत्पर्यंतं शास्त्रांतरदृष्टं कर्म निरूप्य पुनः
कारिकार्थः प्रतिपाद्यते । तत्र समतिमाहा एवं द्विजान्प्रपूज्याथ ताजभोजनपात्रस्थापनार्थं ब्राह्म
णानां पुरतः पृथक्पृथक् मंडलं कुर्यात् । संग्रहे । मंडलानि तु कार्याणि नीवारैः साकुनिश्

Indira Gandhi National
Centre for the Arts

भैः।गोरमृत्तिकया वापि नस्मृना गोमयेन वेति।स्मृत्यंतरे।चतुरस्रेषु पात्राणि मंडलेषु नु
विन्यसेत्।भोज्यानि भोजनार्थं तु सम्यक् प्रक्षाल्य धर्मवित्।अत्रिः।भोजने हेमरौप्याणि देवे
पित्र्ये यथाक्रमं प्रशस्तानि।अन्यपात्राणि तद्भावे तु कारयेत्।अत्र स्मृत्यंतरे।पंचाशत्पलिकं कांस्य
द्याधिकं भोजनायते।गृहस्थस्तु समकार्यमभावे हेमरौप्ययोः।ब्रह्मांडपुराणे।प्रक्षाल्य तानि
पात्राणि द्विवारं पाणिनैव तत्।पश्चाद्दिधारणार्थं तु विधिवत्संप्रमार्जयेत्।यवैर्दर्भैस्तिलैर्मिश्रै
श्चैवाम्भोभिर्विनिक्षिपेत्।देवमंडले यद्दर्भान् क्षिप्त्वापि तन्मंडले तिलदर्भान् क्षिप्त्वा तत्र भोजन
पात्राणि स्थापयेदिति भावः।तत उदकदानार्थं परितो भस्मादिना चतुःकोणादिमर्यादां कृ
त्वा द्विजहस्तशुद्ध्यर्थमुदकं दद्यात्।नान्यथा।तथा च मत्स्यः।अकृत्वा भस्ममर्यादां यः कुर्यात्पा
णिशोधनं।आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठति।मर्यादानंतरा णिशोधनं।तल्लक्षणं स्मृ
त्यंतरे।भस्मना वारिणा वापि कारयेन्मंडलं ततः।चतुःकोणं द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य
च।मंडलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतं।मर्यादामंडलं चैतत्तयोरप्येक एवार्थः।विन १४०
स्यादिना पात्रसमं नाम मंडलं कृत्वा हस्तप्रक्षालनोदकस्य प्रतिपत्तिः श्रूयते।ब्रह्मांडपुराणे।प्र

क्षाल्य हस्तपात्रादि पश्चाद्दर्भैर्विधानवित्।प्रक्षालनजलं दर्भैस्तिलैर्मिश्रं क्षिपेच्छ्वो मंडलेषु
क्षिप्यत इति शिष्टाचारः॥ ॥अथाग्नौकरणविधिः॥ ॥पितृयज्ञवच्चरोरुद्धृत्याज्यस्य सर्पिषा
।अग्नौ करिष्य इत्यनेन पृष्ट्वा कः क्रियतामिति।१०।मेक्षणानुप्रहृत्यं नं पितृयज्ञं करोत्यथेति।
॥ ॥अस्यार्थः॥ ॥स्थाल्यां स्थितस्य पिंडपितृयज्ञस्य चरोः किंचिद्भागं पृथक्पात्रांतरे उद्धृत्य धृत्वा पात्र
स्थितेनाज्येनाभिघार्य तान् विप्रान् कं।अग्नौ करिष्य इति पृष्ट्वा क्रियतामिति तैरभ्यनुज्ञातस्त
पस्तरणादि कृत्वा मेक्षणेनादाय जुहुयात्।श्रौतमंत्रं।सोमाय पितृमते स्वधा नमोग्नये कव्य
वाहनाय स्वधा नम इति स्वाहाकारेण वाग्नेः पूर्वं यज्ञोपवीती।तच्चैवं मेक्षणं वामहस्ते गृहीत्वा
दक्षिणेन स्रुवेणाज्यं गृहीत्वा तत्र मेक्षणे उपस्तरणं कृत्वा तं मेक्षणे स्थापयित्वा दक्षिणेन मेक्षणं गृ
हीत्वा पात्रस्थमभिघार्य मेक्षणस्थितं चाभिघार्य ॐ सोमाय पितृमते स्वधा नम इति मंत्रेण जु
हुयात्।एवमेव द्वितीयं जुहुयात्।सव्य होमपक्षे अग्नये कव्यवाहनाय स्वाहा।सोमाय पितृ
मते स्वाहा।पुनरुक्तार्थे वा मेक्षणप्रहरणमप्यग्नौ कर्तव्यमिति॥ अपसव्यपक्षे सव्यपक्षे वस
व्येनैव मेक्षणप्रहरणमग्नौ।प्रसंगात् पाणिहोमविधिरपि प्रदर्श्यते॥ ॥अग्न्यभावे तु

Indira Gandhi National
Centre for the Arts

दिप्रस्य पाणावेवोपपादयेदिति मनुस्वनान्निरग्नी। नां सर्वदापाणि समोन वृति कृति ताग्नीनाम
पि पिंडपितृयज्ञरहितेषु श्राद्धेषु पाणि होम एव नवनितानत्र कारस्तु कापल्यस ग्रहे। उद्धृत्य भोजनी
यात्रान्न कृविशात्रेषु निक्षिपेत्। अग्नि धार्य इति लक्ष्यहोमं कुर्याच्च पाणिषु। होम प्रश्नं विना सर्व
विधानं पूर्ववद्भवेत्। पाणि होमेषु सर्वत्र प्रश्नं नेच्छंति सूरयः। अष्टका प्रकरणे कारिकायां। उद्धृत्य
भोजनी पात्राद्दृद्दुत्वाथ पाणिषु सामायत्यादि मंत्राभ्यां मक्षणान करपावामि क्षणासं नवेद क्षि
ण हस्तेनेक उपस्तरणं कृत्वा तेनैव सर्वेषां विप्रपाणिषु जुहोति। भोजन कः। विप्राणामुपविष्टा
नां सर्वेषामेव पाणिषु। विनत्प्रजुहुयात् सर्वं सामायेत्यादि मंत्रतः। तत्र पड्क्तंस्मृत्यं नरे पित्र्यपः
पक्तिमूर्द्धन्यः तस्य पाणौ यथाविधि। हुत्वा मंत्रवदन्यत्र तु स्थाली पात्रे तु निक्षिपेत्। एतच्चारवानर
विषयं। तत्र स्वगृह्यानुसारेणावेदितव्यं। अत्रैव कारिकायां। प्राचीनावीते हुत्वान्यैन्य दत्त्रं ददात्स
घा तु दीप्या शाखूरत्रैवेन प्राश्नीयात्करे हुतं। निधायत हुतं पात्रे आचम्यो पविशेदिति। पाणि
हुतं भोजनपात्रे स्थापयित्वा आसन देशात्किंचिद्दूरं गत्वा पाणी प्रक्षाल्य सम्यगाचम्य १८१
पुनरासने उपविशेदिति। अग्निनाचविशेषः। अग्निना वेतु विप्रस्य पाणावेवोपपादयेत्।

पर्युक्ष्य दर्भोन स्तीर्ययतो ह्यग्नि समो द्विजः। अत्राग्नि नावुःस्मार्तोग्न्यनावादि प्रायेणनोच्य
ते। किंतु अकृतदारपरिग्रहाभिप्रायेण। तथा च जातूकर्ण्यः। अग्निनावः स्मृतस्तावद्यावद्भा
र्यो न विंदति। भार्या परिग्रहात् पूर्वं यानि समावर्त्तनादीनि कर्मनिमित्तानि श्राद्धानि तत्राग्नेना
वः नष्टदारस्य। तस्य देशादं तरितः आलस्यादं तरितस्यापि ना। एवमनग्निकत्यवैश्वदे
विक द्विज पाणौ होमः। अनुपनीतस्याप्येवमेव विधिः। तथा च वशिष्ठः। नह्यस्मिन् युज्यते क
र्म किंचिदामौंजीबंधनात्। नाभ्याभिव्याहारयेद्ब्रह्मस्वधानिनयनादृते। स्वधा नाब्दः श्राद्धो
पलक्षणार्थः। एवमुक्तपविधस्यापि निरग्निकस्य ब्राह्मणपादे वकरभ्यो करणं। तथा च वायुपुरा
णे। देवहान नग्निकः कुर्यात्पृथ्वीं पित्र्ये निवेदयेत्। नहि स्मृताः शेषजाता विश्वेदेवाः पुराणगाः
। यथा नाग्नि कस्य पित्रकार्येग्नः करजो हवनं पित्र्यपंक्तौ प्रति ब्राह्मणं नवा तिन। तथात्र एव
मुक्त पविध निरग्निकस्य विश्वेदेव निमित्तं प्रति ब्राह्मणमग्नौ करणं नास्ति। पुराणवचनात्
। वैश्वदेवं दद्यादेकस्मिन्भवे पूर्वं हवा द्विजाः। तदेक पाणौ दानं वंशस्याद्धिधि विहितं तथा। अतमु
ख्य विश्वदेवस्थाने उपविष्टस्यैव करे होतव्यं। हुतं शेषं पित्र्यपात्रेषु दातव्यमिति इति पाणिहो

Indira Gandhi National
Centre for the Arts

अनेषूपविविष्टेषु कृतजोषं ददस्तथा ॥२१॥ उद्दिश्य स्वान्नं विश्वेभ्यः पितृभ्यश्च दद्याद्द्विजः। तुं
जमान् श्रावयेद्विप्रान् रक्षोघ्नान् पितृलिंगकान् ॥२२॥ पुराणानि पवित्राणि ऋषिगीतानि
नास्तुतिरिति॥ ॥अस्यार्थः॥ ॥अथ यथाप्रकरणं भोजनपात्रोपस्तरणपूर्वकं सर्वान्ना
निदेवपूर्वं भोजनपात्राण्युपस्तीर्य स्वयं पत्न्या अन्यैर्वा विनियुक्ताः प्रशस्तहविष्यान्नपूर्वकं
परिवेषणं कुर्युः। अत्र परिवेषणप्रकार उक्तो मनुना पाणिभ्यामुपसंगृह्य स्वयमन्नस्य वर्द्धितं
। विप्रान्तिके पितॄन् ध्यायन् शनकैरुपनिक्षिपेत्। अन्नस्य वर्द्धितममत्रादि पूर्णमित्यर्थः। उपनि
क्षिपेदिति विप्राणां समीपे भूमावस्थापयेदिति भावः। पुनः स एवाह। उपनीय तु तत्सर्वं शनकैः
सुसमाहितः। परिवेषयेत्प्रयतो गुणान्सर्वान्प्रचोदयन्। शाकपाकादीनां मधुरतिक्त
दीनां गुणान्प्रचोदयेदिति। अन्न एव भोजनकः। पाकं सर्वमुपानीय संवेद्यत्व पृथक् पृथक्।
विधिना देवपूर्वं तु परिवेषणमारभेत्। स एवाह कृत्वाग्नौ परितोष्य तु पितृपात्रेष्वनंतरं। नि
वेद्य वापसव्येन परिवेषणमाचरेत्। कृतभोजननिवेदनं एव अपसव्येन। न परिवेषणमु
भयथा सव्येन पद्मपसव्येनाग्नौकरणं न दा कृतभोषदानमप्यसव्येन। यदि सव्येन हवनं तु १६२

दास्व्येनैव। परिवेषणमुभयथा सव्येन वा। सव्येनैव प्रकर्तव्यं पित्र्येपि परिवेषणं। सव्येनैव तु
क्रियावेन महापुण्यमनीप्सनेनेति वचनात्। आचार्यः॥ ॥वारं वारं त्वनुवीरं हविर्दद्यात्तु दैवि
फ एकवारं त्रिवारं वा पेनकं प्रथमस्मृते। प्रथमपरिवेषणान्वये नियमः। भुंजानेषु विप्रेषु
अपेक्षितं पुनः न दातव्यं। न्त्वात्र सौरस्यानियमः। संग्रहे। एकपंक्त्युपविष्टेभ्यो दद्याद्दन्नं स
मं न दा। गुणानां तारतम्यं तु विप्राणां न विचारयेत्। प्रत्येकं वा यस्मरणात्। कुतदाभेतु कार
स्यफल्या विघ्नकरस्य च। पंक्त्या विषमदानं तु अभिक्षुतिर्नोपपद्यत इति तस्मात्तारसर्वं निरा
कपाकादीनि सद्व्यान्येव दातव्यानि। नार्पया पि परिवेषणं कार्यमिति वायुपुराणे। परि
वेषः प्रशस्तः स्याद्भार्यया पतिसंश्रये। पितृदेवमनुष्याणां स्त्रीसाहाय्येन नः स्मृते निःसु
नादयो येपि वा सगोत्रिणो नियता बाधवाः परिवेषणं कुर्युः। मत्स्यपुराणे। उभाभ्यामपि
हस्ताभ्यामाहृत्य परिवेषयेत्। सतिलं परिविक्षाम्य दर्भपाणिरशोषतः। पूर्वमेव पाकाव
स्थायां तिलमिश्रं कृत्वा तादृशं परिवेषयेदिति भावः। भक्त्या भोजनपात्रे पृथक् तिलाः कार्याद

Indira Gandhi National
Centre for the Arts

ति। अत एव पराशरः। सर्वदा तु तिला ग्राह्या पित्रकृत्ये विशेषतः। (पूर्व) नाज्यपात्रे तिलान् द
ष्ट्वा निराशाः पितरो गता इति। नारदीयपुराणे। रौप्य हस्तेन दातव्यं यत्किंचित्पितृदैवतं। तेन
स्युः पितरः तृप्ता यावदाहूतसंप्लवमिति। एकहस्तपरिवेषणे दोषस्मरणात्। समूहनां उभ
राय पाणिनैकेन दीयते। तद्द्रव्यं पितृपात्रेषु सद्यनाक्रेमिरात्री। नेरिति। अतो हस्तद्वयेन द
र्व्यादिसाधनेन परिवेषयेत्। अत एवाचार्यस्मृतौ। उडुंबरमयाः शस्ता दर्व्याद्याः श्राद्धकर्म
णि दर्व्याद्यैः संप्रदातव्यं न तु हस्तेन किंचनेति। मनुरपि। दर्व्या देयं घृतान्नं तु समस्तव्यंज
नानि च वेति। हस्तादत्तं न लोकव्यामिति पैठीनसिवचनात्। लवणं व्यंजनं चैव घृतं तैलं त
थैव च। लेह्यं पेयं च विविधं हस्तदत्तं न लक्षयेत्। तस्माद्दर्व्यादिसाधनेनैव सर्वमन्नादिकं प
रिवेषयेदिति। रजतपात्रसाधनेन परिवेषणफलाधिक्यमुक्तं मनुना। राजतैर्भाजनैरेषा
मथवा रजतान्वितैः। वार्यपि श्रद्धया दत्तमानंत्यायोपकल्पत इति। रजतान्वितैरिति दारुता
म्रपात्रादीनामेकदेशे रौप्ययुक्तं कृत्वा तेन परिवेषयेदिति मेधातिथिः। हारीतः। सौवर्णरा १६३
जताभ्यां वार्षखड्गेनौडुंबरेण वा। दत्तमक्षयतां याति फल्गुपात्रेण वा पुनः। संग्रहे। तृणप

र्णादिभिर्दद्यादन्नं वै श्राद्धकर्मणि। नायसैर्नैव दातव्यं न तु हस्तेन कुत्रचित्। केवलं हस्तेनैव प्र
दातव्यं न तु दर्व्या कदाचन। तत्र दोषमप्याह मनुः। अपक्वं स्नेहपक्वं च यो दर्व्या दातुमिच्छति।
स ब्रह्महा सुरापश्च स स्तेनः स गुरुतल्पक इति। अपक्वं स्नेहपक्वं (यो दर्व्या दातुमि) न फलमूल
कविनद्व्यादिव्यतिरेकेण दर्व्यादिभिः साधनैः। अन्नपूर्वकं सर्वान्नानि द्विः परिवेषयेत्
। परिवेषणाविशेषानंतरमपि श्रूयते। संकल्प्यात् पूर्वमेव यत्किंचिच्छ्राद्धार्थं वस्तु न स्तोकं स्तो
केन तद्देयं। भुंजानेषु न तत्पूर्वदानमुचितं। तत्र वाक्यं। शुचिना शुचि यद्देयं संप्रदेयं च तच्छुचि।
संप्रदानस्य दुष्टत्वाद्दत्तमेतन्न युज्यते। पूर्वमदत्तं तस्यैवाहानं न युज्यत इत्यर्थः। अन्यथा
यद्दत्तं तत्तद्देयमिति। संकल्पितदत्तं दास्यमानमिति पदं तमेव दास्यमानं न तत्पूर्वमित्य
वगंतव्यं। एतावत्पर्यंतं प्रासंगिकं स्मृत्युक्तं परिवेषणादिकं किंचित् किंचिद्दाम्य द्वाराप्रदर्श्य
पुनः प्रकृतमनुसरति सकारिकार्थः समर्थ्यते। एवमुक्तप्रकारेण परिविष्य होमावशिष्टं त
चरुं देववर्जं पितृपात्रेषु दद्यादित्याह। पितृपात्रेषु ऊनशेषदानं अग्निहोमपाणिहोमे च स
मानं। ततः ऊनशिष्टदानानंतरं विश्वदेवेभ्यः स्मृत्युक्तप्रकारेण अन्नसंकल्पः। तत्र पात्राल

Indira Gandhi National Centre for the Arts

मप्रकारमाहाचतुर्विंशानिमते। उत्तानं दक्षिणं सव्यं नीचं पात्राण्युपस्पृशेत्। स्वस्ति केन पितॄन्देवा
न धृष्यो घ्र्येचदापयेत्। पृथिवी ते पात्रमित्यादिना मंत्रेण पात्राणि मंत्रणं कृत्वा इदं विष्णुर्विचक्र
म इत्येन। त्रिः पंचभिस्त्रिभिः द्विजांगुष्ठग्रहणं कुर्यात्। तथा च स्मृत्यंतरे। इदं विष्ण्वादि पंचर्चै
जप्त्वा गुष्ठादि विस्तरेण। स्पृष्टास्पृष्टैर्न दोषाय पितॄणामक्षयेन वेत्। अत्र विधाने इदं विष्ण्वा
दि तिमंत्रैः पंचभिः। श्राद्धकर्मणि अंगुष्ठग्रहणं कुर्यात्तेन रक्षा न बाधते इति। तत्र केचिद्देवयज्ञो
पवीती। विष्णो हव्यं रक्षेति। पित्र्ये प्राचीनावीती कव्यं रक्षेति द्विजांगुष्ठं मन्त्रादिसाग्रं निवेश
येत्। विष्णो हव्यं च कव्यं च ब्रूयाद्रक्षेति वै क्रमात् इति स्मरणात्। तत्रांगुष्ठनिवेशने विशेषः
स्मर्यते। उपरि हस्तयोरंगुष्ठं द्विजस्यान्नेन निवेशयेत्। रासंतं इवेदं पितॄणां नापतिष्ठते। परि
वृत्येति हस्तमुत्तानं कृत्वा द्विजांगुष्ठनिवेशनं कुर्यादित्यर्थः। एवमन्नोदके अंगुष्ठेनावगा
ह्य तत्तु दर्भोदकपूर्वकं चतुर्थ्या संकल्पयेत्। एवं तिलदर्भोदकेन पितृभ्यः संकल्पयेत्। स्वधे
ति विशेषः। तथा चात्रिः हस्तेन तु क्रमन्नाद्यामिदं मंत्रमुदीरयेत्। स्वाहेति च ततः कुर्यात्स्व १४८
रस्ता विनिवर्त्तनात्। एतद्दैव देवब्राह्मणविषये। पितृविषये तु गोत्रसंबंधनामस्मृत्वात्र

तृप्यागः। तथा च स एव। गोत्रसंबंधनामानि इदमन्नं ततः स्वधा पितृक्रमादुदीर्य्येति रचसन्ना
वर्त्तयेदिति। दंपत्योरेवात्र त्यागे अधिकारः। तयोरसामर्थ्ये न्यस्यापि। तथा चात्रिकांडे मंडनः।
सांगं तु सर्वं धा कुर्यात्तत्राप्यन्यतरस्तयोः। उभावप्यसमर्थौ चेत् त्रियुक्तः कश्चन सृजेदिति। अत्र
त्र ब्राह्मणविषये बलिदानावसरे निषेधः श्रूयते। अत्रिवचनात्। दत्ते वाप्यथ वादत्ते भूमौ या
निक्षिपेद्बलिं। तदन्नं विफलं याति निराशैः पितृभिर्गतैरिति पितृग्रहणं वैश्वदेवोपलक्षणा
र्थं ततः पुराणोक्ताजप्यमंत्राः। यज्ञेश्वरो हव्यकव्यतान्नाकव्ययात्मा हरिरीश्वरोत्रा तत्सन्निधा
नादपयांतु सद्यो रक्षांस्यशेषाण्यसुराश्च सर्वे तां यो गिनश्चिंतयंतीत्यादिकमुच्चार्य तिथ्या
दिकथमपूर्वकं पितृनाम गोत्राण्युच्चार्य द्विगुणदर्भं तिलमिश्रजलमुत्सृजेत्। ॐ भूर्भुव
स्वः यथा सुखं जुषध्वमिति पितृरूपी यज्ञपुरुषः प्रजापतिः प्रियतामिति। ततः आपोशानं
प्रदायाघ सावित्रीं त्रिर्जपेद् यथा मधुवाता इति तत्त्वं माधिस्येकत्रिवंत थेति। अत्र बलिनिषे
धः। न दद्याद्धर्मराजाय बलिं श्राद्धकदाचन। अमंतोपस्तरणमस्ति मंत्रणे वापश्चात्ममे
दिति। अत्र पात्रानेविशेषस्मृतिसार समुच्चये। अपात्रानं वामनागसुरापानं समनेव

न्। द्रक्ष नागेतु यः कुर्यात्सोमपानसमं नवेन्नदिति। आपोशानं करे कृत्वा कृत्वानुपतितोदरं। पु
राणं कृत्वा पुनः कृत्वा सुरापानसमं नवेदिति।। नित्यभोजनाश्रितनियमाः प्राणाहुत्यंताभोक्समा
णानामत्रापि संततीगम्यते। व्यासः। जुषध्वमिति तेनोक्ताः सम्यग्विप्रेण भोजनाः। कृतमौनाः
समश्नीयुरपोशानादनंतरं। आपोशानानंतरममृतोपस्तरणमसीत्यनेन मंत्रेण आचमना
नंतरमित्यर्थः। तथा च विष्णुपुराणे। ततो निन्त्रा मिष्टमत्यर्थभुंजीमतिसंस्कृतं। दत्ताजुषध्वमिच्छा
तो वद देवेन ददतिष्टं। अत्र भोजनपात्रधारणप्रकारमाह स एव तु: अंगुष्ठस्तर्जनी चैव मध्यमानत्व
नामिका। तिस्रश्चांगुल्यः प्रोक्ता अत्रास्ताः पात्रधारणा इति। एतावत्पर्यंतं स्मृत्युक्तमंत्रोपयोगि
वाक्यद्वारा कर्मनिर्वाहार्थं कर्मकलापमुक्त्वा इदानीं कारिकार्थः कथ्यते भुंजानामिति। भुंजाना
न् एतान् विप्रान् रक्षोघ्नानपि तल्लिंगकान् सूक्तविशेषान् श्रावयेदिति। भोजनस्य रूपर्याप्तं
देयं किंचित्ततोधिकं।। २३।। तत्तेषु श्रावयेत्तिस्रो मधुवाता ऋतायते। अश्नन्त्विति विना विप्रा
न् रक्षोघ्नान्पि तल्लिंगकान् सूक्तविशेषान् श्रावयेदिति। भोजनस्य रूपर्याप्तं देयं किंचित्ततोसं
पन्नमिति पृच्छति।। २४।। तेपि संपन्नमित्येवं ब्रूतिब्रूयुस्ततः परमिति।। ।।अस्यार्थः।। ।।भोजन १४५

कार्यप्रवृत्तेभ्यो विप्रेभ्यः अपेक्षितं देयं ततोप्यधिकं देयं च अथ तेषु तृप्तेषु सत्सु उक्तमंत्रान् श्राव
येदिति।। ।।सूत्रेपि। तृप्तान् ज्ञात्वा मधुमतीः श्रावयेदक्षन्नमीमदंतेतिचा एतन्मंत्रश्रवणानंतरं
संपन्नमिति विप्रान् पृच्छति। तृप्तिविषये संपन्नमिति प्रश्नार्थः। तथैव ब्रह्मनिर्वचनं तेपि ब्रूयुरि
ति। यद्युक्तं। ततः किंचिदन्नं पिंडार्थमुद्धरेत्।। २५।। पितृयज्ञवदोरन्नमुद्धृतं प्रक्षिपेदथ। अत्रा
प्यकिरणार्थं च सर्वस्मादन्नमुद्धरेत्।। २६।। ।।अस्यार्थः।। ।।यद्यपि तृप्त्युक्तशेषं तदन्नं किंचित्किं
चिदुद्धृत्यापि तयज्ञवत्तोतत्सर्वमुद्धृतं प्रक्षिपेदित्यर्थः। स्थाल्यां सर्वं पिंडयोग्यं कुर्यादिति। उत्त
त्र प्रकिरणसिद्ध्यर्थं सर्वस्मादुक्तशेषादुद्धृत्य कबलमात्रमन्नं पात्रांतरे प्रक्षिपेदिति। ब्रा
ह्मणेभ्यस्ततः शिष्टं सर्वमन्नं निवेदयेत्। तेपि स्वी कुर्युरिष्टं स्वेदनुज्ञानं तिवा पुनः।। २७।। पिं
डदानमनास्त्वादृष्यांते त्वथ वा पुनः। अंते निनयनाद्यं तं पित्र्यतं समापयेत्।। २८।। अस्यार्थः।
तृप्तशेषं सर्वमन्नं तेभ्यो निवेदयेत् दत्तशेषः। किंक्रियतामिति। इत्युक्ते सति यथानिमंत्रितव
तिनिषां तदा स्वीकुर्वति। अथवा इष्टैः सह भुज्यतामिति (इत्युक्ते) यदि अनुज्ञानंति। अनुज्ञा
नं दद्युः तदा यजमानेन आमंत्रितेः सार्धं भोक्तव्यमिति। अत्र प्रतिवचनानंतरं पुराणमहाल

राचां स्यात् तदन्वाचमनार्थं यद्दद्यादापः सकृत् सकृत् तदनु पश्चादमनापिधानमसीत्याच
मनार्थं प्रति ब्राह्मणमर्यादद्यात्। अत्र पिंडदानस्य कालो विधीयते। अनाचांतेषु विप्रेषु आ
चांतेषु वा कार्यमिति। उच्छिष्टापनयनं तु द्विलक्षणमाचमनं। न च कृते अकृते पिंडदाने भ
वति। एवं पथ्येष्वपाकार्यमिति तेन पिंडदानं समापयेदित्यर्थः। अत्र प्रकिरणार्थं रत्नप
रदानीयजलं कृते। आचांतानां समीपेषु त्वग्रतः प्राकिरेद्वीति॥ २५॥ ॥ अस्यार्थः॥ । एष
प्रकिरणार्थं रक्षापितमन्नं तदनु आनीयजलेनाभिषिच्य आचांतानां विप्राणां पुरतः प्र
किरेदिति। अत्र पिंडदानपक्षद्वयं। आचांते अनाचांते वा भवति। विकिरणं तु पिंडदानाने
आचमनात् प्रागेव भवति। न तु पूर्वं निपरणात् प्रकिरेदिति। आश्वलायनेनोक्तत्वात्। नागरैस्तु
विकिरणं पिंडदानात्पूर्वं पश्चादपि भवति। ब्रह्मांडपुराणे। प्रोक्ष्य भूमिं तथा द्विः स्वः स्वाः (?) नमो
पितृपरायणः ततो विकिरणं कुर्याद्विधिदृष्टेन कर्मणेति। तथा च पुराणांतरे। विकिरं ग्रास
मात्रं तु तत्तु दद्यात् पृथक् पृथक्। उद्धृत्य सर्वमन्नं तु पंक्तिमूर्ध्नि निपातयेदिति। तत्र देवपित्र्योरु
भयत्र मंत्रौ। असोमपाश्च ये देवा यज्ञभागविवर्जिताः इति पित्र्यविषयाय अग्निदग्धाः कुले १४९

जाता येऽप्यदग्धाः कुले मम। भूमौ दत्तेन तृप्यंतु तृप्ता यांतु परां गतिमिति। एवं कृत्वा हस्तौ पादौ प्र
क्षाल्य द्विराचम्य विप्रपाणिषु प्रोक्षणादिकमाचरेत्। तच्चास्मच्छास्त्रे आचार्येण अनुक्रमि
ष्यतः स्मृत्यंतरोक्तमविरोधि ग्राह्यं। तत्र मत्स्यः। तथाचांतेषु चाचम्य वारि दद्यात्सकृत्सकृदिति। अ
त्र पूर्वोक्तस्यैवाचमस्यानुवादः। अन्येषामपि। अथ सकृत्सकृत् सर्वेषां विप्रपाणिषु क्रमेण उ
दकं दद्यादिति। संग्रहे दर्भपाणिस्तु सिंचेच्च दर्भांश्चैव पृथक् पृथगिति। आचार्यस्मृतो नु प्रण
म्य तेषु विप्रेषु समाचांतेषु कृतस्नवाः। ददाति हस्तेषु थे गंधमाल्यानि सकुंकुमानीति। पद्म
पुराणे। आचांते तूदकं दत्वा पुष्पाणि सयवानि वा। पित्र्ये तु तिलयुक्तानि वारि वारि पृथक् पृ
थक्। वंदिकायां। अथ हस्तेषु धूपं च दत्वाक्षतपुष्पादीनि विप्राः कृत्वा विसर्जयेदिति। पुनर्गं
धादिदानविधानदर्शनात् अत्र न एव मत्स्यः। आचांतेषु पुनर्दद्याज्जलपुष्पाक्षतादिकमिति
। स्मृत्यंतरे। सुप्रोक्षितादिकं चोक्त्वाचांतेषु पठीतेनेति। अत्र विप्रपाणिषूदकादिदानेमं
त्रः। पुराणांतरे। अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितं। ब्राह्मणस्य करे न्यस्ताः शिवा
आपो भवंतु मे। इत्युदकदानमंत्रः। लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे। लक्ष्मीर्वसत

Indira Gandhi National Centre for the Arts

दासोमे सौमनस्यं सदास्तु मे। इति पुष्पदानमंत्रः। अक्षय्यं चास्तु मे पुण्यं शांतिः पुष्टिर्धृतिश्च मे।
यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम। इत्यक्षतदानमंत्रः। देवलः। ततो निपात्य प्रयतो वरान् यत्नेन
तेभ्यो पितॄणां अघोराः पितरः संतु संत्वित्युक्ते पुनर्द्विजैः। गोत्रं नस्तथा वर्द्धतां नः तथेत्युक्त
स्तु तैर्द्विजैरिति। एताः सत्या आशिषः संतु सत्वित्युक्ते च तैः पुनः। आशीः पूर्वं द्विजैर्दत्ताम्
ह्रीं जायाश्च तो स्वनाद इति स्कंदसंवादे पि। इत्येताश्चाशिषः सर्वा गृह्णीयात्प्रतिनाशिना इति। च
तुर्योगीश्वरः। ततः स्वस्तिलकं कुर्यान्मंत्रेणानेन भक्तितः। नित्यानुष्ठानसिद्ध्यर्थं सर्वदायकबु
द्धयः। पितृमातृपराः संतः संतु स्मत्कुलजा नराः। अनंतरमुच्छिष्टपात्रचालनं तदुक्तं जातू
कर्ण्येन। पात्राणि चालयेच्छ्राद्धे स्वयं शिष्योथवा सुत इति। न स्त्रीभिर्न च बालेन नान्यजात्या क
दाचनेति। पात्राणि चालयित्वा कुत्रचित्संस्पृश्य प्रदेशे स्थापयेत्। प्रतिपत्तिकार्यस्य उत्तरत्र व
क्ष्यमाणत्वात्। पात्रसमंतात् पतितमुच्छिष्टं अन्नमानास्यं नैव मार्जयेत्। उक्तं वृद्धवसिष्ठेन
श्राद्धे नोद्धानि हयनीयानि उच्छिष्टान्यादिनक्षयात्। श्च्योतंते वै स्वधाकारास्तान्पिबंत्यकृतोदका १६७
इति। मृतानां यथा सुदकदानं तेन यथोक्ताः। व्यासो पि। उच्छिष्टं न मृज्यात्तु यावन्नास्तमितो रविः।

क्षीरधारास्ततो यांति ह्यक्षयास्तांश्च भागिन इति। शौनकोपि। नोद्वासयेत्तु विप्राणामुच्छि
ष्टान्यादिनक्षयात्। तु देतत्स्वे वह्वृगृह्यविषयं। सपिंडीकरणविषये वा। अत एवाचार्यैः स
पिंडीकरणश्राद्धे विप्रोच्छिष्टं तु नद्रहात्। द्वारं वापि हि नेनावन्नोद्भरेदादिनक्षयात्। यस्य एक
मेव गृहं भवति तद्विषये विप्रसर्जनानंतरं दिवैव उच्छिष्टपरिमार्जनं कार्यमित्याह। मनुः। उच्छे
षणं तु तत्तिष्ठेद्यावद्विप्रा विसर्जिता इति। उच्छेषणं भूमिसंलग्नमुच्छिष्टादिकं। तच्च
विप्रसर्जनात्पूर्वं नैव मार्जयेत्। विसर्जितेषु विप्रेषु मार्जयेदिति भावः। पात्रचालनानंतरं स्व
स्तिवाचनं कारयेत्। उक्तं च स्मृत्यंतरे। चालयेदुक्तपात्राणि प्रथमं स्वस्तिवाचनादिति। तद्वैप
रीत्ये दोषमुक्तो बृहस्पतिना। भाजनेषु च तिष्ठत्सु स्वस्ति कुर्वंति ये द्विजाः। तदन्नमासुरैर्भुक्तं
निराशाः पितरो गता इति। अतः पात्रचालनानंतरमेव स्वस्तिप्रयोगो भवति। तत्प्रकारमाह पा
रस्करः। स्वस्तीति भगवान्ब्रूहीति प्रति ब्राह्मणं कर्त्ता ब्रूयात्। विप्रेण दत्तेत्युक्ते दद्यात्तिलो
दकं। पितृहस्ते देवपाणौ सव्येनैव स्वधोदकमिति। अयमर्थः। देवा विप्रहस्ते अक्षय्यवारदकं द
त्वा विप्रहस्ते च तिलोदकं। दत्वा स्वस्तीति भगवान् ब्रूहीति प्रति ब्राह्मणं कर्ता ब्रूयात्। विप्र

Indira Gandhi National
Centre for the Arts

णदेवेभ्यः स्वस्तीति वक्तव्यं। तथैवामुकगोत्रेभ्यः। यजमानस्य पितृभ्यः अमुकशर्मभ्यः स्वस्ती
निवाच्यं। पितृभ्यः स्वस्ती निविप्रा वदेत्। अथाक्षय्योदकदानं। तत्र मत्स्यः। स्वस्तिवाच्य ततः कुर्या
यादक्षय्योदकमेव चेति। मत्स्यं ततरेपि। देवपूर्वं जलं दद्यादक्षय्यं श्राद्धमस्त्विति। अस्तु अक्षय्यमि
ति ब्रूयुर्ब्राह्मणास्ततः सम्यग्दिनाद् इति। मार्कंडेयः। पितॄणां नामगोत्रेण जलं देयमनंतरं। ब्राह्मणानां
हि नैवीभ्यमक्षय्यमिदमस्त्विति। अयमर्थः। पुरूरवार्द्रवसंज्ञकानां विश्वेषां देवानां दत्तं श्राद्धमक्ष
य्योदकमस्तु। तथैव ते प्रतिवचनं दद्युः। अस्तु अक्षय्यमिति। इतरत्रापि प्राचीनावीती अमुकगो
त्राणामित्युदित्वा अस्मित्पितॄणां दत्तं श्राद्धमक्षय्योदकमस्तु तथैव प्रत्युत्तरं। अनंतरं प्रकृत
कारिकायां। उत्तानं प्रथमं पात्रं कृत्वा यज्ञोपवीत्यथा। दत्वा च दक्षिणां शक्त्या विरठनेदोंस्व धोच्य
तां। ॐ। ॐ स्वधेति प्रतिब्रूयुर्यच्चते मान्वरान्नपि तन्नू दक्षिणां दिशामाकांक्षन् नियतो वाग्य
तः स्तुविश॥३१॥ दातारो नोभिवर्द्धंतां वेदाः संततिरेव च। श्रद्धा च नो माव्यगमद्बहुदेयं च नोस्त्विति
॥३२॥ अस्यार्थः॥ ॥प्रथमं अर्घ्यपात्रं न्युब्जं पक्षेत्तत्तानं कार्यं। अपिधानपक्षे अपिधानपात्रं स्था १४८
नात् प्रचाल्य प्रथमपात्रं यथा विकृत्तं न वनि तथा कुर्यात्। उद्धृते दक्षिणं पाणावुपवीत्युच्य

ते बुधैः। सव्ये प्राचीनावीती निवीती कंठसक्तवत्। अथोपवीती सन् दक्षिणां दत्वा विसृजेदिति।
ॐ स्वधेति वचनेन विसृजेदिति। अत्र दक्षिणादानावसरे तांबूलं च दद्यादिति। आचार्यैः द
द्याद्यज्ञोपवीती सन् तांबूलं दक्षिणां तथेति। अत्र दक्षिणादाने [illegible] वत्सप कल्पसुक्तं ब्रह्मपुराणे
। हरिद्रोपि यथाशक्त्या दद्याद्विप्राय दक्षिणां। हतमश्रोत्रियं श्राद्धं हतायज्ञोमल दक्षिणाः। त
स्मात् सर्णं का कणं वा फलं पुष्पमथापि वा। प्रदद्याद्दक्षिणां श्राद्धे तथानुसफलं नयदि
ति। नत्स्यं नो ज्यं समं देयं दक्षिणां त्वनुरूपतः। दक्षिणानां नरं त्वोनकः। ब्राह्मणान् पवित्रयो
न्परीत्य त्रिः प्रदक्षिणं सस्त्रीकः स्वजनैः साष्टांग प्रणमेद्रचितांजलिः। कनिष्ठ प्रथम ज्येष्ठचर
मास्युः प्रदक्षिणे। ते प्रदक्षिणानु विनिक्षिप्य प्रणमयुः द्विजाश्चैते। आशीर्वा विधिना ब्रूयुश्चा
उग्र हतत इति। अथ विप्रविसर्जनं सत्वाह॥ ॥पितृती र्थौ रांस्वधेत्युक्त्वा गच्छतेति वदेद्
द्विजान्। तेष्वां स्वधेत्युदीर्यैव गच्छेयुरनपेक्षकाः। अथवास्तु स्वधेत्युक्त्वा गच्छतेत्विनानुवद
न्। तथोक्तास्तेपि गच्छेयुराल पादनपेक्षकाः। विश्वेदेवा इति पुनः प्रोच्चार्य तदनंतरं प्रियंता
मिति निर्दिश्य विश्वदेवान्समुत्सृजेत्। जयंतः। विश्वेदेवाः प्रियंतामिति विश्वेदेवा थो विप्रो

Indira Gandhi National Centre for the Arts

विसर्जयेदिति शौनकः। तावत्पदीर्यप्रथमं प्रीयंतामिति तत्परं। विश्वेदेवाद्युदीर्य निर्गच्छेनाम
थो बहिरिति। अथ गृह्यगणेस्मिन्नवावरान्याचेत तत्र शौनकः। तिष्ठन्कृतांजलिर्याचेद्दाता
नो स्मन्पितॄन्नपि मनुः। विसृज्य ब्राह्मणांस्तांस्तु नियतो वाग्यतः शुचिः। दक्षिणां दिशमाकांक्
न्याचेतेमान्वरान्पितॄन्। दातारो नो भिवर्द्धंतां वेदाः संततिरेव च। श्रद्धा च नो माव्यगमद्बहु
देयं च नोस्त्विति। आचार्ये स्मृतौ। अन्नं च नो बहु भवेदतिथींश्च लभेमहि। याचितारश्च नः सं
तु मास्म याचिष्म कंचन। वरानिमान्पितृभ्यस्तु ब्राह्मणैश्चानुमोदितः। परिक्रम्य नमस्कृ
त्य प्रार्थयेच्च पुनः पुनरिति। अस्य वरयाचनस्य गृह्यपरिशिष्टे दातकालनेदापिदत्त्वयन्ते। केचिद्द्विप्रवि
सर्जनानंतरमेव आशीर्वचनमिच्छंति तच्चिंत्यं नारायणेन मनुवाक्यस्योदाहृतत्वात् द्विप्रवि
सर्जनात्प्रागेव भवति। बृहस्पतिः। अक्षय्यमस्तु फलमित्यादि पद्यद्वयं प्रसादयेत्। विष्णुः। हवि
र्गुणान्वचाद्वाः पितरो यावदर्चिताः। पितृन्निरस्तार्चितैः पश्चाद्द्वैकश्यंनान्नं हविरिति। वृ
द्धयाज्ञवल्क्यः। वहिः प्रदक्षिणं कृत्वा सदान्वष्टावनुव्रजेत्। बंधुवर्गेण सहितः पुत्रभार्यासम १५०
न्वित इति॥ ॥अथ विप्रविसर्जनानंतरं पूर्वं प्रति ब्राह्मणेभ्यः पितृदीपान्हस्ताच्छादन

पूर्वकं निर्वापयेत्। तथा च देवलः। निर्वर्ण्य पितृमेधं तु दीपं प्रच्छाद्य पाणिना। आचम्य पाणी प्र
क्षाल्य ज्ञातीन्शेषेण तोषयेत्। अनंतरमुच्छिष्टमार्जनं कार्यं। तथा च पैठीनसिः। नरस्तानि
यथा दृष्टान्तथैवोच्छिष्टमार्जनं। तेषूद्धरत्स्थेनं उच्छिष्टेपि तृप्तो यासु योगानिमिति। प्रचेताः।
खनित्वा निक्षिपेद्भूमावन्यथा स्यु तोनेन वेत्। निषिद्धस्पृष्टोन्तेषां न स्यात्खननमुत्तमामि
ति। एवमुच्छिष्टपरिमार्जनं कृत्वा नित्यवैश्वदेवादिकं श्राद्धशेषणपाकांतरेण कार्यं यतः।
पितृपाकात्समुद्धृत्य वैश्वदेवं करोति यः। आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठत इति पैठीन
सिवाक्यं। न च श्राद्धमध्ये श्राद्धात्पूर्वं वा वैश्वदेवकरणपक्षे यथाधिकारिणं प्रति इदं स्यात्स्म
र्यंतरे तु। साक्षात् श्राद्धान्तवैश्वदेवपक्षे श्राद्धपाकेनापि वैश्वदेवस्य विहितत्वात्। अत एव च
तुर्विंशतिमते श्राद्धशेषमन्नमनुपक्षोनवैश्वदेवक्रिया ततः श्राद्धे हि श्राद्धशेषेण वैश्वदेवं समाचर
त्। यदा तु तच्छेषाभावः तदा अथो देवपृथक्पाकेनेति। तन्न वह श्राद्धशेषेण निनियमः क्वचि
दस्ति। तस्मात् श्राद्धान्तकरणपक्षे श्राद्धशेषणपाकांतरेण वा वैश्वदेवो भवतीति प्रतीयते
आदिमध्यकरणपक्षे यथाकारिणां सर्वेषां पृथक्पाकेनैव भवति। अत एव लोगाक्षिः।

Indira Gandhi National
Centre for the Arts

पित्र्यंर्थे निर्वपेत्पाकं वैश्वदेवार्थमेव च। वैश्वदेवं न पित्र्यर्थं न दार्श्यं वैश्वदेविकमिति। वैश्वदेवार्थे
मन्नं पित्र्यर्थं न भवति। पित्र्यर्थमन्नं वैश्वदेवार्थं न भवति। तत्राहिताग्नीनां सर्वदा श्राद्धात्प्रागेव
वैश्वदेवः। तत्र पाकांतरेण भवति। तथैव येषां श्राद्धमध्ये वा वैश्वदेवः तत्रापि पृथक्पाकेन
वा इत्यादि सर्वं स्मृतिशास्त्रतो वगंतव्यं। अथ वैश्वदेवानंतरमाचार्यः। ततः करोति निसा
निबंधुभिः सह भुंजते। श्राद्धरात्रौ दिने भुंजानः कर्त्ता निरयम्गच्छति। विद्यमाने श्राद्धरात्रौ अन्य
त्र भोक्तव्यमिति भविष्यत्पुराणे। ततश्च वैश्वदेवांते संग्रसस्तु न बांधवः। भुंजीतातिथि
घिसंयुक्तः सर्वोपेतं निशावितामिति। कारिका। ब्रह्मचारी भवेत्तस्यां रजन्यां ब्राह्मणैः सह
॥७३॥ अस्यार्थः॥ ॥श्राद्धदिन रजन्यां द्विजैः सह ब्रह्मचारी भवेत्। श्राद्धात्पूर्वदिने ब्राह्मणैः
सह ब्रह्मचारिणा भवितव्यमित्युक्तं। तस्मिन्नपि दिने एवं दिनद्वयमेव स्थातव्यमित्यर्थः।
इत्याश्वलायनकारिकाव्याख्यायामग्निसाध्यं पार्वणश्राद्धं समाप्तं॥ ॥अथाष्टकानि
रूप्यंते॥ ॥हेमंतशिशिरयोश्चतुर्णां कृष्णपक्षे चतुष्टये। अष्टमीष्वथवैकस्यामष्टमामष्टकां भवे
त्। कार्यं यत्कर्म सप्तम्यां तत्कुर्यात्पिंडयज्ञवत्। ओदनं तु चरुं चैव वपाय संश्रपयेदिह॥७५॥ग १५०

हविर्द्वितयं पादे या अपूपान् जुहुयाद्यदीति॥ ॥अस्यार्थः॥ ॥हेमंतशिशिरसंज्ञकयोर्ऋत्वोः
कृष्णपक्षचतुष्टये अष्टमीतिथिषु कर्त्तव्या इति। अथवा तस्मिन्मासे तन्दे एकस्यां वेति।
सप्तम्यां क्रियमाणस्य कर्म्मणः स्वरूपमाह। तत्कर्म पिंडपितृयज्ञवत्कार्यमित्यर्थः। चतुश्र
यणकाले होम्यद्रव्याणि त्रीणि भवंति। ओदनादित्रयं। अथवा अपूपाः प्रसिद्धाः स्त्रीसाध्या
ः। अत्र च निकारः। चतुःशरावपरिमितधान्यस्य पेषणं कृत्वा अपूपान् श्रपयेत्। अपूपाः
पिष्टमयाः। तेषां बहुसाधनसाध्यत्वात्स्त्रीकर्तृकत्वाच्च। निरग्नाः श्रपणं भवतीति गृह्यसि
द्धा नामवोपादानमिच्छंति। वा शब्दो विकल्पार्थः। पूर्वाणि त्रीणि इदं च एकं द्रव्यमिति। भो
जने तु नायं द्रव्यनियमः। अपितु होम एव। तथा च वृत्तौ। अष्टकाहविस्तत्र स्युः पूर्वो हानि
तथैव च। द्रव्यं न यत्ता वे कल्पान्न यत्वा संभवः। प्रत्यष्टकं च पूर्वेद्युः त्रीणि द्रव्याणि वा पि
वा। अपूपद्रव्यमेवैकं नान्या व्याख्यान कल्पनेति। इदमत्र गर्ह्यं। हेमंतशिशिरयोश्चतु
र्णामपरपक्षाणामष्टमीष्टकाः एकस्यां वेति। अस्यार्थमाह नारायणः। हेमंतशिशिराव
हा। अपरपक्षाः कृष्णपक्षाः। अष्टम्य इति कर्म्मनाम। एतदुक्तं भवति। मार्गशीर्षादिमासेषु

Indira Gandhi National
Centre for the Arts

येकृष्णपक्षाश्चत्वारः तेषु याश्चतस्रोऽष्टम्यः तास्वष्टकाः कार्या इति। यदि कृत्स्नं द्वयमधोम
लमासो भवति तदा तस्मिन्मासे न कर्त्तव्यमित्येवमर्थं चतुर्थग्रहणं। अपि च। बहुवचनस्य
त्रिष्वेव चरितार्थत्वाच्छास्त्रान्तरदर्शनाच्च चतुर्धमार्गशीर्षे च वामार्गमाग्रहायणीकश्चसाग्रहा
यण्याः तिस्रोऽष्टकाः कार्याः। चतसृषु वा विकल्प इति। अष्टमी। पित्र्युपलक्षणं। अष्टकाशब्दे
न सप्तम्यादिदिनत्रयसाध्यं कृत्स्नमपि कर्म्माभिधीयते। उक्तं च संग्रहे। सप्तम्यादिनवम्यन्तं
स्वगृह्योक्तविधानवत्। अष्टकाकर्म्म कुर्वीत कृष्णपक्षचतुष्टय इति। अत्रोक्तं प्रतितन्त्रे वाक्यं
वनृध्यपरपक्षेषु यदि कर्त्तुं न शक्नुयात्। माघे कृष्णेऽष्टकां कुर्यात्स्वगृह्योक्तविधानत इति।
चौलकापि। माघमास्यसितेपक्षे याष्टमी समुपस्थिता। श्राद्धं तत्राष्टकानाम स्मर्यते श्रुतिनो
दितमिति। बृहस्पतिरपि। कृष्णपक्षे तु माघस्य मैत्रादित्रिषु भेषु च। तिथयः सप्तमी पूर्वाः
पितॄणां तृप्तिदाः सदेति। आपस्तम्बः। यामाघ्याः पौर्णमास्या उपरिष्टाद्व्यष्टका यस्याम
ष्टमी ज्येष्ठया संपद्यते तामेकाष्टकेत्याचक्षत इति। ज्येष्ठया ज्येष्ठर्क्षेण युक्ते। तेनावश्यं सिं
हापि। माघकृष्णपक्षस्य नाष्टम्यां विना क्षणसुरकं भवत्। ज्येष्ठयोगेन नवम्यां वा श्राद्धं वृद्धिं करे भव १५१

त्विति। अत्रोक्तमधिकृत्य सप्तम्यादितिदिनत्रयसाध्यकर्मकरणपक्षे केवलमष्टम्यामेव श्राद्धं
कुर्यात्। अष्टमि श्राद्धविधानेनैव। तदानेनैव चरितार्थता वत्। तथा च बौधायनः। उपरिष्टान्माघ्याः
पौर्णमास्यामपरपक्षस्य सप्तम्यामष्टम्यां नवम्यामिति। क्रियेनापि वा अष्टम्यामेवेति। यदि तिथि
त्रये कर्त्तुमशक्यस्तदाष्टम्यामेवेति तात्पर्यः। अत एव नृसिंहः। माघमास्यसितपक्षे याष्टमी स
मुपस्थिता। अष्टमी त्वष्टकाख्याता तां उक्तेतां मन्येत विदमिति। संग्रहेऽपि। माघे कृष्णेऽष्टकाकर्म
सप्तम्यादित्रिके सति। अष्टम्यामेव वा कुर्याद्दत्राक्तस्तिथिषु त्रिषु। अतः सप्तमी श्राद्धमाद
नादित्रयसाध्यं। अथवा अपूपद्रव्यैकसाध्यमिति। एवं व्यवस्था। केचित्तु ॐ दतः सप्तम्यां श्रो
पायसमष्टम्यां कृत्वा शाकेन नवम्यामिति। यदेतद्व्याख्यानं तन्न शोभते। तथा च गृह्यसूत्रे। पूर्वेद्युः पि
तृभ्यो दद्यादोदनं कृत्वा पायसं। अनुः वाराव स्य वा पूषा उदीरतामवर उत्परास इत्यष्टाभिर्हु
त्वा पार्वती श्रेष्ठा कामयी इति। अत्र। पूर्वेद्युः पितृभ्यो दद्यात्पिंडान्नोजनं च दद्यादित्यर्थः। पि
तृशब्देनात्र सप्तम्यां पित्रादित्रयमुच्यते। अन्वष्टक्यापि पिंडपितृयज्ञकल्पेन हुत्वा पितृभ्यो
दद्यात्स्त्रीभ्यश्चैवाधिकं। अतः पितृभ्यो दद्यादिति वाक्यसाधम्यान्नु पिंडान्नोजनं च दद्या

Indira Gandhi National
Centre for the Arts

दिति। अन्वष्टक्येपि पिंडपितृयज्ञकल्पो दृष्टः। तथैवात्रापि सप्तम्यां पिंडपितृयज्ञविधानेन
भवति। अत्र भोजनेपि नैत्रस्यापि सिनत्वात्तद्भोजनं पैतृकमिति कृत्वा पार्वणमेवतंत्रंप
रिगृह्यते। अतः परं प्रकृतमुच्यते। पूर्वोक्तानां यथासंख्यं द्रव्याणां नेनिक्तेन॥३६॥ ओदनस्तु
प्रसिद्धस्यात्पायसः पयसा पुनः। ओदनस्तिलमिश्रस्तु कृसरः परिकीर्तितः॥३७॥ तिलकल्का-
न्विनिक्षिप्य स्तुनोवाक्षरान्भवेत्॥ ॥अस्यार्थः॥ ॥सप्तम्यादिदिनानां त्रयाणामोदनादित्रया
णां द्रव्याणां यथासंख्यमाहुः। ओदनः प्रसिद्धः पायसं दुग्धेन निष्पन्नः सोपि प्रसिद्धः कृ
सरस्तु तिलमिश्र ओदनः निष्पन्नौदने तिलप्रक्षेपः तदा कृसरो भवति। अथवा श्रपण
कालएव तंडुलमध्ये तिलकल्कान्निक्षिपेत् तथा कृतः कृसर इति वा। कृत्वग्न्याधानपर्यंतं पि
तृयज्ञविधानतः॥३८॥ ॥वासःप्रदानपर्यंतं श्राद्धं पार्वणवद्भवेत्। अस्यार्थः॥ ॥कर्मांगदि
ग्न्यप्राणानायम्य अग्निं प्रज्वाल्य तिथ्यादि स्मृत्वा एवं दीक्षो चार्या। निधात्र स्मत्पित
मनित्राय तृप्ति संपादनार्थं आत्मन वदान्त फल प्राप्त्यर्थं अष्टकाकर्म करिष्ये तत्रादौ सप्त
मीश्राद्धविधिं करिष्ये इति प्रतिज्ञाय प्रागदक्षिणाग्रैः दर्भैः पिंडपितृयज्ञवदग्निं परिस्तीर्य पा १५२

त्रासादनार्थं तद्वदेव दर्भोनास्तीर्य तेषु स्थाल्यादीनि पात्राणि आसाद्य उत्तरं च कर्म तथैव कृत्वा
ओदनं कृसरं पायसं श्रपयित्वा तद्वदेव आधानपर्यंतं कुर्यादिति। तथैव प्रतिज्ञापक्षणदान
दिकृत्वा पक्वान्नादि विधितः कृत्वा वस्त्राच्छादनपर्यंतं तथैव पार्वणवत्कृत्वा अग्नौकरणं कुर्यात्।
तत्प्रकारमाह॥ ॥ओदनाद्यन्नमुद्धृत्य पृष्ट्वा ६ कः पूर्ववद्द्विजैः। सोमायस्वनया स्थाने जुहुया
च्चानिरुदीरतां। अन्नदानादिन दत्वा पाद्युत्का संपन्नमित्यथ॥४०॥ अस्यार्थः॥ ॥अग्नौकरणस
मये तथैव पूर्वोक्तप्रकारेण पृष्ट्वा तैरुक्तः सन् सोमायस्वनया मंत्रपोरस्थाने उदीरतामवर उत्परा
स इत्यृचा निर्कृत्तिः अवदानधर्मेण जुहुयात्। स्वाहाकारेण इदमत्र ग्राह्यं। उदीरतामवर
उत्परास इत्यृचा निर्कृत्वा यावजीवो कामयेत् इति। अस्यार्थो टनिकारेणानि रूपितः। ओदना
दिन्यत्रिभ्यो अन्नमुद्धृत्य अग्नौमनुज्ञापयति। अग्नौकरणं मंत्रस्थाने उदीरतामवर इत्यृचानि
र्यावती। नरवैकान्निः पितृलिंगकानि श्रुतदेवानि वोजुहुतामेक्षणमनुप्रहरेत्। एवमग्नौ
करणं कृत्वा भोजनपात्रेषु अन्नपरिवेषणादि भोजनावसाने संपन्नवचनांतं पार्वणवत्कु
र्यात्॥ ॥उद्धृत्य भुक्तशेषान्नं निदधाति चरुत्रयं। स्थाल्यां तत्रोत्सर्गपर्यंतं श्राद्धशेषं समाप

Indira Gandhi National
Centre for the Arts

येदिति॥८१॥अस्यार्थः॥ ॥ब्राह्मणनुक्तदोषानेव कृत्रयेणोक्तोदकसंयोगमंत्रोक्तिं क्रियनामिसा
दि कृत्वा पूर्वोक्तवत्पिंडदानादि पात्रोत्सर्ग पर्यंतं श्राद्धं तोषं समापयेत्। इति सप्तमी श्राद्धविधिः
पूर्वेद्युः कर्म कथितम् अष्टकाकर्म कथ्यते। अष्टम्यां पशुना कार्या स्थालीपाकेन वाष्टका॥८२॥
स्थालीपाकप्रयोगस्तु तत्र तावन्नयोच्यते। पूर्णपात्र निधानांतमन्वाधानादि पूर्ववदिति।
॥८३॥अस्यार्थः॥ ॥प्रधानभूतमष्टकाख्यं कर्म अष्टम्यां मुच्यते। अष्टकाविधानमष्टम्यां प
शुकल्पेन स्थालीपाकेन वा कुर्यात्। तत्र पशुकल्पविधानं श्रोतेनवानि तस्मान्नोच्यते। स्थाली
पाकविधानमेवात्र वक्ष्ये। कृतोपासनेऽउपचितयप्राणानायम्य तिथ्यादि स्मृत्वा अष्टकाश्राद्धां
गभूतं स्थालीपाकं करिष्य इति दंगमन्वाधानं करिष्य इति न्वाधाय पूर्णपात्रनिधानांतं पूर्ववत्
कुर्यात्॥ ॥मैत्रोक्तदेवतानां तु तूष्णीमेवाथ निर्वपेत्। चतुरश्चतुरो मुष्टीन् प्रोक्षणं तथा
भवेत्॥८४॥सहैव श्रपयेत्तत्र नास्ति मुद्धरणं तथा। आदिष्टमंत्र होमेषु सर्वत्रैवं प्रणीयता
मिति॥८५॥अस्यार्थः। विधायमान होममंत्रेषु मंत्रार्थानुसारेणात्तन्नदेवतार्थं चतुरश्चतु
रो मुष्टीन् तूष्णीं निरूप्य तथैव प्रोक्ष्य सहैव श्रपयेदिति। अनुत सहैव श्रपणं भवतीत्यन्य १५३

त्रदेवताभेदात् स्थालीभेदं कल्पयित्वा होमविधानं भवति। इह तु अष्टकाकर्मणि पृथक् श्रपणाभा
वान्नास्त्येव। ततः मुद्धरणमपि सुतरां लुप्तं। अत्र च प्रसंगात् परिभाषां करोति। आदिष्टमंत्र
होमेषु सर्वत्रैवं प्रणीयता। हुत्वाज्य भाग पर्यंतं जुहुयात् स्वगृह्योक्तितः॥८६॥अग्नये स्वाप
च ग्रीष्म इत्यादयस्तथा। अविज्ञातस्वरो मंत्रः सोत्र एकश्रुतिर्भवेत्॥८७॥अस्यार्थः॥ यत्र यत्र
वैदिककर्मत्रेहोमार्थं सहैव श्रपणं भवति। मुद्धरणमपि नास्ति। निर्वाप प्रोक्षणे तूष्णीं भव
तः। एवं पूर्वोक्तत्रापि सर्वत्र अस्तं तथा तत्राज्यभाग पर्यंतं स्थालीपाकं कृत्वा वक्ष्यमाणैः
सप्तभिर्मंत्रैश्चरुं जुहोति। तानेव मंत्रानाह। अग्नये नयस्व पथा राये अस्मानिति द्वे ऋचौ। ग्रीष्मो
हेमंत इत्यादयः पंच अष्टकाख्यं उक्तः। अविज्ञातः स्वरगतो मंत्र तत्र स्वरसंदेहे एकश्रुत्यैव प
ठितव्यो भवति। सोत्र इत्युपलक्षणं। सुराप रिज्ञानमात्रेप्येवमेव पाठः। ततः स्विष्टकृतं हुत्वा हो
मशेषं समापयेत्। अथाचारदर्भान्तं श्राद्धं पार्वणवद्भवेत्॥८८॥उद्धृत्य भोजनार्थान्नाद्
हुत्वाथ पाणिषु। सोमायेति नुमंत्राभ्यां मेक्षणेन करेण वा॥८९॥एकैकामाहुतिं केचिद्दिग
ह्येव प्रजुह्वतीति॥ ॥अस्यार्थः॥ ततः स्विष्टकृतं हुत्वा तत्र स्विष्टकृतमिति अग्नविशेष

Indira Gandhi National
Centre for the Arts

पास्विष्टकृतमग्निं हुत्वेत्यर्थः। होमशेषं समापयेत्। समाप्ते होमे आचमनादि सर्वं पूर्ववत्कृत्वा प्र
धानभूतमष्टकाश्राद्धं करिष्य इति प्रतिज्ञाय क्षण दान विप्र प्रक्षालनादिकं श्राद्धं माछादनां
नं पूर्ववत्कृत्वा अग्नौकरणावसरे पिंडपितृयज्ञविधानेनाग्नौ इति कृत्वा श्राद्धं माछादनांतं पूर्व
वत्कृत्वा। अकादेवसमुद्धृत्य प्रश्नरहितेनैव अवदानधर्मेण सर्वेषु विप्रपाणिषु पूर्ववद्धुत्वा
त्वा मेक्षणेन करणवा जुहुयात्। केचित्तु एकामाहुतिं गृहीत्वा एकैक विप्रहस्ते जुहोति॥ ॥
प्रातिलहुतेन च अन्नेषु अन्यदन्नं ददात्यथा॥५०॥ उदीच्याः प्राहुरत्रैवं न प्राश्नीयात्करे हुतां नि
धायतद्धुतं पात्र आवमपात्रेशोदिति॥५१॥ अस्यार्थः। विप्रपाणिषु अन्नेषु हुतेषु विप्रे
भ्यो निक्षिप्तेषु सत्सु अन्यदन्नं परिवेषणीयमित्यर्थः। अत्र नक्षण विषये उदीच्य देशीया आचार्याः
पाणिहुतमन्नं ब्राह्मणा न भक्षयंति इत्याहुः। तत्पक्षे कथमित्यत आह। ब्राह्मणाः पाणिहुतं भोजनपात्रे नि
धाय आसनदेशात्किंचिद्दूरं गत्वा आचम्य पुनरागत्य स्वासनेषूपविशेयुः। संपन्नवचनांतस्याछेष
पिंडार्थमुद्धरेत्। ब्राह्मणानां समीपस्तु पिंडनिर्वपणं न देत्॥५२॥ न कार्यमग्निं प्रत्यस्य दिश्याद्यत्रतु १५६

कर्मणि प्राशयेन्मध्यमं पिंडं श्राद्धशेषं समापयेत्॥५३॥ संपन्नवचन पर्यंतं श्राद्धविधानं कृ
त्वा उक्तशेषं पिंडार्थमुद्धृत्य ब्राह्मणसमीपे पिंडदानं कुर्यात्। अस्मिन्कर्मणि विद्यमानेष्व
ग्नौ अग्नेनमयाः श्वत्रस्तो भरत्सादिभिर्मंत्रैः अग्न्युपस्थानं न कार्यं कुतः पक्षे पिंडपितृयज्ञवि
धानेन नास्ति तत्राग्निं प्रत्यस्यादि नास्ति पाणिहोमपक्षे अथ नास्ति। एवं सर्वत्र ज्ञातव्यं मध्यम
पिंडं पत्न्यै प्रयच्छति सा पत्नी पिंडं गृहीत्वा प्राशयेत्। पूर्ववदन्यत्सर्वं श्राद्धशेषं समापये
त्॥ ॥ इत्यष्टमी श्राद्धविधिः॥ ॥ अन्वष्टक्यं च पूर्वेद्युः मासि मासि च पार्वणं चतुर्थं वाग्नि
होमस्यास्पिंडाश्चाग्निसमीपतः॥५४॥ काम्यया त्वपि यदृष्टं पामेको दृष्टं तथाष्टमं चतुर्थं
वकरे होमः स्यात्पिंडाश्चात्र द्विजांतिके॥५५॥ पिंडनिर्वपणं केचिन्नेच्छंत्यस्मिन्चतुष्टयं
अन्वष्टकां न वेत्कर्म न रम्यं पितृयज्ञवदिति॥५६॥ अस्यार्थः। अग्निहोत्रमपाणिहोमपा
व्यवस्थामाह। अन्वष्टक्य अष्टकायामनु अन्वष्टक्यं नवमीश्राद्धं पूर्वेद्युः सप्तमी श्राद्धं
मासि मासि प्रतिमासं कृष्णपक्षे कस्मिंश्चिद्विषम दिने साध्यं। वक्ष्यमाणं चतुर्थं पार्वणं द
र्शश्राद्धं। एषु श्राद्धेषु साग्नीनामग्नौ होमः। पिंडानपि अग्नि समीपे बर्हिषि दद्यात्। अर्थ

Indira Gandhi National
Centre for the Arts

देघे वच्चतुर्थ्वे वपिंडपित्यज्ञविधानं वृत्तिर्नेवति। काम्यंपुत्रधनादिकामनयाक्रियमाण
दर्शवि वाहादिषुक्रियमाणं वृद्धिश्राद्धं। अष्टम्यामष्टमीश्राद्धं। एकोद्दिष्टमेकमुद्दिश्यक्रि
यमाणं श्राद्धं। एषुचतुर्षु पाणिहोमः तथा द्विजसमीपे आस्तीर्णबर्हिषि पिंडनिर्वपणं।
(इतरत्सर्वं मघ्ये) अस्मिन्काम्यादिचतुष्टये पिंडदानं केचिन्नेच्छंति। तत्र सानुपिंडदानमेवन
भवति। इतरत्सर्वं मघ्ये दानादि पाणिहोमश्च सर्वं नवश्यं वृद्धं गेत्यत्रात्रैव निरूपितत्वा
त्। एकोद्दिष्टे नावाहनं नाग्नौकरणमिति यदाहुः। तत्राग्नौकरणनाद्देन अग्नौ च वहो
मस्य निषेधः। पाणिहोमस्तु कर्तव्य एव। काम्यादौ कोद्दिष्टं तेषु पाणिहोमस्य विषयत्वा
त्। अन्वष्टक्यमिति। अन्वष्टक्यं कर्म तद्वक्ष्यामि त्वेनु। अष्टकायाः अनुपश्चात्क्रियमाणं
अन्वष्टक्यं तद्दधिपिंडपितृयज्ञवदित्यर्थः॥ दक्षिणाप्रवणे वाग्निं निधाय प्रज्वल्य यज्ञं तं त्रिःप
रिस्तीर्य तं दर्भैः समूलैरप्रदक्षिणं॥५७॥ अग्निप्रणीतवक्र्च्यन वेदेवं परिस्तृतिः। अकंप
यात्रिदं कुर्यात्परिस्तरणमत्र तु॥५८॥ अस्यार्थः॥ ॥तत्र प्रथमं दक्षिणाप्रवणे देशे अ
ग्निं स्थापयित्वा तमग्निं प्रज्वलीकृत्य आचमनप्रतिज्ञानादि कृत्वा समूलैर्दर्भैरप्रदक्षि ५५

पं तमग्निं त्रिःपरिस्तीर्य अन्नपरिस्तरणमकंपयन्करोति। अकंपनं नाम आस्तरणेपयो
गिमात्रं प्रदक्षिणकरकंपनं कुर्यात्। इतराव वयक्त्वालनं न कार्यमित्यर्थः। तथैव पात्रासादना
र्थं दर्भानास्तीर्य तथैव वार्थोत्स्थाल्यादीन्यासादयेत्। ॐ दर्भतारं वै वपायसं श्रपयेत्तथा॥
कुर्वीत दधिमंथास्यं मधुमंथाख्यमेव च॥५९॥ श्रपयित्वा च तन्नग्नौ दधिमंथानधिश्रयेत्।
सक्तवो दधिमिश्रास्तु दधिमंथाः प्रकीर्तिताः॥६०॥ मधुमंथाः प्रकीर्तिते मधुमिश्रास्तु सक्
वदन्ति॥ ॥अस्यार्थः॥ ॥चतुःश्रपणकाले ॐ दर्भतारं पायसमिति द्वयं तत्र मंत्रा श्रपय
त्। ततः दधिमंथद्रव्यं मधुमंथद्रव्यं च उत्तरत्रोपयोगार्थं पात्रे स्थापयेत्। ततः अग्नेः सका
शात् उल्मुकं गृहीत्वा यथापूर्वमतिप्रणीतं स्थापयित्वा अतिप्रणीतमग्नेरपि तत्र वेदेवं परि
स्तृतीति निर्दिहेदकथितत्वादतिप्रणीतं च त्रिःपरिस्तृणाति। अस्मिन्नेवाष्टकाश्राद्धे अ
कंपयन्परिस्तरणीयादितिनियमः। चतुःश्रयपणानंतरं दधिमंथद्रव्यं मधुमंथद्रव्यं च
तत्र समीपे अधिश्रपयेत्। दधिमंथमधुमंथद्रव्ययोः स्वरूपं स्वयमेव कथयति। दधिमि
श्रिताः सक्तवः दधिमंथद्रव्यं। मधुना मिश्रिताः सक्तवः मधुमंथद्रव्यं॥ ॥कुर्यात्स्थलेरवे अ

Indira Gandhi National
Centre for the Arts

वस्तीर्य सकृच्छिन्नं दद्यस्त्वने॥६१॥ अनिधार्य क्रमेणैनानुद्वासयनिपूर्ववत्। मात्राद्यर्थं पृथक्कु
र्यात्कनिपुंसाप बर्हणं॥६२॥ कृत्वेध्माधानपर्यंत ब्राह्मणानुपवेशयेत्। कांश्चिद्विप्रान्पि
तृश्राद्धेस्त्रीन् श्राद्धेकांश्चिदेवतु॥६३॥ अस्यार्थः॥ ॥नूतनले नैव मंत्रेण लेखाद्वयमुल्लिख्य
प्रोक्ष्य तत्र पूर्ववद्दर्भास्तीर्य निष्पन्नानेतांश्च स्तून्पूर्ववद्दत्त्विधार्योद्गुद्वास्यान्तः प्रत्यक्
क्रमेणाप्त्वापमीत्वापित्राद्यर्थं कांश्चित्पूर्ववर्हणं संपाद्य मात्राद्यर्थं च संपादयेत्। पुवायामाज्ये
सेचनमंजनाभ्यंजनादिकं च सर्वं संपाद्य इध्महोमांतं कृत्वा श्राद्धारंभं कुर्यात्। प्रतिज्ञास
णादि सर्वं कृत्वा आसने ब्राह्मणानुपवेशयेत्। तत्र पित्राद्यर्थं कांश्चिन्मात्राद्यर्थं च कांश्चि
त्। एवमुभयार्थं ब्राह्मणानुपवेश्य आसनादि दद्यात्॥ नोहेन्मात्रर्घ्यपात्रेषु तिलान्वाप
पितॄन्पदं। अपः प्रदानमंत्रेषु मात्रादिपदमावपेत्॥६४॥ वासः प्रदानपर्यंतेन दत्वा कृत्वा
नयत्र च। मधु मधु हविर्द्रव्यमुध्दृत्य तु दद्यात्॥६५॥ अनुज्ञातो द्विजैस्तद्वत् जुहुयाद
उतिद्वयमिति। अस्यार्थः पित्रर्थमर्घ्यत्रयमासाद्य मात्राद्यर्थं च तथैवासाद्य क्रमेणोद
कप्रक्षेपणं कृत्वा नान्नो देवीरित्यनुमंत्र्य तिलोसीति मंत्रेण पितृपात्रे तिलान्क्षिप्त्वा मातृ १५६

पात्रेष्वपि तिलान्प्रक्षिपेत्। अत्र मातृपात्रेषु तिलप्रक्षेपणमंत्रे पितॄनिति पदस्थाने मातृ
परं नोहेदिति। अर्घ्यदानावसरे पितरिदं ते अर्घ्यमित्यादिप्रकारेण सर्वत्रार्घ्यं दत्वा अग्नौक
रणहोमार्थं मधु मधु वर्जं छदनादि चतुष्टयमुध्दृत्य अग्नौकरिष्य इति पृष्ट्वा तेनैव तैः क्रियता
मित्यनुज्ञातः आहुतिद्वयं जुहुयात्। हविः श्चतुष्टयात्केचिद्रूपविरस्त्वाहुतीरिह॥६६॥ संपन्न
त्वं नांतं स्यादन्नदानादि पूर्ववत्। उद्धृत्य चतुष्कनोषान्नमेकीकृत्य च पश्चाद्भिः॥६७॥ पूर्वरेखा
मध्ये रेखायां पितॄणां निनयेज्जलं। शुंधंतामिति पित्रादि मात्रादि पदमावपेत्॥६८॥ दत्वा
पिंडान्पितृभ्यस्तु मात्रादिभ्यो ददात्यथ॥ मातृपिंडेषु निनयेत्सुरां वा त्वाममेव वा॥६९॥ ॐ
दनाग्रद्वं प्रादुरास्वामंहिमनीश्वरणाइति। अस्यार्थः। केचित्तिमते हविषश्चतुष्टया द्वे
कस्मात्॥ आहुतिद्वयं द्वयं नान्यामेवमंत्राभ्यां होतव्यमिति। तत्पक्षे अष्टाहुतयो भवंति
अन्नदानं भोजनादि पूर्ववत्संपन्नं त्वचनांतं कृत्वा ब्राह्मणानुकरोत्यान्नमुध्दृत्य पंचभि
द्रव्यैः सह एकीकृत्य पिंडदानं कुर्यात्। तत्र शुंधंतामिति मंत्रेण प्रथमरेखायां पित्रादीनां
मुदकसेवनं कृत्वा तथैव मात्राद्यर्थं द्वितीयरेखायामुदकसेचनं कुर्यात्तत्र शुंधंतां मात

Indira Gandhi National
Centre for the Arts

रइत्यूहः कर्त्तव्यः। अनंतरं पितॄणां पिंडदानं कृत्वा मातॄणामपि दत्वा पुनरपि पिंडस्योप
दिसेचनसमये मातृपिंडेषु सुतरां वा आवामं वा निनयेत्। अत्र सुरानिनयनं कलौ
निषिद्धमिति आस्वामनिनयनमेव विहितं। अतस्त्रावामस्वरूपमाह। ७० दनागृइ वृमिति
वकप्रवणसमये स्थाल्याम् उदकं तथा देयं यथा निष्पन्ने ७० दनेनाम एव स्थाली अधोनी
त्वा पात्रांतरेण तदग्रद्रवं मंडं गृहीत्वा तेन शुंधंतां मिति मंत्रत्रयेण मातृरेखासिंचेनूर
तिवदविद्व आ ऊ। इदमत्र गह्यं स्त्री न्यश्च सुरावस्वाममित्याधिक कर्षूषेके दद्याः षट्
सुवा स्पर्श सुपि कन्योद घादपरा सुस्त्रीन्याइति। स्त्री द्वित्व वा बहुत्वे वा नेत्रा ऊहस्या हयि
ष्यते। ७०॥ निर्दिष्टानामनीत्वेहना मानित्व बहूनित्वा॥ नामदि यचूनां तस्मा द्वयोरप्येकनाम
चेन्। ७१॥ नोहे स्यादिति युवा ऊहा नेका रव बोधयति। अस्यार्थः। एततेदेवद्रत्यय त्वाम
त्रानु इति मंत्रेण त्रिभ्यः पितृभ्यः दत्वा। तथैवमातृपिंडदाने पिएतत्ते यज्ञ यदे वत्ताम
त्राविति मातृभ्यो दद्यात्। तत्र यदि द्वे मातरौ स्यातां बह्व्यो वा स्युः तदा प्रकारांतरेण मंत्र ५७
आहामंत्रगतस्य नेत्रा ऊहस्य तु हा न देति। एतद्यां यमुना सरस्वत्यौ यच्च त्वामत्रानु बहुत्व

॥श्री॥ एतद्वो गंगा यमुना सरस्वत्यो यच्च त्वामत्रानु। यदि द्वयोरपि मात्रोः समानमेव नव त्वितदात
देवनाम द्विवचनी तमुच्चरेत्। यदा बहूनि वा नामानि समान्येव तदा ऊहवचनं। अत्र यच्च त्वा
मत्रान्वितित्राऽस्वांत स्तु हमिच्छंति। तद्धेति कारस्य नानि प्रेतमि सा हा जयंतः स्वामिनः शि
ष्या ऊहं कुर्वंति या इति। ७२॥ द्वित्वे युवा बहु त्वे युष्मानीति पदं वदेत्। अनूह नं कपिंडानां
स हो स्याद नुमंत्रणं। ७३। अन्यजाया पदं द्वित्वे बहुत्वेप्यद्भूमित्यथ। द्वितेजा यां पदं ब्रूया
द्धऊद्ध्वे ऊः पदं वदन्। ७४॥ अस्यार्थः। जयंत संप्रदायिनः त्वास्त्रोतर दृष्ट मूलमंगीकुर्व
ति। यदि द्वे त्रियो स्यातां तदा युवमत्रान्विति ऊहः। यदा बह्व्यः तदा युष्मानत्रान्विति।
एव पिंडदानं कृत्वा नुमंत्रमाह। अत्र पितरो मादयध्वमित्यत्र मातॄरा ऊहस्य तु ह वर्जयितेव
षाहूं ऊनां सह कृत्वा वितेन मंत्रेण अनुमंत्रणं भवति। अन्यं जनोजनमंत्रे नूहः। पितृविषय
दर्शश्राद्धवदजनादिकं भवति। मातृविषय तु। यज्ञदत्तत्र न्यस्वात्तत्र यदि द्वे मातरौ बह्व्यो
वा तदा क्रमेण नंदा नंदा इति अन्यं जाथां। नेदा नंदा कृषुत्र न्पड्। तथैवा जनपि स्वाष्टमेन तत्
। दद्याद् द्वे वा मन् ऊहनमंत्रे स्यादिति रिष्यते। अनूह नेव पिंडं ईश्वरा कृदेवापतिष्ठता। ७५॥

अनूहेनोनयेषांस्याद्युगपच्च प्रवाहणं। पिंडदानमनूहेन मंत्रस्याद्वतिरिष्यते॥ ७ धापिं
डदूयमनूहेनपत्नीवेप्रादायेदथास्यासात्रो त्सर्गपर्यंतश्राद्धशेषं समापयेदिति॥ ७॥ त्र
स्यार्थः॥ ॥ततःपित्र्यपिंडदत्वाद्वत्वामातृपिंडपितृनेवमंत्रेणानुहवर्जं दद्यादिति। एवंपिं
दान निर्धिं समाप्य प्राद्यानावसरं तं तिद्वयस्य मध्यमा पिंड द्वयं तु हवर्जं तेनेवमंत्रेणप्रदान
नवति। यत्रतु नवदेवत्य श्राद्धं नवति। तत्र पंक्तित्रयस्या मध्यमपिंडत्रयप्रादानं नवतिदस्रा
दिद्दष्टव्यं। ततःपात्रोत्सर्गपर्यंतं श्राद्धशेषं समापयेदिति। अत्र नगवान्। नवम्या सुवरेश्छो
द्धमन्वष्टक्यानिधानकं। नासिंडपितृयज्ञोक्तप्रकारेण समाप येत्। निमंत्रणादि विप्राणाम
घ्यदानावसानकं। अनाहिताग्नेः कर्तव्याप वं श्राद्ध वदाचरेत्। तत्र यद्यष्टका पूर्वपश्च क
ल्पेन कल्पना। तदानस्य पर्वणो मोसंयुक्तमुक्तावतोपिंतां। विप्राणां नोजनार्थाय विनिविद
त्राण्युपानयेत्। नतुहोमाय मांसेन होमानास्य तत्र कर्मणि। दक्षिणानंतर देशस्छंडिलं परि
कल्पयेत्। परिश्रयं चतद्दाम थवा न परिश्रयेत्। परिश्रयण पक्षे धकुर्यात् द्वारमुत्तरे।
मूलेन कल्पितेद नैः रधस्तात् सति कल्पिता। अप्रदक्षिण मंत्रैः परिस्तरणमाचरेत्॥ १५८

शुद्धान्नं कृसरान्नं च पायसं दधि सक्तवः। मधुमंथाश्च षेत्येवं पंचान्नस्य रवः स्मृताः। सक्तवो मि
श्रितादध्ना दधिमंथाद्दतिस्मृताः। मधुमंथे विनान्येषां त्वनुणां होमा यिष्यते। केवलं पिंडदाना
र्थो मधुमंथपरिग्रहः। तत्र शुद्धादनादी स्त्रीन्यवदोपासनानले। नत्रे वदो धेमथानमप्याधिश्रि
त्यानि धार्य च। उत्तरत्रावतायाग्नेः पुनरप्यानिधारयेत्। एवमेतानि त्वतारिहुविंषितुयथा
क्रमं पश्चिमेग्नेः परिस्तीर्णे दर्भे धिववि निक्षिपेत्। लेखोल्लेखन वेलायां दुलेखत्रल्लेखनयो
ः पितॄणां पिंडदानार्थो पूर्वास्तीर्णां तु पश्चिमा उत्तेवत्सरुदा छिन्ने स्तीर्ण प्रच्छादयेत्क्रमा
त्। यद्वा पिंडप्रदानार्थं तु वटद्वितयं खनेत्। लेखाद्वितयं वत्सर्वे पश्चिमरच्छयथाक्रमं कुर्या
त्त्वपथा कारयेदिमां त्रिप्यव दानिषट्का कल्पयेत्तु हूर्वत्र पित्र्यर्थं मातृत्रयं। कुर्यादनस्र
पाणि कल्पयेदवदानिषट्। कल्पयेत्त यगवेषां कत्वा पुंसा यदूहेणं। होमकाले तरतन्या
न्मधुमंथविवर्जितान्। उद्धृत्य पात्रष्वन्येषु पृथक्कृतित्वान्व सर्पिषा। अवदायानु पूर्वेण पा
र्वण श्राद्धहोमवत्। जुहुयात्समनुज्ञाप्य पित्रर्थे ब्राह्मणान्वृतान्। अथ तान् नोजयेद्विप्रान्
त्पारस्युक्तयथातथा। नुक्तवत्स्वथ विप्रेषु पिंडादद्याद्यथा विधि। तत्र प्रकल्प्य षट् पिंडान्

मधुमंथविमिश्रितान्।स्त्रीस्त्रीन्।पिंडान् पितृभ्यस्त्रीभ्यश्च निवपेत्क्रमात्।देशोपित
न्यः पूर्वत्र तथा स्त्रीभ्यस्तु पश्चिमे।पिंडान्पृथक् दद्याल्लेखयोरवटेषु वा।स्त्रीपिंडदानमंत्रा।
णामूहं च परिकल्पयेत्।शुंधंतां मातर इति प्रकारेण यथार्हतः।एकत्र पिंडभागिन्यौ द्वे स्यातां
यादेतत्रस्तु।एतद्वां रुद्रदे यत्तदे पिंडं याश्च वामनु।इति ब्रूयादथैकस्मिन्पिंडे बह्व्यस्तथा सनि
एतद्वो यत्तदे श्री देरुद्रदे याश्च वो न्विति।स्त्रीषु पिंडेषु सुरामा च माधिकं तिनोत्।००दनाग्राद
केशाकुत्साचाममिति स्मरयः।अंजनादिप्रदाने च स्त्रीणां द्वित्वबहुत्वयोः।पत्नदेरुद्रदेस्या
चैतन्मूहं परिकल्पयेत्।एतद्वो मातरो वासो मातरो युद्धं मिस पि।उहं प्रकल्पयेत्स्त्रीणां
वासोदानं प्रदापयेत्।उभयेषां च पिंडानां सकृदेवानुमंत्रणं।उपस्थानं च मंत्रपूतं च यस्मा
त्र वाहणं।कल्पयेत्स्थगवैषां कनिष्ठं वा पवहेणं।न वावरान्द्विजान्पुत्रिषु कमेणु भोज
येत्।अत्राको सप्तपंचत्रीन् युग्मांश्च यथाबलं।समत्वपक्षे पित्रादि द्वितयस्य त्रयस्त्रयः।
वरणीयस्य तृतीयस्य त्वेक एवा वरिष्यते।पंचपक्षे तु पित्रर्थं वरणीयाः स्त्रयाम्यायाः। १५८
द्वयेः प्रत्येकमेकेको वरणीया विनिष्यते।अत्राष्टकाप्रकरणोक्तिं विद्दिचार्यते।अष्टकाना

ष्टेन सप्तम्यादिनवम्यंतदिनत्रयसाध्यकर्म।तत्रापि सप्तमीनवम्योः पिंडपितृयज्ञवदित्युक्तोऽष्ट
ष्टम्यां तु स्थालीपाकविधानेन श्राद्धं।एवं दिनत्रयेपि।अन्वष्टकाब्दवाच्या नवमी।अत्र सूत्र
कारिकायामपि वर्गत्रयमातृश्राद्धपार्थक्यं निरूपितं।तत्र गृह्ये पिंडपितृयज्ञकल्पेनऽष्टा
मधुमंथवर्ज्योतिन्न्यो दद्यात्स्त्रीभ्यश्चैसाधिकं।एवं गृह्ये अन्वष्टकाश्राद्धमातृश्राद्धं पृथक्पृ
थगिति ब्राह्मणाभिमंत्रणपिंडदानं यथा पित्रादीनां तथा मातॄणामिति।उक्तस्थले निवर्तनं पृथ
थगिति ब्राह्मणानिमंत्रणपिंडदानं यथा पित्रादीनां।कांश्चिद्विप्रान् पितृश्राद्धे स्त्रीश्राद्धे कांश्चिदेव तु।सप्तम्यां तु
निस्यन न तथात्र कारिकायामपि।सप्तम्यां पिंडपितृयज्ञशब्दोच्चारणेनात्रेन यथा अन्व
गृह्ये पूर्वेद्युः पितृभ्यो दद्यादिति।अत्र सप्तम्यां पिंडपितृयज्ञकल्पः परिगृह्यते।शास्यते च गृह्येतु शास्त्रन्यायेन।सप्त
ष्टक्ये कथमत्र सप्तम्यां पिंडपितृयज्ञकल्पः परिगृह्यते।तत्र सप्तम्यां पिंडपितृयज्ञवत्त्वं न तिवकस्मान्नोक्तं
मीनवम्योः सामान्यादिह कर्मेति न भवति।नह्येत्रापि पिंडपितृयज्ञवत्त्वं न तिवकस्मान्नोक्तं
अन्वष्टक्ये पुनः स्त्रीभ्यश्चैसाधिकमिति ज्ञापनार्थं।नवदैवत्यविधानदर्शनात्।सप्तम्यां तु
अमावास्यायां च पुरुषाद्वैनान पितृयज्ञपुरुषाद्वैनान पितृयज्ञविधानेन श्राद्धेन द्दष्टत्वा
प्तिर्भवति।किंच।अग्नौकरणसप्तमष्टाकुतयः।त्वनुईन्नाकुनयावा एकैकस्य ब्राह्मणह

स्तुनवंति। अन्वष्टक्येतु तत्रोक्तमेवद्रव्यं गृहीत्वाआहुतिद्वयं भवनीसर्वं रूपविशेषज्ञापना
र्थेवा। एवमत्र भेदो निर्द्दिष्टरितः। शातातपेनतु यद्वद्वयमुक्तं। अन्वष्टकासु वृद्धौच प्रतिसंव
त्सरं तथा। अत्र मातुः पृथक् श्राद्धमन्यत्र पतिनासह इति तथा। अष्टकासु च वृद्धौ च गयायां
च मृतेहनि। मातुः श्राद्धं पृथक् कुर्यादन्यत्र पतिनासह इति। अत्र पदद्वयं अन्वष्टकापदमष्टका
पदस्य वर्त्तते। अष्टं न्वेकासु वृद्धौच) नाम नवमी श्राद्धं॥ तत्र मातुः पृथक् श्राद्धं। अष्टकानाम
सप्तम्यादि नवम्यंतं दिनत्रयं सा एकमेव उच्यते अथवा दिनत्रयमध्ये पित्र्यष्टका अत एव चन्द्र
स्तिंहः। माघमासस्य सितेपक्षे याष्टमी समुपस्थिता। अष्टमी त्वष्टकाख्याता नांउकं तामंतं हि
दमिति। अत्रापि मातृश्राद्धं पार्थक्यं। तत्र नवति। अत्रैव कारिकायामष्टमी श्राद्धं सतिलस्था
लीपाकं। अथास्विष्टकृतं हुत्वा होमशेषं समापयेत्। अथाच्छादनदानांतं श्राद्धं पार्वणवद्भ
वेत्। नित्यवचनात् षट्पुरुषोद्देशो नेव न वति। पार्वणवद्भवेदित्यत्र पार्वणदर्शश्राद्धं तच्च षड्दै
वत्यं तदा हगानमर्थः। पितरो यत्र पूज्यंते तत्र मातामहा अपि। अविशेषेण कर्तव्यं विशे
षान्नरकं व्रजेदिति। अतः कुत्रवा पार्थक्यं मातुः श्राद्धं अष्टकासु वृद्धावेता दिवाक्यपा। १६०

र्थक्यं निरूपितं। शाखानां रूपेन न त्रिवारयितुमशक्यं। यद्येवं व्याख्या क्रियते। अत्राष्टकाशब्दः।
अन्वष्टकोपलक्षणार्थः। अष्टकाकर्मनाम॥ ॥तत्रान्वष्टक्य गृह्यकारिकायां स्मृतिशास्त्रं
तरेषि च स्त्रीणां पार्थक्यं प्रतिपादितं श्राद्धं। अत एव न विरोधः। तत्रान्वष्टकादौ श्राद्धं मातुः पा
र्थक्यं नदान श्राद्धं नवदैवत्यं भवति। नवदैवत्य श्राद्धं स्त्रीणां कुत्रवा निवेशप्रतिसंदृह्ये वा क्ष
हाणां निर्णयः क्रियते। तथा च स्मृत्यन्तरे। क्षयाहे केवलाः कार्या वृद्धावादौ प्रकीर्तिताः। सदैवे
त्वमध्यस्थानां त्याः कार्याः समातर इति। अपा दै नैव लं मातर एव। वृद्धौत्वन्युदयिके आदौ प
क्तिः॥ ॥अन्वष्टकादौ मध्ये निवेशाः॥ ॥किंच॥ महालये गया श्राद्धे वृद्धौ चान्वष्टकासु च न
वदैवतमत्रस्यात् शेषंपाद्योर्षिकं विदुरिति वचनात्। अन्वष्टक्यमध्य एव निवेशः साधितः॥
मंत्राणामूहाद्विषये किंचिदत्र प्रदर्श्यते। अर्घपात्रनिलावपने निलोसीति मंत्रे पितृशब्द
स्य तु हानकार्यः। प्रकृतावसमर्थत्वात्। पार्वणं हि तस्य प्रकृतिः। तत्र पित्रादयस्त्रयो भवति।
तत्र पितृशब्दस्त्रियं च तुमसमर्थः। अत्र पितृशब्दः सामान्यवाचकः। अत एव पितृशब्दो
च्चारणमात्रेण पितरो मातरः पितृव्यादयश्च आयांति। तथा च संग्रहः। आयंतु नस्तिलोसीति

Indira Gandhi National
Centre for the Arts

उक्तं तस्त्वेतु यानितु केवलाः पितृव्यो नाम्नदस्तु पितृसामान्यवाचक इति। पार्वणप्रसंगेन मया
सर्वमभिहितं। न चाप्यत्र स्वरचना कृता। अत्र वैश्वदेवौ कामकालौ। तथा च गौरवः। इष्टिश्राद्ध
क्रतुर्दक्षो वसवः प्रकालकालकौ। नांदीमुखे सत्यवसू काम्ये च धूरिलोचनौ। पुरूरवार्द्रवौ
चैव पार्वणे समुपस्थिते। नैमित्तिके कामकालावेवं सर्वत्र कीर्तयेत्। नैमित्तिके सपिंडी
करणं॥ ॥इति नवमीश्राद्धविधिः॥ ॥एवं सप्तम्यादिदिनत्रयसाध्यमाष्टकाकर्म समाप्तं॥ ॥
अथ भाद्रपदे मासि महालयेऽपरपक्षे कृष्णाष्टम्यां विधीयते। अष्टकाकर्मवत्कार्यं सप्त
पुनरष्टकाविधानेन माघावर्षाख्यः श्राद्धविशेषऽन्य नामा माघावर्षे नूनस्य कृष्णाष्टम्यां
विधीयते। अष्टकाकर्मवत्कार्यं सप्तम्यादि त्र्यहस्तु तत्र॥७८॥ अस्यार्थः॥ ॥एतदपि कृत्स्नं
कर्म उक्तेनैवाष्टकाविधानेन समानमिति तदपि सप्तम्यादिदिनत्रयसाध्यमिति भावः। मा
घावर्षेति नामभेदः। अत्र भगवान्। एतेनैव प्रकारेण माघावर्षाभिधानकं श्राद्धं प्रोष्ठप
दमास कृष्णपक्षे समाचरेदिति॥ ॥माघ इति माघ्यावर्षे॥ ॥माघावर्षेन नरस्य कृष्णपक्षे क्व
चित्तु। अन्वष्टक्यवदेव स्यात्पार्वणवत्कि वेति॥७९॥ ॥अस्यार्थः॥ ॥नमिन्नेव १६१

भाद्रपदापरपक्षे कस्मिंश्चिद्दिने अन्वष्टक्यविधानेन माघावर्षनामश्राद्धं कुर्यात्। किन्तु पार्वण
वेति वदेति। पार्वणप्रकारेण कुर्यादित्यर्थः। इति माघ्यावर्षं॥ ॥अथ प्रतिमासमपरपक्षे कर्त
व्यं मासिश्राद्धं॥ ॥प्रतिमासं तु वत्कृष्णपक्षे युग्माह्नि कुत्रचित्। पितृभ्य एव तच्छ्राद्धमन्वष्टक्य
×मासि× विधानतः॥८०॥ ॥अस्यार्थः॥ ॥सर्वदा प्रतिमासं कृष्णपक्षे कस्मिंश्चिद्द्विष
मदिने पितृभ्य एव श्राद्धं कर्तव्यं। अन्वष्टक्यविधानवदिति। पिंडपितृयज्ञसमं तद्दिनान्ना
चः। अन्वष्टक्यस्तु मात्रादिभ्यः पि दीयते। न तद्दनं कर्तव्यमिति विशेषः। पिंडपितृयज्ञसाम्या
त्षड्कृषाद्दानं कर्तव्यमिति सिद्धं। एतदर्थं मंत्रे वपितृभ्य एवं स्याद्। अन्वष्टक्यं स्व पूर्व
द्युर्मासि मासि चपार्वणमिति मासिश्राद्धं यदुक्तं तदेतद्वै प्रयत्नतः। इदमत्र गृह्यं॥ ॥एतेन
माघावर्षं प्रोष्ठपद्याऽपरपक्षमासि मासिन्वेवं। पितृभ्यो युक्तं प्रति ज्ञापयदिति। जयंतः।
मासमासे वाऽपरपक्षे ऊर्ध्वं चतुर्थ्याः कस्यांचित्तिथौ अन्वष्टकावन्मासिश्राद्धं भवति। अ
न्वमावास्यं मासिकार्थे पार्वणं वा उभयोरेतत्स्यात् पार्वणं स्यात् विकल्पः। पार्वणपक्षेपि प्रो
ष्ठपद्यापरपक्षेपि तदेव भवति पार्वणं। एतेन माघ्यावर्षं प्रोष्ठपद्यापरपक्ष इति वचन

Indira Gandhi National
Centre for the Arts

सामर्थ्यात्। यथा हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः। अष्टम्यां वेति। अष्टका
प्रकारः क्रियते। तद्यदा पौषपदापरपक्षे अष्टम्यां क्रियमाणं श्राद्धं माघावर्षसंज्ञं भवति।
प्रतिमासमपरपक्षे चतुर्थ्यादूर्ध्वं अयुग्मासु तिथिषु क्रियमाणं श्राद्धं मासिमासि श्राद्धं
भवति। तदेव यदापरपक्षे कस्मिंश्चिद्विषमदिने अन्वष्टक्याविधानेन क्रियमाणं श्रा
द्धं माघ्यावर्षमिति संज्ञां लभते। पार्वणविधानेन वा क्रियमाणमस्तु माघावर्षं माघ्यावर्षं
मासि मासि श्राद्धं नामैव नान्यविशेषः॥ ॥इति मासिश्राद्धं॥ ॥अथ काम्यश्राद्धं॥ ॥पं
चम्यां पुत्रकामस्येत्यादि काम्यं तदुच्यते। श्राद्धं यदुक्तमष्टम्यां तद्दैवतं दिष्यत इति॥८१॥
[illegible]स्यार्थः॥ ॥पुत्रधनादिकामना यां पंचम्यां पुत्रकामस्येत्यादि वचनात्क्रियते तत्का
म्यश्राद्धं। तत्राष्टकाविधानं अष्टम्यां यच्छ्राद्धं विहितं तेन सदृशं कार्यमित्यर्थः। सादृश्यं तु
कतिपयगुणविषयं। यथाष्टम्यां पिंडपितृयज्ञो नास्ति श्राद्धीयाग्नेर्द्विजपाणिषु हो
मः। द्विजसमीपे पिंडनिर्वपणमिति। तथैव काम्यश्राद्धेपि प्रसक्तव्यमित्यर्थः। तत्राष्ट
म्यां स्थालीपाकविधानं श्राद्धात्पूर्वमस्तिमंत्रैरष्टाहुति होमश्च। तच्च काम्यश्राद्धेपि प्रसक्त १६२

व्यमिति गृह्यविदः। विकल्पः पार्वणस्यास्य मासिश्राद्धस्य वक्ष्यते। काम्यश्राद्धे कृते नैव कार्यं
मासि पार्वणं॥८२॥ ॥अष्टमीश्राद्धवत्कुर्यादाहिताग्निस्तु पार्वणमिति॥ ॥अस्यार्थः॥
दर्शे विहितं यत्पार्वणश्राद्धं तन्मासिश्राद्धेन सह विकल्पो द्रष्टव्यः। द्वयोर्मध्ये एकतरानु
ष्ठानेन कर्मसिद्धिरिति। पंचम्यां पुत्रकामस्येत्यादि विहिते काम्यश्राद्धे कृते सति मासिक
पार्वणं नैव कार्यं। काम्यश्राद्धेनैव तु तयोश्चरितार्थत्वात्। यदा काम्यश्राद्धं मासिश्राद्धं वा
तद्द्वयोरेकं क्रियते तदा दर्शे केवलं पिंडपितृयज्ञं समाप्य पश्चात्केवलमेव श्राद्धं कुर्यात्। त
च्चाष्टमीश्राद्धवद्भवति। तथाविधं पार्वणश्राद्धं कर्तव्यमिति भावः। तथाच शौनकः॥ ॥
काम्यश्राद्धमहं वक्ष्ये शौनकाख्य ऋषिसत्तमः। नापुत्रस्य लोकोस्तीति श्रुतिरेषा सनात
नी। देवतानामृषीणां च पितृणामनृणः स्मृतः। ऋषिभ्यो ब्रह्मचर्येण पितृभ्यश्च सुतेन
च। कुर्याद्यज्ञेन देवेभ्यस्त्वाविमं धर्ममाचरेत्। तस्मात्सर्वप्रयत्नेन पितृणामिह कुर्वता
। कत्संगतो यदादित्यः कृष्णपक्षे च पंचमी। श्राद्धमत्र गृही कुर्यान्मासि मासि च वत्सरं।
प्रोष्ठपद्यां हि पंचम्यां पितृमासान्तमाचरेत्। पार्वणविधानेन श्राद्धं कुर्यात्समाहितः।

Indira Gandhi National
Centre for the Arts

यज्ञोपवीती कुर्वीत पुत्रकामो द्विजोत्तमः। तिलार्थे तु यवा ग्राह्या वृद्धिश्राद्धवदित्यतो। पौष्ठपदे
परे पक्षे पंचम्यामाश्वरे सुधीः। दक्षिणा च प्रदातव्या सुवर्णं वा सरीतयतो॥ ॥इति काम्य
श्राद्धं॥ ॥अथाभ्युदयिकश्राद्धं॥ ॥स्यादाभ्युदयिकं श्राद्धं वृद्धिपूर्तेषु कर्मसु॥ ८३॥ प्राङ्मु
खो यज्ञोपवीती स्यादुपचारः प्रदक्षिणं। तिलकार्यं यवैः कुर्याद्युग्मांस्तत्र निमंत्रयेत्॥ ८४॥ अ
स्यार्थः॥ वृद्धिपूर्तेषु विवाहवापीकूपाद्यापतनादिषु कर्मसु आभ्युदयिकं श्राद्धं भवेत्। आभ्यु
कारादत्र प्राङ्मुखो द्विजाउदङ्मुखस्तु कर्ता प्राङ्मुखस्य कर्त्तुः प्राङ्मुखब्राह्मणवारि
नवात्उदङ्मुखत्वं गृह्यते। यत्प्राचीनावीती सेवोदीच्यवीतिन्यायात्। यज्ञोपवीती भूत्वा कुर्यान्मा
तृश्राद्धं तु युग्मैः स्यात्सदैवं प्राङ्मुखः श्रुतिरिति लघुहारीतवचनश्रवणाच्चउपचारः पू
जाप्रदक्षिणं भवति। अत्र युग्मानेव ब्राह्मणान्निमंत्रयेत्। तिलकार्यं यवैः कर्तव्यमिति। तदा
भ्युदयिकश्राद्धं दिनत्रयसाध्यं। मातृश्राद्धं च पूर्वेद्युः कर्माहनि च पैतृकं। मातामहं चोत्तरे
द्युर्वृद्धौ श्राद्धत्रयं स्मृतमिति वचनात्। यदा केवलं मातृश्राद्धं पूर्वं चरंतु तु ता यतेतदा सदै १६३
विकं कुर्यात्। तानदाह गालवातातपः निसश्राद्धमदैवं स्यादेकोद्दिष्टं तथैव च। मातृश्राद्धं तु युग्म

स्यात्सदैवं प्राङ्मुखैरिति। योजयेद्देवपूर्वाणि श्राद्धान्यन्यानि यत्नतः। पूर्वेद्युर्मातृकं श्राद्धं क
र्माहे पैतृकं तथा। उत्तरेद्युः प्रकुर्वीत मातामहजनस्य तु इति पृथग्दिनसाध्यमानमातृश्रा
द्धत्रितिरिक्तानि अभ्युदयनिमित्तानि श्राद्धानि वैश्वदेवसहितानि कार्याणि। दिनत्रयकर
णासंभवे वृद्धशातातपः। पृथग्दिनेष्वशक्तश्चेदेकस्मिन्पूर्ववासरे। श्राद्धत्रयं प्रकुर्वीत वैश्व
देवं तु तांत्रिकमिति। तदाभ्युदयिकं विवाहादिदिने तन्निमित्तं प्रातः कुर्यात्। प्रातर्वृद्धिनि
मित्तकमित्युक्तत्वात्। अत्र प्रातःशब्दः सार्द्धप्रहरात्मकः कालः। ननु पाद्वृद्धिकाल कइति
तदाह गार्ग्यः। लल्लाटसम्मितो भानो प्रथमः प्रहरः स्मृतः। स एव चार्द्धसंयुक्तः प्रातरित्यभि
धीयते। अत्र पूर्वोक्तमात्रादिमनुष्यपितृकत्वं तु धुमुख दिव्यपितृविशेषकान्कृत्वा तदंते द
र्शयेदिति हेमाद्रिणा प्रपंचितं। तत्र समवक्तव्यनांदीमुखं विशेषकास्तु ये तत्र तेनांदीमुखसंज्ञि
ताइति। एते दिव्यपितरः मात्रादयस्त्व मनुष्यपितरः प्राधान्येन। दृश्यः। नांदीमुखत्वं च तद
नेदं दृष्टा मात्रादीनां सिद्धं। अत एव नांदीमुखानां पितॄणामिदमासनमित्यादिकात्यायनी
यप्रयोगवचनं सिद्धं। वृद्धौ केचन प्रजावंतः प्रमुखा भवतीति कथयंति। तत्राश्रुमुखाः

Indira Gandhi National
Centre for the Arts

केतु प्रजावंतः। तथा च ब्रह्मपुराणे॥ ॥पितापितामहश्चैव तथैव प्रपितामहः। त्रयो ह्यश्रुमु
खा ह्येते पितरः संप्रकीर्तिताः। तेभ्यः पूर्वतरा ये च प्रजावंतः सुखैधिताः। ते तु नांदीमुखा नांदी
समृद्धिरिति कथ्यते इति। विद्यमानपित्रादित्रयस्य त्वश्रुमुखत्वं चतुर्थादित्रिपत्तौ त्वाभ्युदय
ः। दुःखवनालेनाच्चतुर्थादयस्तु प्रजावंत एव। अत एव ब्रह्मपुराणे। येस्युः पितामहादूर्ध्वं तेस्युः
नांदीमुखा इति। प्रसन्नमुखसंज्ञास्तु मंगलीयाय तस्तुते। ते तु प्रोष्ठपदपौर्णमामासी
निमित्त एव श्राद्धदेवताः न पुत्रजन्मादिकालिकाः तेषां महालयप्रकरण एव पठितत्वात्। अ
विद्यमानपित्रादित्रयस्य मात्रादित्रयस्य मातामहादित्रयस्य नांदीमुखत्वं अतः क्षांति मि
त्तक माङ्गुदयिकश्राद्धे च न त्विति। अत्र जयंतादिषु काः क्रियन्तां विशेषा अत्र प्रदर्श्यं। स्मृत्यादि
वर्जिता विप्राय सुतादिनिरन्विताः भोजनीयास्तु पुनर्न वृद्धिपूर्वादिषु द्विजाः। पंचादिनिः
स्मृतायस्तु नियमः पार्वणादिषु सप्तधा निवर्तीहेति चंदेत्यागमस्थाप्यणाः। यज्ञोपवीतिना सर्वं
मंत्रकर्म न वर्दिहा। अत्र सर्वत्र युग्मात्सु पचारः प्रदक्षिणं। तिलकर्मणि सर्वत्र नयवैर्कुर्याद्
लक्षणः। इष्यते प्राङ्मुखत्वं च कर्तुरप्युपकल्प्यते। शुचिर्नेतागहंगत्वा नांद्यानाम ग्रगजे १६४

न्मनां। स्वयमेवाथ वा कुर्याद्दन्यस्तेषां निमंत्रणं। द्वौ निमंत्रयते विप्रौ विश्वेदेवार्थमादितः। पितृ
न्यस्तपञ्चात्तथा युग्मान् गुणवतो द्विजान्। मत्स्यपुराणे। मातरः प्रथमं पूज्याः पितरस्तद
नंतरं। ततो मातामहाः पूज्या विश्वेदेवास्तथैव च॥ ॥पितृन्यस्त इत्युपलक्षणं॥ ॥मातृपिता
मही प्रपितामहीनां स्थाने प्रत्येकं द्वौ द्वौ ब्राह्मणौ निमंत्रयेत्। तदा एकस्यां पंक्तौ षड् भवंति।
एवं पितृपंक्तौ षट्। एवं सपत्नीकमातामहपंक्तौ षट्। एवमष्टादश ब्राह्मणा भवंति। सं
कोच्य पक्षे मातृपंक्तौ पितृपंक्तौ द्वौ सपत्नीकमातामहपंक्तौ एवं षट्। पक्षद्वयेपि विश्वेदे
वार्थं द्वावेव निमंत्रयेत्। न्वदेवत्यश्राद्धे आदौ मातृपंक्तिः तथा च स्मर्यंते। स याह केवला
ः कार्यो छंदो वादोऽप्रकीर्तिताः अतः आदौ तु पंक्तिः ततः पितृपंक्तिः ततो मातामहपंक्तिः॥ ॥
जयंतः॥ ॥अथापरेद्युरानीय ब्राह्मणौस्तु निमंत्रितान्। स्नानद्रव्यैः कृतस्नानान् क्षौमार्द्रं
व पूर्वकान् प्रक्षालितपादान् द्विराचांतान् प्राङ्मुखानुपवेशयेत्। कृत्वा मंडनकैर्वीरचतुरस्रं
प्रदक्षिणं। पूर्वाग्रास्तु कुशान् दत्वा पुष्पाणां प्रकरं तथा। आसनेषु तु कुंभेषु पित्र्यर्थं नृप
तवक्रमात्। अपूर्वमंडले न्वे विष्टरार्थे ददाद्यथा। उदगग्रास्तु ते कार्याः सर्वथा वासनेषि

Indira Gandhi National
Centre for the Arts

हस्ते अर्घपात्रं दद्यात्। सर्वेभ्यः पुनरन्योन्याय यथाक्रमं तेषु नैकदगग्रेषु निषीदेषु रचयेत्। पुनः तेषां हस्तेषु
पात्रदानं यथार्घमुपकल्पयेत्। आसनानन्तरं पूर्वं विश्वेदेवानावाहयिष्ये इत्युक्त्वा आवाहनमंत्रे
णावाह्य नांदीमुखान् पितॄन् तत्पात्रं साञ्जलिश्च समाह्वयेत्। आवाहनमंत्रमुक्त्वा नांदीमुखा
न् पितॄनावाहयिष्ये सोवाह्य। अर्घपात्रं पृथक् कुर्यात् दर्भेनास्मिन् नामत्र न कारिका। तस्
न दर्भोन मूलान् ऋजून् दत्त्वेषामासनं यथा प्राक्संस्थेषु। आसनं पूर्ववच्चानुमंत्रयेत्॥ ८५॥ नि
लासीति पदस्थाने यवासीतिपदं वदेत्। स्वधयेति पदस्थाने पुष्ट्या शब्दं वदेदिह। निरुधा अ
स्पार्थः॥ ॥ ब्राह्मणानामासनेषु छिन्नमूलान् ऋजून् नवदर्भान् निक्षिप्य द्विगुणान् अग्रान् कर्त
व्या इत्यर्थः॥ ॥ आसनानन्तरमर्घपात्रासादनकाले प्राक्संस्थानर्घ्यानासाद्य नेषु आसि
च्य तत्र तथैव पूर्ववच्छन्नो देवीरित्यनुमंत्र्य तिलोसीति पदे यवोसीति मंत्रं पठित्वा यवान्नि
क्षिपेत्। नत्रिमेव मंत्रे स्वधयेति पदस्थाने पुष्ट्येति शब्दं वदेत्। प्रकृत्युष्णीति। अत्र पात्रा
सादनावसरे प्रागग्रान् दर्भान् आस्तीर्य तत्र विश्वेदेवार्थमेकं संध्यं संस्थाप्य विस्तारपक्षे मा १६५
तृपक्षपक्षेसपात्रीति पात्राणि प्राक्संस्थानि स्थापयेत्। एवं पितृपञ्चपक्षे सपात्राणि ए

वं सपत्नीकमातामहपंक्तिपक्षे सपात्राणि। संक्षेपपक्षे पंक्तावेकैकं पात्रं। तथा तत्र जयंतः। आपरि
ष्टोनिपक्षे चैनयोरेकार्घकल्पना। स्याक्रयाणां यथा त्रास्त्रमिति न्याय विदां मतं। अथ च
नोसंस्तीर्य प्रागग्रान् एकैकस्य क्षणः। उक्तानि त्रीणि पात्राणि तेषु दद्यात् समाहितः। अंतधो
य र तुदर्भान् तेषु सिंचन्नतो जलं मिलेरन्सतरे। अन्तर्धायन नोदर्भान् तेषु आसिंचन्नतो जलं
। प्रतिद्विजं पृथक् कुर्यात् त्रिवारस्य घानुमंत्रणं। यवोसि सुकृतमंत्रस्यादर्घामिसपरे विदुः। उ
दागग्रं चार्घपात्रं संख्याता स्तावैवार्घपात्राणि अन्युदयिकरनिमात्रादिश्राद्धत्रय
मीणि। वैश्वदेविकं त्वेकमित्येवं विभागः। त्रीन् कः। पुरो निधाय पात्रे द्वे विश्वेदेवार्थे वि
प्रयोः। अन्तर्धाय ततो दर्भो निषिच्य जलं तयोः। यवोसीत्यादि सूक्तेन मंत्रेण प्रतिमंजनं
। एवान्निकीर्य विप्रेभ्यः स्वाहा शब्दे निवेदयेत्। विश्वेदेवा इदं वो अर्घमिति मंत्रमुदीरयेत्
। दत्वार्घमान्यां पित्रर्थमथार्घमुपकल्पयेत्। त्रिषु पित्रादिपात्रेषु कुशानंतर्निधायते
त्क्रमेणैव ततस्तेषु निषिच्यापोधनात्रपः मंत्रेण शन्नो देवीरित्यार्घ्यानुमंत्र्य वा यवो
सीत्यादि सूक्तेन मंत्रेण प्रतिमाजनं। यावान्नांसे पाथ पित्रर्थे द्विजन्मे मां निवेदयेत्। का
रिका। पितृनाम्नि पूर्ववदेन्नांदीमुखानिति स्व नमः यवस्थाने स्वाहाशब्दं वदेदिह॥ ८८॥ अथा

Indira Gandhi National
Centre for the Arts

१४ न्य तु यथा पात्रम [illegible] का ई [illegible] स्थापये द्यावान् ॰ [illegible] नरः प्रियं नामि ति मंत्रतः ॥ ८१ ॥ पित्र
र्द्रिकां पित्र निनिपदा स्पूर्ववद्य न्नांदीमुखस्तो [illegible] पितामह यदा न्ति नं ॥ ८१ ॥ नदर्ध
८२ र्घमुपविष्टेभ्यः स ह दर्भो निवेदयेत् ॥ एनमेव वदन्मंत्रं पितामह संयुक्तं प्रत्र मुक्त्वा नमेव तु ॥ ८३ ॥ नदर्ध
मुप॰ विष्टेभ्यः स ह दर्भो निवेदयेत् । प्रपितामह संयुक्तं मंत्र मुक्त्वा नमेव तु ॥ ८३ ॥ अथान्यान्वि
मुपविष्टेभ्यः पत्नी यं स ह दर्भ [illegible] अस्यार्थः । पूर्वे [illegible] कृ स्यस्य [illegible] व्याख्या अथान्यान्वि
ति । यवोसी सोमदैवत्यस्त्या दिकं यथा पात्रमुक्त्वा अर्घ्यपात्रेषु यवान् प्रक्षिपेत् । अत्र सोक र्ण
ति । यवोसी सोमदैवत्यो सा दिवं [illegible] पात्रमुक्त्वा अर्घ्य पात्रेषु यवान् ) गो सवो
र्थ मंत्र [illegible] ते । यवोसी सोमदेवत्यो सा दिवं [illegible] नांदीमुखानूपिन्हनिमान् लोकान् प्रीणया हि नः स्वाहेति ।
देवनिर्मितः प्रत्न वद्भिः प्रत्न पुष्ट्या नांदीमुखाः पितरः प्रियं नामिति मंत्रेण पवित्र र्थमुपविष्टे
पात्रेषु गंधपुष्पादिकं प्रक्षिप्य नांदीमुखाः पितरः प्रियं नामिति मंत्रेण पवित्रत्वात्प्रर्घ्ये पात्रस्य त
स्यां ब्राह्मणेभ्यः पितृपात्रं सह देवा निवेदयादिति । निवेदनं तु मंत्र [illegible] एनमेव मंत्रं पितामह प
समीपे स्थापनं । दानं योग्यकरणं । दानस्य [illegible] । एनमेव मंत्रं पितामह प
समीपे स्थापनं । दानं योग्यकरणं । दानस्य [illegible] विद्यमानत्वात् । एनमेव मंत्रं पितामह स्थापयेदिति । तथैव
सान्वितं नांदीमुखाः पितामहाः प्रियं नामि निम्न पितामह समीपे स्थापये देदिति । तथैव १६८
नांदीमुखाः प्रपितामहाः प्रियं नामि निम्न पितामह । द्वितीयं प १४ ह समीपे स्थापयेत् । स्मरसं ततः प्रति

द्विजं पृथक्कुर्यात् त्रिवीस र्घ्यानुमंत्रणं । यवोसी सुक्तमंत्रः स्यादर्घ्यमित्यपरे विदुरिति । पृथक्कुर्यात् दान
योगं कुर्यादित्यर्थः । नांदीमुखास्त पितर इदं वो अर्घ्यमित्यथ ॥ ८२ ॥ दत्वार्घ्य मुपविष्टेभ्यः पित्राद्य
र्थं तु पूर्ववत् । मंत्रस्यो होपिन इत्यस्य । दर्घ्य दानं प्रति द्विजं ॥ ८३ ॥ आद त्रिरपि मंत्र स्य प्रति ब्राह्मण
निव्युत । प्रति द्विजं पृथक्कुर्यात् द्वितीयाद्यनुमंत्रणं तु ॥ ८४ ॥ ॥ अस्यार्थः ॥ ॥ नांदीमुखाः पितर इदं वो
अर्घ्यमिति मंत्रेण पितृस्थाने उपविष्टयो । विप्रयो हस्ते अर्घ्यं दत्वा यादिन्द्यादस्य नेन मंत्रेण गलत्त
दुदकमनुमंत्रयेत् । निरीक्षयेदित्यर्थः ॥ पुनर्द्वितीयपात्रोदकं गृहीत्वा नांदीमुखाः पितामह इद
दवो अर्घ्यमित्यादि समानं । तथैव तृतीयपात्रोदकं गृहीत्वा नांदीमुखाः प्रपितामहा इदं वो
अर्घ्यमित्यादि पूर्ववत्कुर्यात् । अत्र पित्राद्युद्देशेन उपविष्टानां बहूनां द्विजानां करेषु ॰ एकस्ये
वार्घ्यपात्रस्योदकेन अर्घ्यं दद्यात् । प्रतिब्राह्मणमर्घ्यदाने मंत्रावृत्तिः । प्रति ब्राह्मणं वानुमंत्र
णं भवति । श्राद्धमात्रे समान एवायं विधिः । अत्र बहु ब्राह्मण पक्षेपि अर्घ्यपात्राणि त्रीणि त्रीण्ये
व प्रतिपक्षो भवति । पात्राण्यासादयेत् त्रीणि न तु ब्राह्मणसंख्ययेति संग्रहवचनात् । शौनक
स्कंदपुरो । निधाय पात्रे द्वे पितृदेवार्थं विप्रयोः । अनन्तरं ततो दर्भान्निषिच्य जलं ततः । यवोसी

Indira Gandhi National
Centre for the Arts

त्यादिसूक्तेन मंत्रेण प्रतिनाजनं। यवान्विकीर्य विप्रेभ्यः स्वाहा शब्देन निवेदयेत्। विश्वेदेवाइ
देवो अर्घ्यमितिमंत्रमुदीरयन्। दत्वार्घ्यमाज्यं पित्रर्थमथार्घ्यमुपकल्पयेत्। त्रिषु पित्रादिपा
त्रेषु कुशानंतनिधायतत्। क्रमेण वनत रत्नेषु निक्षिप्यापोथनाअपः। मंत्रेण शन्नोदेवीरित्याद्यर्घ्या
नुमंत्र्यत्वा यवोसीत्यादिसूक्तेन मंत्रेण प्रतिनाजनं। यवा से प्याथ पित्रर्थं द्विजन्मभ्यो निवेदयेत्।
अतः प्रथमपात्रस्थाः स्वादार्घ्या इतिमंत्रतः। नेषामाद्यस्य विप्रस्य हस्तेन्यज्जलमादितः। सिक्त्वा
घार्घ्यं समादाय जलं दक्षिणपाणिना द्वितीयपात्रतः किंचिज्जलमादाय पूर्ववत्। तत्रेदंते घ्यमि
त्येषपितनामपदादिकं। मंत्रो विनिज्यतेनान्यस्तंत्रं पूर्ववदाचरेत्। एवं पित्रर्थं विप्रेभ्यः प्रदा
यार्घ्यं यथाविधि। पितामहार्घं विप्रेभ्यः दत्वार्घ्यं च यथाक्रमा। प्रपितामहशब्दादि इदंते घ्यमिती
रयेत्। मंत्रमेत्रय यापूर्वं तंत्रमन्यत्समाचरेत्। पित्रादित्रितयस्यार्थे यथावत्क्षणा द्विजो द्वौ वृणी
ततदानंत्र तयोरेकार्घ्यकल्पनं। जयंतः॥ ॥उक्तापितरिदंते घ्यमिति पित्र्येर्घ्यमानयेत्। यादि
व्या इति मंत्रेण प्रत्येकमनुमंत्रणं॥ अर्घ्यदाने विशेषमाह कात्यायनः। ज्येष्ठोत्तरकरान् युग्मान्
कराग्रकपवित्रकान्। कृत्वार्घ्यं संप्रदातव्यं नैकैकस्य प्रदीयते ज्येष्ठस्य करं द्वितीय ब्राह्मणह १६७

स्तयोपरिनिधाय उक्तमंत्रेण सकृद्देवार्घ्यं दद्यात्। अवशिष्टस्यार्घ्योदकस्य कार्यमाह जयंतः। आसिंचे
त्प्रथमे पात्रे जलमुत्तरयोर्द्वयोः। नाभिर्मुखं समंजानपुत्रं यद्यभिवांछनीति। द्विद्विगंधादिदानं श्राद्धपा
णिहोमो नवेदिहा। अग्नये कव्यवाहनादि मंत्रेण प्रथमाहुतिः॥ ७५॥ सोमायेति द्वितीयास्यादथान्ये
षां तु पाणिषु। आभ्यामेव तु मंत्राभ्यां द्वे द्वे हुत्वा हुती इति॥ ७६॥ ॥अस्यार्थः॥ ॥अत्र नांदीमुखश्रा
द्धे द्विवारं द्विवारं युग्मत्वेनैव गंधपुष्पधूपाच्छादनपर्यंतं पूर्ववस्त्रं नां प्रतिब्राह्मणं दानं न तु नि। अग्नौ
करणावसरे प्रश्नवर्जमेव होमद्रव्यघृताक्तं कृत्वा सर्वेषां पाणिषु जुहोति। अत्र सव्येनैव विधान
सामर्थ्यात्। प्रथमं अग्नेकव्यवाहनाय स्वाहेति हुत्वा ततः सोमाय पितृमते स्वाहेति द्वितीयाहुतिं
जुहोति। एवं प्रतिपंक्तौ प्रतिब्राह्मणं जुहोति। स्पष्टमन्यत्॥ ॥जयंतः॥ ॥नाजनार्थमाहानीता
दन्नादादाय सर्पिषा। अन्यान्समुपानेतु सर्वमेव विचक्षणः। अवदानं गृहीत्वाथ मेक्षणेन
विपश्चितः। पितृस्थानात्तु सर्वेषां पाणौ होमं दिवांतिहि। होममंत्रे विशेषोत्र स्वधा शब्दा
दिवर्जनं। अनयोः पादयोः स्थाने स्वाहा शब्द प्रयोजयेत्। अग्न्यादिनानु मंत्रेण पूर्वे होमो
नवेदिह। विप्रहस्ते तु होतव्यमिति यत्प्राविदां मतं। तुक्तवत्सु हुतं तेषु यथेष्टं जयंततः

Indira Gandhi National
Centre for the Arts

पृषदाज्येन संयुक्तं दद्यादोदनमादितः। पायसं [illegible] तथान्नं संमोदकादिरसान्वितं। मधुरं भो
जनं दद्यात्त्रद्याम्लं परिवेषयेत्। ब्रह्मांडपुराणे॥ ॥मंगल्यं च सूपसाज्यादि दद्यात्तं य
थाविधि। गुडमिश्रं खगश्च सूपसाज्यं चैवौदनं परं। रसाला मोदकाश्चैव वन्त्याम्ल कटुका
दिक्रमिति। नजपेत्सैन्तकं जप्यं नमांस्ति तत्र दापयेदिति। स्मृत्यंतरे। अथ तृप्तिपरिज्ञान
पर्यंतं पूर्ववद्भवेत्। मधुवाता त्स्वरलानेन पारस्मै गायतानरः॥९७॥ पंचर्चः श्रावयित्वा
सन्नमीति श्रावयेदृचां संपन्नस्वचनं तस्यादावांतेषु द्विजन्मस्विति॥९८॥ ॥अस्या
र्थः॥ ॥परिवेषणादि पूर्ववत्कृत्वा तृप्तिज्ञानपर्यंतं यथेष्टं भोजनं कारयित्वा अथ नेष्ठु
तमेषु सत्सु मं त्रावित्रोष मा हान्तधान् ज्ञात्वा मधुमतीः श्रावयेदित्यत्र उ पारस्मै गायता
नरइत्याद्याः पंचर्चः श्रावति। तथे वा सन्नमीमदंतेतित्वर्चं श्रावयेत्। ततः संपन्न
मिति सर्ववडुक्तान्तेषु अश्वांते तु सत्सु पिंडदानं कुर्यात्। शौनकः। तृप्तानथ द्विजान्
ज्ञात्वा मधुवाताऋतायते इत्यादिकं ऋचमथो उपारस्मै गायतानरः पंचर्चं मदंतात्रे १९८
साद्यामेकां वर्ज्य यथाक्रमं। श्रावयित्वा तु संपन्नमिष्टं द्विजान्था तपेसंप

न्नमित्येव ब्रू पुरस्तात्तिसमन्विताः। प्रकीर्यान्नं तु ते घृन्नेधिग्मानास्वामयेत धेति। जयंतः
एते घृन्नं प्रकीर्यो धपात्रे विरणुयात्तितुरिति। अथानुक्तौ गायाल्सम्य गोमयेनोपले
पयेत्। तत्र प्रागग्रकान् दर्भानास्तृणातितनः परं॥१९९॥ पृषदाज्यं चकुर्वीत दध्यानय
ति सर्पिषि। पृषदाज्येन संमिश्रं भुक्तशेषं ह्याहृतं भवेत्॥२००॥ एकैकस्यान्कमंत्रेण
द्वौ द्वौ पिंडौ तु निर्वपेत्। अथानुमंत्रणादिः स्यात्तत्तु ते छंति केचन॥२०१॥ अथ संप
न्नवचनाद्विप्राणांव्व विसर्जनमिति॥ अस्यार्थः॥ ॥ततो भोजनशालायाः बहिः विप्रो
च्छिष्टसमीपे गोमयेनोपलिप्य तस्मिन्प्रदेशे प्रागग्रान् दर्भानास्तीर्य ततः पृषदाज्येन
संमिश्रं भुक्तान्नशेषमहृत्य तेषु दर्भेषु एकैकमुद्दिश्य द्वौ द्वौ पिंडौ क्रमेण दद्यात्। पृ
षदाज्यं नाम आज्ये दधिप्रक्षेपणं। यदा क्रियते तद्द्रव्यं भवति। केचित्। संज्ञानुमंत्रण
मिच्छंति केचिन्नेच्छंति। पूर्वोक्तप्रकारेण पिंडदानं समाप्य विप्रविसर्जनकाले
संपन्नमिति वचनेनोच्चारणेन विसर्जयेत्। [illegible] अन्ये त्वचनपुराणोक्ता विशेषाः प्र

Indira Gandhi National
Centre for the Arts

दर्भपत्रेण पद्मपुराणे। प्रदक्षिणोपचारेण दध्योदनफलोदकैः। प्राङ्मुखो निर्वपेत्पिंडा
न् दूर्वया वदरैर्युतान्। चतुर्विंशतिमनोद्दिष्टा स्पुदये पिंडावैकैकस्मै विनिक्षिपेत्।
एकनाम्नापरं तूष्णीं दद्यात्पिंडान् पृथक् पृथक्। आद्ये ब्रह्मपुराणे शाल्यन्नं दधिमधुद्रा
बदराणि यवांस्तथा। मिश्रीकृत्य तु वै तानि पिंडांश्च फलसन्निभान्। दद्यान्नांदीमु
खेभ्यश्च पितृभ्यो विधिपूर्वकं। ब्रह्मपुराणे। अर्घं पुष्पं च धूपं च प्रकारं तमनुलेपनं।
वासानुपहृतं देयं यज्ञेयं सदत्तं समंतं। द्राक्षामलकमूलानि बांधवाग्निनिवेदयेत्। अ
थाक्षयोदकं स्थाने दत्वा सारयवोदकं। नांदीमुखेभ्यस्त्वक्षय्यमिदमस्त्विति संजपेत्।
आह कात्यायनः। अपः क्षिपन्मूलदेशेऽवनेनिक्ष्वेतानेनिरिक्तूलाः। द्वितीयं च तृतीयं च मध्य
देशाग्रदेशयोः मातामहप्रभृतीनां तेषामेव वामतः। सर्वस्मादन्नमुध्धृत्य व्यंजनैरुपसिं
च्यता। संयोज्य यवकर्कंधु दधिभिः प्राङ्मुखस्तथा। अवनेजनवत्पिंडान् दद्यादल्पप्रमा
णकान्। छन्दोगानां तपः। प्रदद्यात्प्राङ्मुखैः पिंडान् वृद्धौ त्रास्मास बाह्मनः। बाह्यनरत्नौ १६९

जनंत्वालाया बहिरित्यर्थः। वृद्धवसिष्ठः॥ ॥ प्राङ्मुखो देवतीर्थेन प्राक्कूलेषु कुशेषु वै द
द्यात्पिंडान्न कुर्वीत पिंडपात्रमधोमुखं। न सात्र क्षालनेनाथ पुनरप्यवनेजयेत्। उत्तरो
त्तरदानेन पिंडानामुत्तरोत्तरः। गंधादीन्निक्षिपेत्तूष्णीं तत आचामयेद्द्विजान्। अन्यत्राप्ये
वदेवं स्याद्यदिवा। प्रियंतामिति च ब्रूयात् पिंडान् वाहेतिनिक्षिपेत्। आश्वलायनगृह्य
परिशिष्टे। नांदीमुखास्तु पितरः प्रीयंतामिति विसर्जयेत्। कात्यायनः। अथाग्रन्तमि
मा। सिंचेत्तासु प्रोक्षितमस्त्विति। तिवाऽऽपस्त्विति संत्विति युग्मा दनेवोदकेन स्यमस्त्वि
ति पुष्पदानमनंतरं। अक्षतं चारिष्टं चास्त्वित्यनान् प्रतिपादयेत्। अक्षय्यं च ततः कुर्या
द्देवपूर्वं विधानतः। अत्र वरयाचने दातारो नोऽभिवर्द्धंतामित्यत। भविष्यपुराणे। मातापि
तामहीत्येव तथैव प्रपितामही। एतान् वंतु मे प्रीताः प्रयच्छंतु च मंगलमिति। कात्यायनः।
पवित्रांतर्हितान् पिंडान् सिंचेदुत्तानपात्रकृत्। युग्मानेव स्वधावाच्य मेगुष्ठग्रहणं सदा।
कृत्वा युग्मरयविप्रस्य प्रणम्यानुव्रजेत्ततः। चतुर्विंशतिमनोद्दोषमन्त्रमनुज्ञाप्य वैश्व
देवाक्रियां ततः। श्राद्धक्रियाईशोषणवैश्वदेवं समाचरेत्। अत्र वृद्धिश्राद्ध पिंडप्रदा

Indira Gandhi National Centre for the Arts

नैवेकल्पितं तथा च विष्णुपुराणे। दध्यक्षतैः स ... ैः प्राङ्मुखो दङ्मुखो पिवा। देवतीर्थेन
वै पिंडान्दद्यात्कामनवेनपाकामन इच्छया। इ ... नाव ... दद्यान्नान्नविब्यात्तरो पिंडनिर्वप
णं कुर्यान्न वा कुर्यान्नराधिप। वृद्धिश्राद्धे महाबाहो कुलधर्ममवेक्ष्य वै। इयंच व्यवस्था
निरग्निकानामेव। साग्निकेस्तु सदा कर्तव्यमेव। अन्यं यादौ पश्यते। आद्य ब्रह्मपुरा
णे। योग्नौ तु विद्यमाने तु वृद्धौ पिंड। न निर्वपेत्। पतंति पितरस्तस्य नरके स तु पच्यते। अ
सम संकल्पं तु यदा कुर्यान्न कुर्यात्पात्रपूरणं। नावाहनाग्नौकरणं पिंडांश्चैव न निर्वपेत्। पा
त्रपूरणमर्घ्यदानं। तन्मंत्रकावाहनस्यापि निषेधान्नत्याचहनस्य रूपस्य। तदभावे देवतास
निध्याभावप्रसंगात्। ततश्चावाहनमंत्रमनुक्त्वैव सत्यवसु संज्ञकान्विश्वेदेवा८ना
वाहयामीत्येवं नावदुक्त्वा देवावाहनं कार्यं। पित्राद्यावाहनमप्येवं सम्यक् तरोक्ता गानि
नपत्तस्य यदा कर्तुं न शक्नुयात्। स तदा वाक्यमेव हि प्राप्नुयात्सकलानि ... इति। आद्ध नु
कल्पः कुर्यात् आपत्स्वस्थायपेसापा। श्राद्धाङ्गानां नाप्यवाप्नोति मुख्यश्राद्धफलं नरः दाने १७०
न्नाद्यभावे मुख्यकल्पालु ... फलं। दक्षिदानं हेमाद्रौ। तत्र महाभारते। वेदोपनिषदे

चैव सर्वकर्मसु दक्षिणा। सर्वक्रतुषु चोद्दिष्टा न्मिगादौ यकांचनं। रजतस्य दक्षिणा
ननिषेधश्चाते। वैजावापना। तोवने चोद्भवं यस्मात्सितं वल्लभं। अमंगलं तद्यद्यन्नं देवका
र्येषु वर्जितमिति। ८ तदष्टेः सहनोक्तव्यमिति प्रत्युक्तिपूर्वकं। प्रदद्युः सकलं तस्मै स्वीकरोतिय
थाविधिनो दासयमिति विप्राणां मुच्छिष्टान्यादिन सयात्। प्रकीर्यान्नं वनेघग्रे विप्रानाचम
येत्ततः। आचम्यासनसंस्थेभ्यः प्रदद्याद्युक्तदक्षिणं। सर्वाश्चाप्यर्घ्यगंधाद्यैः पितृपूर्वं विस
र्जयेत्॥ ॥इति नांदीश्राद्धं॥ ॥अस्याधिपयमाह स्मात्र्। पुंसवनसीमन्तचौलोपनयनेष्वि
ह। विवाहे चान्नलाघ्रेय प्रत्नति श्रौतकर्मसु। इदं श्राद्धं प्रकुर्वीत द्विजा वृद्धिनिमित्तकामिति
॥२०२॥ ॥अस्यार्थः॥ ॥इदमाभ्युदयिकश्राद्धं द्विजाः पुंसवनादिषूक्तस्थलेषु वृद्धि
निमित्तकं कुर्वंति। अवशिष्टेषु षोडशसंस्कारेषु श्रवणादिषु कर्मस्वपि इदमिष्यते।
वाप्याद्युद्यापनादौ पूर्वोनिमित्तकं श्राद्धं कुर्यात्। वाक्तटारोहणादिवास्तुपरीक्षांतं पंच
त्रिंशत्संख्याका श्लोका अत्रोपयोगाभावान्न ... व्याख्याताः॥२०३॥ अथ प्रयाणवि
षये आपद्विषये वा अग्नेः समारोपणविधिरुच्यते। साग्निः प्रयातित्वरणी ... तपे घा

Indira Gandhi National
Centre for the Arts

तद्यथा। जिघ्रेत्प्राणी ततः कालमाह साग्निं समु[…]सेना॥३८॥ कृतपाणिसमारोपे नियमान्
पि न छुणु॥ अस्यार्थः॥ ॥साग्निर्यदि प्रयाणं करोति तदा याते अग्ने यज्ञियां तनूरित्यादिमि
न्त्रेण पाणिद्वयमग्नौ प्रतापयेदिति। पाणिद्वयं जिघ्रेदाघ्राणं कुर्यात्। होमकाले लौकि
काग्निमानीय तस्मिन्नग्नौ पाणिभ्यां गृहीतमुद्रस्तु मथितं मुद्गिरेत्। तस्मिन्नित्यहोमं कु
र्यात्। पाणिसमारोपणानंतरं नियमानाह। न छुणु इत्यनेनोक्तनियमान् पालयन् कर्म कुर्या
दित्यर्थः। जले निमज्जन स्नायान्नोपयाच्च स्त्रियं तथा॥३९॥ कृत्वा मूत्रपुरीषे तु चिरं नासीन
वाशुचिरिति। अस्यार्थः। जलमध्ये स्नानकाले निमज्जनं कुर्याच्चो केवलं हस्ताभ्यामेव शि
रस्युदकं निक्षिप्य स्नानं कार्यं। स्त्रीगमनं च न कुर्यात्। मूत्रपुरीषे कृत्वा तदानीमेवाचाम्यादि
कं कुर्यादिति। चिरकालं न तिष्ठेदशुचिर्भूत्वा। यद्यपि मूत्रपुरीषोत्सर्गानंतरं अना
चारवतापि निरग्निकेनापि शीघ्रमेवाचामनादिकं क्रियते। तथाप्यत्र करचरणाद्यव
यवप्रक्षालनमाचमनमपि तत्करीत्याशीघ्रमेव कुर्यादिति। तात्पर्यं। समिधं प्रतप्य दद्या
चयं तयारिति सूत्र॥४०॥ अग्नौ प्रत्यवरोहेति कालेनामादधासयंते॥ ॥अस्यार्थः॥ ७१

अथवा समिदारोपणं कुर्यात्। तत्प्रकारमाह। अयं ते योनिर्ऋत्विय इति ऋत्वा अग्नौ समिधं प्र
तप्य होमायतने लौकिकाग्निमानीय प्रत्यवरोहेति मंत्रेण तस्मिन्नग्नौ तां समिधं प्र
क्षिप्य होमकाले होमं कुर्यात्। प्रादुःकरणकालेऽनुकर्मेत्समुदाहृतं। प्रादुःकरणकाले
लौकिकाग्नौ समित्प्रक्षेपः। अनेनैव तु पूर्वस्मिन् पक्षेऽप्यग्नौ समुद्धृते इति॥४१॥ ॥अ
स्यार्थः॥ ॥अनेनैव तु प्रत्यवरोहेति मंत्रेण पूर्वस्मिन् पक्षे पाणिसमारोपणपक्षेऽपि लौकि
काग्नौ पाण्यारोपितमग्निं समुद्धृते उदिगरेदित्यर्थः। इध्मार्थं सत्रकर्षणविधिप्रति
पादकास्तथा गोनुमंत्रणप्रतिपादका अष्टसंख्याकाः श्लोकाः उपयोगाभावान्न व्याख्या
ताः॥२४९॥ ॥इत्याश्वलायनकारिकाख्याने द्वितीयोऽध्यायः॥ ॥अनाहिताग्निरेवमान्
कुर्वन्काम्यांश्चरून्यथा परिषेचनपर्यंतमन्वाधानादि पूर्ववत्॥१॥ अग्नये पुत्रिणे त्वेति
पुत्रकामस्तु निर्वपेत्। अग्नये पुत्रिणे स्वाहेत्यनेन जुहुयाच्चरुं॥२॥ आयुष्कामादिकश्च
रूनेवमेव करोत्यथ। सूत्रोक्तदेवताज्ञेयास्तत्र तत्र च कर्मणि॥३॥ व्याध्यादिषु निमित्तेषु
डाकिन्यादिनेवेत्। परिषेचनपर्यंतमन्वादि पू[…]त्॥४॥ निर्वापप्रोक्षणे तूष्णीं न वेता

Indira Gandhi National Centre for the Arts

मत्र कर्मणि। मुंचामि त्वेति रक्तेन प्रस्स्वंजुहु[illegible]॥ षष्ठः स्विष्टकृतं हुत्वा होमशेषं स
मापयेत्। अथ दुःस्वप्नदर्शने जप्यमाह। स्वप्ने[illegible]सूर्यमुपतिष्ठेत त्र्यम्बिः॥ ६॥ अ
घानदनिवाहान्यां यच्चगोत्विति पंचभिः। यो मे राजन्[illegible]र्क मे कये वोपतिष्ठेतेति॥ ७॥
अस्यार्थः॥ ॥यदा अशुभसूचकं स्वप्नदर्शनं भवति भवस्य[illegible]माणाः स इमानि मंत्रैः सूर्यमुपति
ष्ठेत। सूर्योपस्थानं कुर्यात्। तत्र मंत्राः। अद्या नो देव सवितः इति द्वाभ्यां। यच्च गोषु दुःस्वप्न
मित्यादिभिः पंचभिः। अथवा यो मे राजन्निति एकयैव ऋचा सूर्यमुपतिष्ठेत। जंभित्वायदि
वक्षुत्वा दृष्ट्वाप्रत्यसमप्रियं। पापगं धमाघ्रायनथा। स्पर्शनेनथा॥ ८॥ उसन्नेक्रपणो
: त्वाब्देनूवेदेकतमं यदि। जपेत्तत्र इमं मंत्रं सुचक्षा अहमक्षीभ्यां भूयासं सुवर्चा मुखेन
श्रुत्कर्णाभ्यां भूयासं मपिदस्येत्येति॥ ९॥ अस्यार्थः॥ ॥जंभणादिषट्सु निमित्तेषु प्रयो
कर्तमनिमित्तं भवति। तदा जप्यमाह। सुचक्षा अहमक्षीभ्यां भूयासं सुवर्चा मुखेन श्र
त्कर्णाभ्यां भूयासमपि दस्कन्न इति मंत्रं जपेदिति। गत्वा रजस्वलां नार्यां निषिद्धदि
वसेथवा। अयाज्यं याजयित्वानुचि षादे प्रतिगृह्य ॥ १०॥ अप्रतिग्राह्यं दुःके षडं १०२
वा प्रतिगृह्य च। स्पृष्ट्वा निर्वयनं रक्तं च यूपं वा भोज्य[illegible]जने॥ ११॥ सप्तस्वेषु निमित्ते
षु नवेदन्यतमं यदि। पर्युक्ष्याग्निं परिस्तीर्य पर्युक्ष्य च ततः परं॥ १२॥ पुनर्मामैत्विति मंत्रा
भ्यां जुहुयात्संस्कृतं घृतं। एताभ्यामेव मंत्राभ्यां समिधावादधीत वा॥ १३॥ पर्यूहणोक्ष
णे स्यातामन्यत्तत्र तु नेष्यते। स्वाहाकारविनिर्मुक्तौ यद्वा मंत्रौ जपेद्दिहति॥ १४॥ अ
स्यार्थः॥ ॥उक्तेषु सप्तसु निमित्तेषु यद्यन्यतमं भवेत्। तदा औपासनाग्निं पर्यूह्य
परिस्तीर्य पर्युक्ष्य आज्यं संस्कृत्य पुनर्मामैत्विति मंत्राभ्यामाहुतिद्वयं जुहुयात्। आज्या
संभवे एताभ्यामेव मंत्राभ्यां समिधौ वा जुहुयात्। तत्र पर्यूहनपर्युक्षणे स्यातां। अन्य
कर्म नेष्यते। अथवा समिद्धोमासंभवे स्वाहाकारवर्जं मंत्रौ जपेत्। होमपक्षे
होमानंतरं पुनः पर्यूहनपर्युक्षणे कर्तव्ये इत्यर्थः। स्वपंतं तं समुदयमादित्यो व
मियाद्यदि तिष्ठं दिनं न यद्रात्रि त्रीषं वाग्यत एव स[illegible]॥ १५॥ उदितेपुनः सूर्यमिति पंचभि
रुपतिष्ठते। अविमुक्ता त्रे पश्चात्तमपिनि[illegible]॥ १६॥ अर्कोभ्युदतिचेदनं चे
पं स्थित्वा स वाग्यतः। उदितयस्पते विश्व[illegible]स्तमितरविं॥ १७॥ उपतिष्ठेत विहि

Indira Gandhi National
Centre for the Arts

तकर्मश्रांतस्यनेष्यते॥ ॥अस्यार्थः॥ ।अ[illegible]पुरुषः शयनं कुर्वन्नेव यदि आदित्यः
उदयं प्राप्नोति अस्तमितो वा भवति।तत्र [illegible]कुर्यात्।तिष्ठन्नुपवसन्नासीनस्त्वेव
रात्रिशेषं दिनशेषं वा नयेत्।मौनी भूत्वा।उदिते सूर्ये [illegible] ज्योतिषा बाधते तमः इति
पैव ऋग्भिः आदित्यमुपतिष्ठेत।यदा अविध्मुक्ता रागतः [illegible] पाक्रियानयाश्रां
तः अतएव निद्रारोगं तंलक्ष्मी कृत्य अर्कः अस्तुदेति।तदा तिष्ठन्नेव सः अहः शेषं वाग्य
तः सन्नयेत्।ततः उदिते सूर्ये।यस्य ते विश्वा भुवनानि केतुना इत्येताभिश्चतसृभिरादित्य
मुपतिष्ठेत।एतच्च विहितं कर्मश्रांतस्य इदं प्रायश्चित्तं नेष्यते।रक्तपादः कपोतो रव्यन्त्र
रण्योकाः शुकषविः।रस्त्र पालं चितो काला समीपवा व्रजे यदि परिषेचनपर्यंतमन्वा
धानादि पूर्ववत्।देवाः कपोत सूक्तेन प्रत्यृचं जुहुयाद्धृतं।पवंन् रचा है।नेजुहुयात् ज
पेद्वा द्वाविकल्पो जपहोमयोः।गर्भाधानार्थे सूक्तेन वयमुत्वा पथस्पते पूर्ववत्स स्वहो
मं कुर्यात् सूक्तस्य वा जपं।प्रज्ञाहीनो थवा नष्टं लब्धुमिच्छन् जुहोत्यथ।सं पूष न्सूक्तेन
स्तद्दृत्स स्वं यदि वा जपेत्।गमिष्यन्महद्ध्यानं मत्यं वापि नयोनकः।सं पूष न्सूक्तं १७२

तस्तद्दृत्सस्त्वं यदि वा जपेत्।औपासनेत्तुगच्छे[illegible]नादि पूर्ववत्।अ[illegible]नंश्रौ
त्रियागारात् प्रतिष्ठाप्य हविर्भुजं॥२५॥अन्यस्माद्धोमकाल्लास्त्रीनाश्रीयाद्यदिवा
ही।पर्युक्षणादिनाचाच्चोर्संस्कृत्याज्यं च पूर्ववत्॥२६॥अयाश्चेत्येतया जुहुयात्तथा पूर्वं
जुहोत्यथेति॥अस्यार्थः॥ ।अथकेन चित्प्रमादादिना औपासनाग्निः शांतो भवेत्
तदा आयतनस्थं भस्मादिकं हृत्वा कृत्य पूर्व वदुपलेपादिकं कृत्वा श्रोत्रियागाराद्ग्निं
मानीयआयतने व्याहृतिभिरग्निं प्रतिष्ठाप्य सायंकालपर्यंतं दंपत्योर्मध्ये भोजनम
कृत्वैव अन्यतरेण स्थातव्यं।होमकाले प्राप्ते केन चित्प्रमादेन शांतस्यौपासनस्य प्राय
श्चित्तार्थमाज्यहोमं करिष्यामि इति संकल्प्य पर्युक्षणादि कृत्वा आज्यं संस्कृत्य अयाश्चेति
मंत्रेण एकामाहुतिं जुहोति।पश्चान्नित्यवदौपासनं कुर्यात्।एतच्च तत्कालविषयं।यदि
शांते अग्नौ होमकालो अन्तरितः तदा पुनःसंधानविधि।अन्वाधाने कृते यागात्प्राक्
चेदनुगतो भवेत्॥२७॥प्रायश्चित्तमिदं कृत्वा पु[illegible]रन्वादधीत तथा।व्याहृत्याद्येतत्पस्के
यइति बौधायनो ब्रवीति॥२८॥ ।अस्यार्थः॥ ।पूर्वेद्युरन्वाधाने कृते सति प्रतिपदि

Indira Gandhi National
Centre for the Arts

क्रियमाणस्थालीपाकात्पूर्वमेवान्वाधानं कर्तव्यमिति यद्यग्निः नाशो भवति तदा पूर्वोक्तमेव
अयाश्चेत्सेनयात्वा आज्यहोमरूपं प्रायश्चित्तं कृत्वा पुनरन्वाधानं करोति। अन्वाधा
नानंतरं व्याहृत्यादिभिर्मंत्रैरग्निमुपतिष्ठेतेति बोधायनाभिप्रायः अन्वाधाने कृते
यागात्प्रागेवारोपयेद्यदि। तुभ्यं ताइत्यस्यं हुत्वा वाऽऽसमारोपयेत्तत् इति॥२७॥ अस्या
र्थः॥ ॥अथ आपत्काले प्रयाणादिविषये पौर्णमास्यां दर्शे वा कृतान्वाधानस्य यागा
त्प्राक्समारोहणनिषेधेपि यदि कार्यवशात्समारोपणप्रसंगः तदा समारोपणाधि
कारार्थमाज्यहोमं करिष्य इति संकल्प्य आज्यं संस्कृत्य तुभ्यं ता अंगिरस्तम इति मं
त्रेणैकामाज्याहुतिं हुत्वा समारोपणं कुर्यात्। नित्यहोमत्वतिक्रांते संस्कृत्याज्यं च
पूर्ववच्चतुष्कृत्वो गृहीत्वाज्यं मनस्वत्या जुहोति यथा॥३०॥ आ द्वादशादिनादेवमूर्ध्वं
विच्छिद्यतेनलः प्रायश्चित्तं तु यत्प्रोक्तमग्नित्यागोपपातकं॥३१॥ मनुना तत्र कुर्वीत
तत्कालानुसारत इति। अस्यार्थः। नित्यहोमस्य कालातिक्रमे पूर्ववदाज्यं संस्कृ १०४
त्य स्रुवेण चतुर्गृहीतं तदाज्यं दर्व्यां निक्षिप्य तया द[...]नाज्यानिज्यानि[...]ति मंत्र

पात्तदाज्यं जुहुयात्। द्वादशादिनात्पूर्वमेव नित्यहोमलो[...]दमेव प्रायश्चित्तं। अयमर्थः
एकैकहोमलोपे प्रत्येकमेवमेव प्रायश्चित्तं कृत्वा अतिक्रांतहोमस्य क्रमेण कर्तव्यः
आ द्वादशादिनादेवमेवमिति। द्वादशादिनपर्यंतमिदमेव प्रायश्चित्तं प्रोक्तं तदू
र्ध्वमिदं प्रायश्चित्तं नास्ति। अनलस्तु विच्छिद्यते लौकिको भवतीत्यर्थः। तत्र समयातिक्र
मानुसारेण स्मृत्युक्तं मनुना प्रोक्तं यत्प्रायश्चित्तं तत्कृत्वा दिनांतरे शुभमुहूर्ते पुनः
संधानं कृत्वाग्निं परिचरेदिति। त्रैमासिकं गोवधोक्तं स्यात्कामे निष्कृतिर्भवेत्॥३४॥
चांद्रायणं वा होमस्य दानं वापि समाचरेत्। अन्यत्र पुनराधानं दानमेव तथैव चेति
॥३३॥ ॥अस्यार्थः॥ ॥अग्नौत्यक्ते यदि मासत्रयं न वेद्यात्। तदा गोवधोक्तप्रायश्चित्तेन नि
ष्कृतिर्भवति। अथवा चांद्रायणं कुर्यात्। अथ [...]सत्रयपर्यंतं होम्यद्रव्यं याव
द्भवति वैदिककर्मानुसारेण तत्प्रमाणं द्रव्यं [...]य दद्यात्। पुनराधानं कृत्वा
दानं किंचित्कुर्यात्। ब्राह्मणभोजनादि[...]वा धानप्रकारं दर्शयति। तदत्र
पुनराधानमित्थं कुर्वीत याज्ञिकः। उ[...]पादिकं कुर्यात् आधानांतं विवाहवत्।

Indira Gandhi National
Centre for the Arts

गृहप्रवेशनीयाख्यं कृत्वास्या हृदयां

॥३४॥ चिवाहाज्याहुतीर्हुत्वा लौज्यहोमो भवेदिति। गृहप्रवेशनीयाख्यं कृत्वास्या हृदयाभिमर्शनं तत्रैव समानतंत्रकं च हहोमद्वयमि

जनं ॥३५॥ परिणीतां दिनान्तस्याल्लुक्कानादर्शनेरवशासमानतंत्रकं च हहोमद्वयमि

र्दर्शनं भवेदिति ॥३६॥ ॥अस्यार्थः॥ ॥अथ पुनःसंधानविधिरुच्यते। नतु पुनराधानम

विधिनेन प्रकारेण याज्ञिकाः कुर्वंति। कथमित्याहाग्न्याधानमग्न्याधानायम्पूर्वगुणविधि

ष्टायां तिथौ मम विच्छिन्नस्योपासनाग्नेः पुनर्गृह्याग्नेरुत्सिध्यर्थं आधानहोमं क

रिष्ये इति प्रतिज्ञाय तत्पले पारिकमाधारांतं विवाहवत्कृत्वा विवाहाज्याहुतीर्हुत्वा

तत्र पलाजहोमं कृत्वा गृहप्रवेशहोमं अग्नः पूजामि निचनस्य आज्याहुतीर्हुत्वा

हृदयांजनमपि तथैव कृत्वा विवाहे परिणयनं यत्तेन तदत्र नास्ति। अश्मारोहण

मपिनास्ति। अनुपयानिलाचनदासादनमपिनास्ति। विवाहे वरः अंजल्युपस्त

रणं करोति व्रातालाजानू द्विरावपति। अत्र सर्वं स्वयमेव वधं जलौ कृत्वा तथैव हुति

हुतीवधूः अग्न्यग्रे होमं करोति। अत्र विवाहहोमप्रवेशनीयहोमद्वयमपि

समानतंत्रकं भवति। विवाहे पुनर्विवाहहोमः श्वशुरगृहे विधिनानिर्वर्तितथैव १७५

स्वगृहमागत्य एकग्रामे ग्रामांतरे वा आगत्य गृहप्रवेशनीया भवतीति विवेकः॥ संव

त्सरं तु त्यक्ताग्निः कुर्याच्चांद्रायणव्रतं। अथवाप्युपवासस्तु प्रतिमासं दिनं भवेत्॥

॥३७॥ यो ग्निं त्यजति नास्तिक्यात् प्राजापत्यं समाचरेत्॥ ॥अस्यार्थः॥ ॥अग्निवि

नाशे वत्सरे तीते चांद्रायणं व्रतं कुर्यात्। अथवा प्रतिमासमुपवासः। मासमासं प्र

ति प्रति दिनमुपवासः। यस्तु नास्तिक्यादग्निं त्यजति पुनर्वैदिकसंसर्गोऽनु अन्वाधा

नं कर्तुमिच्छति तदा प्राजापत्यं प्रायश्चित्तं कृत्वा पुनराधानाधिकारी भवतीत्यर्थः। अ

थ न स्यान्निलनिमित्तमाह। तृतीयपक्षतीनांतु पर्वणामतिपातने ॥३८॥ पुनराधेयमि

च्छंति केचित् गृह्यविदो द्विजाः। उभयातिक्रमे कार्यं एकः पाथिकृतो भवेदिति ॥३९

॥अस्यार्थः॥ ॥स्थालीपाकद्वयलोपे प्रायश्चित्तं [illegible] तृतीयादिस्थालीपाका

तिक्रमेण नष्टाग्निरेव भवति। तत्र पुनराधानहोमः कर्तव्यो भवति। उभयं नाम पौर्ण

मासस्थालीपाकः दर्शस्थालीपाकश्च [illegible] स्य लोपे प्रायश्चित्तं भवति

उभयोर्लोपे पथिकृतद्वयं भवति। स्मृतिर [illegible] अमावास्यायां वा पौर्णमासी वा तीया

Indira Gandhi National
Centre for the Arts

तत्रप्रायश्चित्तिरिति।सोग्नयेपथिकृतेष्टा[illegible]पुरोडाशंनिर्वपेदिति।श्रौतेपुरोडा
शनिर्वपणं।अत्रव्रीहिनिर्वपणंनवति।[illegible]ब्देनपौर्णमासीशब्देन
अन्वाधानेष्टिपर्यंतंदिनद्वयंसाध्यंकर्म[illegible]न्वाधानेकृतेकेनचिद्दुरोधे
नप्रतिपद्वियोगेनकृतःतदायागकालोपजनि[illegible]वायपरिहारार्थव्याहृतिहो
मंकरिष्यइतिसंकल्प्यआज्यसंस्कारंकृत्वाव्याहृतिश्रौतेकौनरवालीपाकंचकरो
ति।एवमष्टमीपर्यंतंनवति।तदूर्ध्वमुपवासादिप्रायश्चित्तविधानं।अनवसरादु
न्वाधानादिनेअन्वाधानंनकृतंचेत्तदाप्रतिपद्वियागावसरेअन्वाधानलोपप्राय
श्चित्तार्थंव्याहृतिहोमः।अन्नलोपार्थेचतनपतेष्टिर्नवति।प्रायश्चित्तविषयेसर्वत्र
चतुर्वारमाज्यंगृहीत्वापूर्णाहुतिर्देति।उत्तरत्रवक्ष्यति।अथपुनर्नष्टाग्निमित्तं
तत्रंसमारूढेसमिन्नाग्नेपुनराधेयमिष्यते।वक्ष्यामिपुनराधेयंजयंतस्वामिनाम
तामिति॥४०॥ ॥अस्यार्थः॥ ॥समारूढेसमि[illegible]समारोपितेग्नौयदिप्रमाद
वशात्समिन्नपतितदानष्टाग्नित्वात्पुनरा[illegible]भः कर्तव्यइति।अत्रसमं

गात्कुशस्त्रांतरोक्तानिपुनराधेयनिमित्तानिप्रदर्शयंते।अश्व[illegible]पतितोदक्याकाकवानरराश
मैः।स्पृष्टोनष्टोग्निरारूढःप्रणपस्तरणीध्रुवमिति।अत्रपतितोदक्यादिपदोपादानेन
चांडालादयःसर्वेगृह्यंते।अनरत्नुआरोपितस्याग्नेःसंरक्षणार्थेकृष्णाजिनादिनिवे
ष्टयंतियाज्ञिकाः।धार्येग्नौस्पृष्टिदोषोनास्ति।निमित्तांतराण्यपि।विवाहाग्निस
मार्येषुरतसीमामुल्लंघ्यगच्छति।होमकालव्यतीतस्यपुनराधानमिष्यतइति।यदिस
भार्यःसन्नग्निंविहायग्रामांतरंगच्छति।पश्चाद्धोमकालेअतीतेपुनरागच्छति।तदानष्टा
ग्नित्वात्पुनराधानकरोति।होमकालव्यतीतस्येतिचवचनात्[illegible]दंपत्योर्मध्येएकेनअग्नि
समीपस्थेदास्थानव्यमित्यर्थः।अग्निसमीपेविद्यमानयोरपिदंपत्योर्यदिसूर्यअस्तंग
च्छेदस्तुदियाद्वातदानष्टाग्निर्भवतीतिकेचित्।तथा[illegible]पुनरेपिअग्निंविनानष्टा
ग्नित्वं।एकेनसीमातिक्रमेणद्युनिक्रमेवानष्टाग्नित्वनास्ति।अन्यान्यपिपुनराधेयनि
मित्तानित्रिशास्त्रांतरेभ्योवगंतव्यानि।जयंतस्वा[illegible]संक्षेपमार्गेणपुनराधानवि
धिरचयमववक्ष्यामि।तमेवविधिंप्रदर्शय[illegible]धेपिकर्मनारात्रयथारांतवमा।

Indira Gandhi National
Centre for the Arts

हरेत्। उपलेपादिकं कृत्वा संनारान् विदधाति[illegible]॥४१॥ संचारे स्वादधात्यग्निं श्रोत्रियादि गृध्र दाहनें पर्युहनादिकं कृत्वा पूर्ववदाज्यं[illegible]पूर्ववत्॥४२॥ स्रुवेण जुहुयादा ज्यमयाश्चेत्यनयैकया ति। अस्यार्थः। अग्न्याधिपि[illegible]गजाश्वरथानादिभ्यः शुद्ध मृत्तिका आनीय स्थंडिले उपलेपादिकं कृत्वा अग्नि[illegible]पर्युहनादिकं कृत्वा पूर्ववदा ज्यसंस्कृत्य अयाश्चाग्न इति मंत्रेण स्रुवेणैकामाज्याहुतिं जुहोति। एतावन्मात्रेणायंगृ ह्याग्निर्भवति। रत्निकादिनां तु इदमनिमित्तेन भवति स्थालीपाके त्वतिक्रांते यद्यग्नौ स्व येयजेत्॥४३॥ स्वाग्नावन्यो यजेद्यद्वा कार्यः पाथि[illegible]तः श्चरुः प्रायश्चित्त चरुस्थापूर्णा हुतिर्वा पिवा॥४४॥ आज्यं द्वादशाहुत्वा स्रुवं गृहीत्वा पूरयन् स्रुचं। तयाज्याहुतिः कार्या सा पूर्णाहुतिरीरिता॥४५॥ स्रुवपूर्णाहुतिर्वा स्याद्दिसके याज्ञिका विदुरिति॥ अस्यार्थः॥ ॥स्थालीपाके अतिक्रांते सय द्यन्यस्मिन्नग्नौ औपासनाग्नौ स्वयं यजेत् अ थवा स्वाग्नौ अन्यो वा यजेत्। नथा पथि कृच्चरुः कार्यः कथं वा यत्र प्रायश्चित्तार्थं चरुद्र व्यमुक्तं तत्र चरुस्थाने पूर्णाहुतिर्वा कर्तव्या भवति। तत्र पूर्णाहुतिलक्षणं स्वयमेवा १०७

हा। द्वादशवारं स्रुवेणाज्यं गृहीत्वा दर्वीं पूर्णां कृत्वा तया द[illegible] अग्नये व्रतपतये स्वाहेत्यादि जुहोति। सा पूर्णाहुतिर्भवति। अथवा स्रुवमेवाज्यपूर्णं कृत्वा तेनैव स्रुवेण तदाज्यं जुहोति। सैव पूर्णाहुतिरित्येके याज्ञिकाः। प्रायश्चित्ते कृते पश्चाद्दत्तीनमपि कर्म वै॥४६॥ कार्यमित्येक आचार्या नेत्यन्ये तु विपश्चित इति॥ ॥अस्यार्थः॥ ॥नित्य होमादि लोपे स्थालीपाकादि लोपे तत्रांके न तत्प्रायश्चित्तं कृत्वा अतिक्रांतं च कर्म कार्यं। अन्येपि पश्चिनो याज्ञिकाः अती तं कर्म न कार्यमित्याहुः। प्रायश्चित्तेनैव चरितार्थत्वात्। अ वाकूराम्पापरासांतु बहिरायतन हुतं॥४७॥ प्रायश्चित्तसमाप्त्यंतं समर्थो जीवितं यदि। इदं तेद्दत्त्यचास्य स्वस्य स्थाने स्मिन्प्रक्षि पत्पुनः॥४८॥ आज्याहुतिं च जुहुयात् व्याहृत्यांते वपूर्ववत्॥ ॥अस्यार्थः॥ ॥राम्पापरासो नाम स्थंडिला द्बहिरुक्तप्रदेशः तस्मादवागायतनाद्बहिः स्थंडिलमर्यादामतिक्रम्य प्रमाद वशाद्यदि बहिर्विनिर्गच्छति तदा इदं त एकं परस्तु तएकामे निमंत्रेण तदुल्मुकं स्वस्थाने प्रक्षि प्य ततः समुच्चितं व्याहृत्या एकामेव आहुतिं मनेन जुहोति। आपस्तंबेन तु अवाकूत्रिरात्राद यमाहुतिः स्यादा पंचरात्रं तु मनस्वती वा प्राजा[illegible]त्रात्सहनं तु मत्यादाद्वादशाहात्पुनरा

दृषीना। अनिर्क्तो नोयदा त्वाप्यपरा समनल्लोन [illegible] दनः पापिच्छनः कार्यः पूर्णाहुतिरधा
पिवेति। अस्यार्थः॥ यदा त्वाप्यपरा सदेशामूप्य [illegible] प्युक्तं गच्छति तदा पाथेच्छनश्च रं
पूर्णाहुतिर्वेति। इध्माधानकृते दुष्टे प्रधानहवि [illegible] न्॥ ५०॥ नत्स्थाने जुहुयादाज्यमङ्
कं च जुहोत्यथ। एवं समाप्य यद्दुष्टं तद्प्सु प्रक्षिपेत्पुन [illegible] ॥ अन्वाधानादिको यागः पुनः
कर्तव्य एव तु। प्राग्गिध्माधानतो दुष्टे प्रधानहविषि त्वथ॥ ५२॥ तद्धविः पुनरुत्साद्य पूर्ववत्स
कर्तव्य एव तु। प्राग्गिध्माधानतो दुष्टे प्रधानहविषि त्वथ॥ इध्माधाने कृते सति पांसु कीटादिपातेन यदि प्रधानस्य हविषः दु
मापयेत्। अस्यार्थः॥ इध्माधाने कृते सति पांसुकीटादिपातेन यदि प्रधानस्य हविषः दु
ष्टता भवति। तदा तमेव प्रदेशं हरीकृत्य यस्या देवताया यः सवि नागः तस्यै देवतायै आज्येनैव
जुहुयात्। अवदिष्टेन शुद्ध द्रव्येण यागं समाप्य यत्। हरीकृतं दुष्टं द्रव्यं तदप्सु प्रक्षिपेदिति
।तथापि यागविघ्नं मत्वा तमेव यागं सांगमन्वाधानादिपूर्वकं पुनः कुर्यादिति। इध्माधाना
दर्भिवं हवि दीषे पुनरन्वाधानपूर्वकस्य विहितत्वादिध्माधोजातेतन्निर्वपणादिपूर्ववत्कृत्वा
होमं समापयेदिति। न तत्र पुनरन्वाधानमिति। इध्माधानानंतरं हविर्दोषे पुनरन्वाधान
पूर्वकस्य विहितत्वादिध्माधानहोमात्प्रागेव हवि दोषे हविरुत्साद्य होमं समापयेत्। नत

त्रान्वाधानपूर्वकस्य यागस्याप्रवृत्तिरिति। अंगानां वे [illegible] रादयेत्पुनः॥ ५३॥ [illegible]
द्धविविदोषे आज्येनैव समापयेत्॥ ॥अस्यार्थः॥ ॥प्रधानहोमस्य हविषः अंगि [illegible]
व्रनपतत्यादीनामंगत्वं तन्निमित्तं हविर्दुष्टं च पुनर्नवीनं तद्धविरुत्साद्य जुहुयात्। स्वि
ष्टकृद्भाग दुष्टे सति स्विष्टकृद्विधानमाज्येनैव समापयेत्र चात्र पुनर्योगावृत्तिरिति। प्र
च्युते स्तुनखैः केशैः कीटैर्वा मध्यसे विवितैः॥ ५४॥ वसासृक्कृष्णुश्मश्रुमज्जास्थिमूत्रविट्स्वे
दद्रूषकैः श्लेष्मादेरपि बीनत्सैर्दुष्टान्यप्सु हवींषि तत्॥ ५५॥ निक्षानित्दे [illegible] नित्का
नि दृष्टान्यप्सु विनिक्षिपेत्। अस्यार्थः॥ पूर्वमुक्तं हविर्दुष्टं चेत्तदा पुनर्नवीनमुत्साद्य जु
हुयात्। केदुष्टं तिसपक्षायांतानेवाह। प्रच्युतेरित्या [illegible] र्थनिष्पन्नेहविर्नेपतिः। ए
वंविधानि हवींषि अप्सु प्रक्षिपेत्। पुनरन्यहविः [illegible] कुर्यादित्यर्थः। स्रग्भिन्नावेन
दग्धान्यामाहृत्य जुहुयात्स्त्रुचं॥ ५६॥ वानस्पत्या [illegible] दंडान्यनिले क्षिपेत्। अ
स्यार्थः। यदि प्रमादादवत्रास्रग्भिन्ना मत्ता न [illegible] पात्र सजमादाय जुहुयादिति।
अन्यान्यपि वानस्पत्यादीनि यज्ञपात्राणि न [illegible] चेत्तदा तान्यपि अग्नौ प्रादे

Indira Gandhi National
Centre for the Arts

पेत्। कथंवात्रग्नौप्रक्षेपः। यस्तपात्राणांदे [illegible] दोभवति। विलंबप्रसंगदोयथानभ
तिनथाप्रक्षिपेदित्यर्थः। संसृष्टोयस्यगृ [illegible] ग्राग्निनासह॥५७॥चरुर्वि
वर्यकार्योयदापूर्णाहुतिर्भवेदिति॥ ॥अस्यार्थः॥ ॥ [illegible] चित्गृहेबहवःसाग्नयोभ
वंतिकदाचिद्युद्धिपरस्परमेलनंभवतितदाअग्नि [illegible] सागैनाअग्निसंसर्गनिमि
त्तप्रायश्चित्तार्थंअग्नयेविविक्तयेचरुनिर्वपणंकुर्यात्। अथवाएवोक्तप्रकारेणपूर्णाहु
तिः। अत्रेताग्निनापिसंसृष्टेगृहदाहेप्ययंविधिः॥५८॥प्रायश्चित्तंचरुस्थानेपूर्णाहुति
रिष्यते। ग्रामदाहाग्निसंसर्गेसवर्गोयश्चरुर्भवेत्॥५९॥वैद्युतेनतुसंसर्गंकुर्यादपु
मतेचरुमिति॥ ॥अस्यार्थः॥ ॥गृहदाहश्रौताग्निसहलौकिकाग्निसंसर्गेप्ययमेव
विधिर्भवति। प्रायश्चित्तंचरुस्थानेपूर्णाहुतिर्वेष्यते। अथवाएकग्राममध्येगृहांतरस्थे
नलौकिकाग्निनासहग्रामदाहवशात्संसर्गोअग्नयेसंसर्गायचरुर्भवति। अथवावैद्यु
तेनविद्युत्पवशात्सतितेनाग्निनासंसर्गोअप्सुमतेग्नयेचरुंकुर्यादिति। पर्वणपत्रप
पातेतुकुर्याद्व्रतग्नेचरुं॥६०॥पर्वणिव्रतलोपेतुकुर्या [illegible] नचैवं ससमानतंत्रंकुर्वीत

पार्वणेनतुकर्मणेति॥६१॥ ॥अस्यार्थः॥ ॥यदिप [illegible] नस्यव्रतदैवव्रतास्थप
तकारणंभवतितदाग्नयेव्रतभृतेचरुंकुर्यात्तानथैवपर्वणि [illegible] दोष्पनोजनाधः। नायना
व्रतलोपेग्नयेव्रतपतयेचरुंकरोति। व्रतलोपादिविषयेयद्यपिएवंदिनेनिमित्तंभवति
तथापिद्वितीयेप्रतिपद्दिनेस्थालीपाकेनसहसमानतंत्रंकार्यमिति। स्यात्पवित्रयोर्न
नाशस्यात्पवित्रवतेचरुं। प्रायश्चित्तविशेषस्यपत्रनोक्तो। नवाद्धि [illegible] ॥६२॥होतव्याज्याहु
तिस्तत्रतनुर्वःस्वरितीद्वृतु॥ ॥अस्यार्थः। आज्यस्थवनसाधयेतयेपवित्रनयोर्नाशात्र
ग्नयेपवित्रवतेचरुंकरोति। एतान्युक्तानिप्रायश्चित्तविषयाणि। अन्यस्मिन्कर्मणियत्रय
त्रप्रायश्चित्तंनोक्तंअपराधश्चविद्यतेतत्रसर्वत्र [illegible] रितिसमुच्चितमंत्रेणएकाज्या
हुतिर्भवति। स्वयंज्वलन्नुद्दीप्यस्वनिद्रानां। से [illegible] ॥आधेयमुपघातेषुपुनस्त
त्पनयासमिन्॥ अस्यार्थः॥

अहुताग्रयणोश्नीयात्नवान्नयदिवाननः॥ [illegible] यकर्तव्यःश्चरु [illegible] र्णाहुतिस्तुवैश्वि

Indira Gandhi National
Centre for the Arts

अस्यार्थः॥ ॥नवान्नभक्षणाधिकारार्थं विहितस्याग्रयणस्य कृत्वैव यदि नवान्नभक्षणं कुर्या-
त्तदा अग्नये वैश्वानराय चरुं कुर्यात्। अथवा पूर्णाहुतिमिति। द्विषदन्नं यदा भुंक्ते तत्राप्येवं
कर्तव्यम्॥६४॥ अस्यार्थः। यदि रजनावननिरंतरं [illegible] नाम द्विषदन्नं प्रमादात् कस्यचि-
द्गृहाद्भक्तं तद्भोजनस्य एव वैश्वानरस्य चरुः कार्य इति। कपालस्य नाशे च रक्षा श्रवणाकर्म-
णि तथा कपालं नष्टं वेद्विन्नं प्रागेव श्रवणाद्यदि॥६५॥ [illegible]णानपवृत्तेति कपालं संदधाय
तत्। अभिन्नो घर्म इत्याभ्यां मंत्राभ्यां प्रक्षिपेज्जले॥६६॥ तच्चेदश्रुविसंबंधं गमयेद्भिन्न-
मेव वा। भूमिर्भूमीति मंत्रेण प्रक्षिपेदेव तज्जले॥६७॥ ॥अस्यार्थः श्रवणाकर्माख्ये कर्म-
णि कपालनाशे सति अग्नये वैश्वानराय चरुं कुर्यात्। अथवा पूर्णाहुतिः। यदा पुरोडाशा-
र्पणात्प्रागेव कपालं भिन्नं न वेत्तदा तदेव भिन्नं कपालं अनपवृत्तेति मंत्रेण संद-
धाय संयोज्य पश्चात्तत्कपालं अभिन्नो घर्म इत्याभ्यां मंत्राभ्यां जले प्रक्षिपेत्। तत्र मंत्रौ।
अभिन्नो घर्मो जीरदानुर्यत आत्तस्तदगन्पुनः। इध्मो वेदिः परिधयश्च सर्वे यज्ञस्यायु-
रनुसंतरंतु स्वाहा। त्रयस्त्रिंशत्तंतवो [illegible] वितत्नरे [illegible] घपाथेऽपजंतेतान्भिन्द्रं दं [illegible] १८०

निदधाय जत्रस्वाहेति। अथवा अश्रुविसंबंधं गमयत्कपालं न वेद्भिन्नं वा न वेत्तदा
भूमिर्भूमिमगादित्यनेन मंत्रेण तज्जल एव प्रक्षिपेत्॥ [illegible] पुरोडाशो मुद्गच्छेद्य
न्मे [illegible]॥ अभिमंत्रयते नैव माहिंसीरि[illegible]
वायदि। किमुत्सतसीति मंत्रेण बर्हिष्यनं निधायतु॥६८॥ अभिमंत्रयते नैव माहिंसीरिति
मेत्रतः॥ ॥अस्यार्थः॥ यदि पुरोडाशः प्रमादात् कथंचिद्भिद्येत निर्गच्छेत्। अथवा उद्गच्छे-
दुत्प्लुत्य गच्छेत्तदा एनं पुरोडाशं किमुत्सतसीति मंत्रेण बर्हिषि निधाय पश्चात्तमेव पुरोडाशं
मा हिंसीरित्यनेन मंत्रेण अनुमंत्रयते। अनुमंत्रणं कुर्यादिति। अथ यतो यजमानस्थे यजमा-
ने [illegible] जीवति॥६९॥ अग्नये सुरभिमते च चरुः पूर्णाहुतिस्रुवा। अस्यार्थः॥ ॥यजमाने जीव-
त्सपिय दिलोकतः मृतवाब्दः आयतपुत्रादिभिः तदा [illegible] यजमानः अग्नये सुरभिमते चरुं कु-
र्यात्। पूर्णाहुतिर्वा। अथ यस्य वधूर्गर्भो वा जनयेद्यमौ [illegible]॥७०॥ समरुद्भ्यश्चरुं कुर्यात्
पूर्णाहुतिमथापि वा। आहुतिर्हूयमानानु बहिर्[illegible]॥७१॥ देवाजनमगन्यज इत्यने-
नाभिमंत्रयतामिति। अस्यार्थः॥ ॥यस्य गृहे [illegible] अपत्यद्वयं सहैव सूते तदा अग्नये
मरुत्वते चरुं कुर्यात्। पूर्णाहुतिं वा। यद्याहुतिर्हूयमाना सती अग्ने बहिः पतेत्तेन तदा दे[illegible]

Indira Gandhi National Centre for the Arts

जनमगन्यज्ञ इत्यनेनमंत्रेण अनुमंत्रणं कु[illegible]ः इत्यस्य स्वाहुतिं हुत्वा प्रसिंच्योदक
पुनः॥७२॥ देवाहुज्जे ति सर्वस्कन्नं तथि मन्दे[illegible]ा र्थः इत्यस्य यनेन मंत्रेणा
ज्याहुतिं हुत्वा ततः प्रपतिना माहुतिं पुनरनल्ले[illegible] देवाजनेति मंत्रेण सर्वत्र स्कंन
पतितं हविरग्निमन्तो वा व्युत्क्रमो देवतानां नुसं कल्[illegible]े॥७३॥ मंत्राणां व्युत्क्रमा
हुतहोमकाले नवेद्यदि मध्य पूर्वापर नश्चे ति व्युत्क्रमा[illegible] वेद्यदि॥७४॥ विपिन्नानं न स
र्वस्मायश्चित्तं नवेदि हा अस्यार्थः॥ अन्वाधानादौ देवतानां व्युत्क्रमः पौर्वापर्य नंगश्चेज्जनति
नद्वन्मंत्राणामपि व्युत्क्रमो नवति नदा होमानंतरं तदपराधनिमित्तं प्रायश्चित्तं नवेत् विनो
पस्थउक्तवा समुच्चित्त व्याहृत्या आहुतिरिति विपिन्नानंतरमि[illegible]त्र पान्संदेहः। प्रागेवो
त्पन्नदोष आज्यसंस्कारनो यदि॥७५॥ प्रायश्चित्तं नवेदाज्यसंस्कारानंतरं ततः अस्या
र्थः। आज्यसंस्कारात्प्रागेव प्रायश्चित्तनिमित्ते सति आज्यसंस्कारानंतरं प्रायश्चित्तं कु
र्यात्। प्रायश्चित्तरूपाहु पूर्णाहुतिः सर्वत्र आज्यभागानंतरं [illegible]निज्ञानव्यां ततः[illegible]
नहोम इति। द्रव्याणां व्युत्क्रमास्याच्चेत्तथा निर्वपणा[illegible]॥ यद्वोदेवा ऋचा अ[illegible]हु

हुयात्तु स्रुवाहुतिं। यत्पुरस्त्वं स्वगहे द्रव्यहोमके[illegible] यजमानस्तु जुहु[illegible]
या नावे स्वाहुतिं। कस्मिंश्चिद्ब्राह्मणायास्मिन्नुपस्ते द्रव्य[illegible]ानितत्॥७८॥ होत
काहुतिश्चात्र व्याहृत्याख्यैः समुच्चय इति। अस्यार्थः। बहुषु होम द्रव्येषु स[illegible]ः पौर्वा
पर्ये नंगः तथा निर्वपणेपि क्रमनंगो नवति। तदा यद्वोदेवा॰ अतिपातयानी स्रुचा अस्या
आज्याहुतिं जुहोति। तदनावे यजमानः स्वयमेव जुहोति तत्र होमकर्त्तृ ब्राह्मणे यद्गृह
विद्यमानं द्रव्यं तद्भोजनपूर्वा तं देयमिति ब्रह्मस्त्वस्तं न चेत्स्वयमेव होमकरणपक्षे
कस्मैचिद्ब्राह्मणाय उक्तं द्रव्य दद्यादिति। तथैव यद्वोदेवेति मंत्रेण हुत्वा समुच्चितव्या
हृत्या एकामाहुतिं जुहोति। प्राग्यागाद्यु क्रमज्ञान इदं कृत्वा यजेत् ततः॥७९॥ अवि[illegible]
ते विपर्यासविहितां देवतां स्मरन् इदं पूर्वोक्तं प्रा[illegible] कृत्वा पश्चाद्यजेन होमं कुर्या
दित्यर्थः। यदा हविरपक्वस्यात्तेनैव हविषा यजेत्॥८०॥ [illegible]ारा वमात्रेरनुपक्वे द्वीहि
भिरोदनं। भोजयेत्तेन चान्नेन वस्तु तोब्राह्मणान्[illegible]॥८१॥ अस्यार्थः। यदा बर्हिर्व्यासा
दनानंतरे अपक्वमिज्ञाता पुनः पाको निषि[illegible] तेनैवान्नेन अपक्वे[illegible]समा

पचेत्। होमानंतरं वक्ष्यमाणमिदं प्रायश्चित्तं कुर्यात्। चतुःशरावपरिमितव्रीहिनि-
ष्पन्नैस्तंडुलैः ओदनं गृहे साधयित्वा तेनैव चतुरो ब्राह्मणान् भोजयेदिति। बहुदग्ध-
मगग्धं वा किंचिदेव यदा हविः। विशिष्टेन ग्राह्य [illegible] नयोगः स्यादारभ्यादित [illegible] नीति॥८२॥
अस्यार्थः॥ ॥यदा हविः बहुदग्धं अथवा किंचिद्दग्धं तदानुवर्त्तदा हविषि होमयोग्यं [illegible]
द्विलब्धा तेनैव यागं समाप्य पुनः स एव यागः आदितः कर्त्तव्यः। आदित आरभ्य कर्त्तव्यः
। कृत्स्नं दग्धं यदा तु स्यात्पुनः कृत्सादयेद्धविः। स एव यागः कर्त्तव्यः पुनर्यागस्तु नेष्यते॥
॥८३॥ ॥अस्यार्थः॥ ॥यदा संपूर्णं हविर्दग्धं भवति तदा हविर्दूरीकृत्य पुनः सम्यक् हवि
रुत्साद्य तमेव यागं समापयेत्। न तु यागान्तरः कर्त्तव्यः। मध्यात् पूर्वार्द्धतो वा यदि दुष्टह
विर्भवेत्। तत्स्थाल्या हविषो वघ्नं मध्यापूर्वार्द्धतः पुनरिति॥८४॥ ॥अस्यार्थः॥ ॥मध्या
त्पूर्वार्द्धतः अवदानं स्वीकृतं हवी। स्थितं हविः यदि प्रमादवशात् दुष्टं भवति तदा तद्धवी
स्थितं हविः दुष्टत्वात् त्यक्त्वा पश्चात्तस्यैव स्थाली स्थित हविषः कार्यात् मध्यात् पूर्वा [illegible]
पुनर्गृहीत्वा यागं समापयेत्। पुनर्यागावृत्तिर्नास्ति। समारूढ समिन्नाग्नौ पुनराधेयमि

ष्यते॥ ॥अस्यार्थः॥ ॥अग्न्यारोपित समिन्नाशे [illegible] पुनःसंधानं कुर्यात् [illegible]
त्रोक्तमविरोध्यन्यस्मृत्युद्दिष्टमपि ॥८५॥ बोधायनः [illegible] प्रायश्चित्तमाह [illegible]
(तरोक्तमपि ग्राह्य) प्राह लोपे पंचमस्वरे कुर्वन्॥ ॥अस्यार्थः॥ अविरोधे परस्तु [illegible] मपि
अन्वेषणीयं भवति। पंचमस्वरलोपे बोधायनः इदं प्रायश्चित्तमाह। तस्मात्त्वतरोक्त
मपि (अन्वेषणीयं) ग्राह्यमित्यर्थः। एतन्यः पंचैते न्यायद्यो कोपि विहीयते॥८६॥ मनस्व
त्याहुतिस्तत्र प्रायश्चित्तं विधीयते॥ ॥अस्यार्थः॥ पंचयज्ञानामध्ये यद्यकोपि लुप्य
ते तदा मनोज्योतिरिति मंत्रेण प्रायश्चित्तार्थमाहुतिं जुहोति। एवं द्वयहं त्र्यहं वापि
दाहहतेषु च॥८७॥ ॥निरंतरं तनुमतीं कृत्वा च [illegible] मीजं पेत्। द्वादशाहे द्वादश
वा निवृत्तेषु तु सर्वशः॥८८॥ चरुस्त्वा वारुणी [illegible] मतीश्चरुरिति॥ ॥अ
स्यार्थः॥ ॥प्रमादादवशाद्दिनद्वयं त्र्यहं वा [illegible] श्चेनिदा [illegible] तंतुमतीं
कृत्वा चरुस्त्वा वारुणी जपेत्। अनंतरं पंच [illegible] र्थः॥ एवं द्वादशाहे [illegible] नेषु
सत्सु चरुस्त्वा वारुणी कृत्वा अनंतरं तंतुमती [illegible] कृत्वा वारुण्य [illegible] जदि

आश्वलायनश्रौतवि

ऽपहाय गान्कार्दीः सर्वः॥ ॥इत्याश्वलायनश्रौतकारिकायां कौमारभृत्यतीयो घ